123
1 (A-B)

अथ

अद्वैतसिध्दान्तविद्योतनम्

ब्रह्मानन्दसरस्वती-

प्रणीतम् ।

123
1

Adwait Siddhanta Vidyotanam

१

इत्यद्वैतसिद्धांतविद्योतने प्रथमपरिछेदप्रारंभः ॥

१

श्रीगणेशायनमः॥ ॥सदनंतचिदानंदे जगतीयत्रजायते॥ रजतादीवभुजंगत्वादौ तदेवाहंपरागतिः॥ ननु देशांतरीयरजतादेरेवभा
नेनोपपत्तावपीदंरजतमित्यादिभ्रमस्थलेभुजंगत्वादौरजताद्युत्पत्तिकल्पनेगौरवमितिचेन्न रजतादेश्चक्षुरादेःसंनिकर्षंविनाचाक्षु
षाद्यनुपपत्तेः॥ नच लौकिकविषयतासंबंधेनैवचाक्षुषादिकंप्रतिचक्षुरादिसंप्रयोगस्यहेतुत्वादलौकिकचाक्षुषादिकंअलौकि
कज्ञानलक्षणादिसंप्रयोगेनैवभविष्यतीतिवाच्यं सुरभिचंदनमित्यादौसौरभंपश्यामीत्यादिप्रत्ययाभावेनविषयतासंबंधेनचाक्षु
षत्वाद्यवच्छिन्नाधिकरणतायाःसौरभादौमानाभावेनलौकिकान्यविषयतासंबंधेनचाक्षुषाद्युत्पत्तयेज्ञानलक्षणादेःसन्निकर्षत्वस्य
कल्पयितुमशक्यत्वात् सौरभंस्मरामीत्यादिप्रत्ययाभ्युपगमेनविषयतासंबंधेनस्मृतित्वाद्यवच्छिन्नाधिकरणतायाएवतत्रस्वीकारात्
युगपज्ज्ञानद्वयेमानाभावेप्येकस्मिन्नेवज्ञानेचाक्षुषत्वस्मृतित्वादिसत्वेबाधकाभावात् सांकर्यांशिकत्वयोः॥ प्रामाणिकयोर्दोषत्वस्याप्रा
माणिकत्वात् चाक्षुषत्वादेर्विषयिताविशेषरूपत्वस्यसंभवाच्च लौकिकालौकिकत्वविशेषाभावेनविषयतासंबंधेनचाक्षुषमात्रेलाघवात्
संप्रयोगहेतुत्वांगीकारात् इदंरजतंपश्यामीत्याद्यनुभवेनभ्रमस्थलेपिलौकिकविषयत्वावश्यकत्वाच्च अन्यथारजतादेर्लौकिकप्रत्यक्षं
विनारजताद्यानयनादौप्रवृत्त्यनुपपत्तेः॥ अथसंप्रयोगस्येवदोषस्याप्यन्वयव्यतिरेकाभ्यांप्रत्यक्षहेतुत्वमितिचेन्न भुजंगत्वादौरजताद्युत्पत्तौ स्वी राम
क्रियमाणायामावश्यकसंयोगहेतुत्वेनैवोपपत्तेः प्रथमक्षणेचाक्षुषाद्यसंभवेपिमन्मतेसाक्षिभास्यत्वेनैवप्रातिभासिकत्वोपपत्तेः॥ द्वितीयादि
क्षणेषुसंप्रयोगसंपत्त्यातृतीयादिक्षणेषुनित्यसिद्धसाक्षिणश्चाक्षुषादिवृत्तिविषयकस्यरजतंपश्यामीत्याकारस्यसंभवात् तन्मतेपि

विशिष्टवैशिष्ट्यागोचरजन्यप्रत्यक्षस्य विशेष्यतावच्छेदकप्रकारकज्ञानादिजन्यत्वेनानुव्यवसायस्य च व्यवसायरूपविषयजन्यत्वेन तत्तीयक्षणा
द्यावेव तादृशानुभवस्य संभवात् किंच विषयदोषस्य कारणत्वस्थले तत्कार्यता रजतादिलौकिकप्रकारतानिरूपितसंसर्गतानिरूपितविशेष्य
तासंबंधेन चाक्षुषत्वादिना वाच्या तथा च लाघवात् तादात्म्यादिसंबंधेन रजतत्वादिनैव सोच्यतामिंद्रियनिष्ठकाचादिदोषस्यापि शंखत्वादिविषय
विशेष्यत्वपीतत्वादिभ्रमविशेष्यजननतात्तादृशविशेष्यनिष्ठेन स्वाश्रयसंयोगादिना हेतुत्वे तत्कार्यतापि समवायादिना पीतत्वादिनैवोच्यतां ए
वमात्मनिष्ठस्य रागादिदोषस्य हेतुत्वस्थलेपि रजतत्वादिनैव न च तत्र रजतादेरात्मप्रत्यासत्त्यसंभवः शंकनीयः शरीरावच्छेदेन ज्ञानादेरिव
शुक्तीदंत्वादिविशिष्टावच्छेदेन रजतादेरात्मसमवाये बाधकाभावात् तत्प्रत्यासत्त्यैव कार्यत्वसंभवादतएव भ्रमस्थले रजताद्युत्पत्त्यंगीकारे दो
षरहितस्यापि तत्प्रत्यक्षमस्त्विति परास्तं तत्सुखसमवेतविषयकप्रत्यक्षे तादात्म्येन तत्सुखत्वेन हेतुत्वात् न च मनसा रजतादिकं साक्षात्करोमी
त्यनुभवापत्तिरिति वाच्यं मनःसन्निकर्षस्य विलंबेन सुखादिसाक्षात्कारस्य विलंबादर्शनेन तस्य तत्र हेतुत्वाकल्पनात् साक्षात्कारत्वस्येव ज
न्यसाक्षात्कारत्वस्यापींद्रियसन्निकर्षजन्यत्वव्याप्यत्वे मानाभावात् ननु तथाप्यहं सुखीतिवदहं रजतवानित्यादिप्रत्ययः प्रमा स्यादिति चेन्न
अहमिहैवास्मीति प्रत्ययस्य विशेष्यतावच्छेदकीभूततत्तच्छरीरावच्छेदेनैतद्देशमात्रसंयोगित्वावगाहित्ववदुक्तप्रत्ययस्यापि तत्तदवच्छेदेन रज
तावगाहित्वेन भ्रमत्वात् परमते पिशाचीशाभिन्नत्वेनैवात्मनोऽहमाकारप्रत्ययविषयत्वात् तदुक्तं टीकायां मिश्रैः येप्यहंकारास्पदस्यात्मत्वमा
स्थिषत तेऽप्यहमाकारप्रत्ययस्यातात्त्विकत्वमभ्युपेयमहमिहैवास्मि सदने जानान इत्यादौ सर्वगतस्यात्मनः प्रादेशिकत्वानुभवादिति दिग्वि

दोषमात्रसंयोगित्वरूपप्रादेशिकत्वस्यशरीरावच्छेदेनात्मनिसत्त्वेपितत्रशरीराभेदस्यविरहेणोक्तप्रत्ययस्याप्रमात्वरूपमतात्त्विकत्वमित्यर्थः॥ ननुरागादि
दोषप्रत्यक्षयोर्विषयतयैवलाघवेनहेतुहेतुमद्भावांगीकारात्कथंतत्रभ्रमविषयोत्पत्तिरितिवाच्यं येनप्रकारेणरागस्तेनैवप्रकारेणतस्यप्रत्यक्षत्व
महेतुत्वेनविषयतावच्छेदकत्वसंबंधेनैवहेतुतद्भावस्यवाच्यतयातदवच्छेदकयोस्तत्तत्पुरुषीयत्वस्यावश्यंनिवेश्यतयातद्वेषभयाद्रजतादिरागत्वेन
रजतत्वादिनासमवायेनतदुत्पत्तेर्युक्तत्वात् अन्यथाकार्यतावच्छेदकसंबंधेविषयतानिरूपितत्वावच्छेदकतात्वयोर्विशेष्यविशेषणभावेविनि
गमनाविरहेणहेतुताद्वयस्यसंबंधतावच्छेदकगौरवस्यचापत्तेः॥ सकलविषयेषुरागानुदयेनपुरुषभेदस्याविषयाधिक्येपिविषयनिवेशकृत
गौरवाभावात् अथतत्ररजतादेश्शुद्धसमवायेनकार्यत्वेइदंत्वविशिष्टाद्यवच्छेदेनात्मसमवायनियमासंभवः॥ समवायस्यतदवच्छिन्नतानिया
मककारणकल्पनेतुगौरवमितिचेन्न अवच्छेदकतासंबंधेनेदंत्वादिविशिष्टावच्छिन्नंप्रतीदंत्वादिनातादात्म्येनहेतुत्वस्यसंयोगादेरिदमाद्यवच्छि
त्व न्नैनियमायक्लृप्तत्वेनततएवरागादिजन्यरजतादेरिदमाद्यवच्छेदेनियमसिद्धेः॥ अन्यथावयविनामपिघटादीनांकपालाद्यनुयोगिकवाय्वादिसंयोगाद्यव
च्छेदकत्वादुद्भवेनतेषामपिस्वावच्छिन्नस्यावच्छेदकतयोत्पत्तौहेतुत्वस्यक्लृप्तत्वात् गुणादेरागादिपुरुषदोषजन्यभ्रमप्रमानाभावेनगुणादेःस्वाव
च्छिन्नहेतुत्वस्यक्लृप्तत्वेपिक्षतिविरहात् वस्तुतस्तुरागादिपुरुषदोषजन्यरजतादेर्गुणाद्यवच्छिन्नात्मसमवेतत्वनियमकल्पनेफलमुखत्वा राम
देवनगौरवंदोषः॥ एतेनस्वाप्नादिभ्रमेइदंरजतमित्याद्याकारकेइदंत्वादिमतोरजतादेश्चद्वयोरप्यारोपात् तत्रतस्यस्वावच्छिन्नंप्रतिहेतुत्वस्या २
क्लृप्तत्वेनतत्कल्पनेगौरवमितिपरास्तं इदमादिरजतयोःपरस्परावच्छिन्नत्वनियामककल्पनस्यफलमुखत्वात् एवंचविषयगतप्रत्यास

त्वादोषस्यकारणत्वस्थलेपितन्तुत्वेनारोपितस्यान्येनापिग्रहणवारणायतन्तुत्वसमवेतत्वेनचाकांक्षेत्यदर्शनत्वादिकारणतावच्छेदकमिव
रजतत्वादिकंकार्यतावच्छेदकमपिविशिष्यतांचाक्षुषत्वादिनातत्रदोषकार्यत्वांगीकारेपितत्रतद्विशेषणस्यावच्छेदकत्वात् अन्यथैकपुतुषीयदो
षादन्यपुतुषीयचाक्षुषादिभ्रमापत्तेः॥ जपाकुसुमादिसन्निधानदोषस्यहेतुतास्थलेतुस्फटिकेलोहित्यादेः एकस्यैवसर्वैर्ग्रहणोक्षातिविर
हेणमन्मतेपिकार्यतावच्छेदकेतदनिवेशः अथविषयनिष्ठप्रत्यासत्त्यादोषहेतुतास्थलेरजतादिनिष्ठकार्यताकेनसंबंधेनेतिचेत् येनसंबं
धेनरजतादिश्चाक्षुषादिभ्रमप्रकारतातेनैव तर्हि समवायेनरजतादिप्रकारकभ्रमस्थलेसमवायेनरजताद्युत्पत्तेरसंभवः॥ तत्रक्रमप्रकारण
ताकस्यरजतावयवतत्संयोगादेरभावात् अन्यथाख्यातिमतेप्रत्यक्षेसंप्रयोगदोषयोर्विषमन्मतेपिरजतादौतदवयवादिदोषयोर्विकल्पेन
हेतुत्वमितिचेत्तर्हि अन्यथाख्यातिमतेदोषासन्निकर्षयोःकार्यतावच्छेदकेचाक्षुषत्वादेःस्वविशिष्टत्वनिवेशापेक्षयाभवन्मतेरजतत्वघ
टत्वपटत्वाद्यनंतधर्मेषुरजतावयवकपालतन्तुतत्संयोगादीनांकार्यतावच्छेदकेषुतद्विशिष्टत्वनिवेशेमहागौरवं एवंस्पर्शवत्वेनभूतच
तुष्टयमात्रवृत्तिजातिविशेषेणसमवायेनजन्यद्रव्यंप्रतिपृथिवीत्वादिनागंधादिकंप्रतिहेतुत्वस्यक्लृप्तत्वादात्मनिसमवायेनद्रव्यगंधा
द्युत्पत्त्यसंभवेनतादृशहेतुतानिरूपितकार्यतावच्छेदकंतादृशकारणवैशिष्ट्येनविशेषणीयमितिमहागौरवमितिचेत् मैवं अन्यथाख्या
तिमतेहिरजतादिप्रकारतानिरूपितसंसर्गतानिरूपितविशेष्यतासंबंधेनदोषकार्यत्वेवाच्येरजतादिनिष्ठत्वप्रकारतात्वयोस्तादृशप्र
कारतानिरूपितत्वसंसर्गतात्वयोस्तादृशसंसर्गतानिरूपितत्वविशेष्यतात्वयोर्विशेष्यविशेषणभावेविनिगमकाभावाद्धेतुतद्भाव

वाकुल्येनमन्मतापेक्षयापिमहागौरवं अथवयवतत्संयोगाद्यपेक्षयादोषाणामनंतानांकार्यतायामवच्छेदकसंबंधस्यसर्वत्रानुगमाशयत्वात् अ
थसंबंधतावच्छेदकमनिवेश्यैवसंबंधोवाच्यः॥ संबंधाननुगमस्यादोषत्वात् ज्ञानभेदेनभिन्नानामपितत्तद्विशेष्यताव्यक्तीनांसंबंधत्व
संभवादितिचेन्न एकस्माद्दोषान्नानाचाक्षुषोत्पत्तिस्थलेतत्तज्ज्ञानभेदेनविशेष्यताभेदात्तत्तद्विशेष्यताव्यक्तिसंबंधेनतत्तद्दोषविशि
ष्टचाक्षुषत्वंकार्यतावच्छेदकंवाच्यं तथाचैकजातीयसंबंधेनकार्यतावच्छेदकावच्छिन्नवतिवर्तमानाभावस्यप्रतियोगितानवच्छे
दकंकारणतावच्छेदकमित्येवंरीत्यासंबंधाननुगमेकारणतैक्यस्यवक्तुमशक्यतयासंबंधतावच्छेदकनिवेशस्यावश्यकत्वात् अ
न्यथाप्रकारविधयाऽवच्छेदकाननुगमस्याप्यदूषणतापत्तेः॥ दोषजन्यरजताद्यप्रतियोगिकतत्तत्समवायादीनामननुगतानामे
वरजतावयवादिकार्यतावच्छेदकत्वस्यमयापिवक्तुंशक्यतेनमन्मतेपिगौरवाभावापत्तेश्च अथज्ञानभेदेपिविषयत्वाभेदस्वीकारा
दुक्तविशेष्यताव्यक्तेश्चाक्षुषादिव्यक्तिभेदेप्येकत्वात्तद्व्यक्तित्वेनैवसंबंधत्वंतस्यावाच्यं रजतत्वावच्छिन्नप्रकारतायाश्चसंबंधतावच्छेद
काघटकत्वेवस्तुगत्योक्तविशेष्यतानिरूपकत्वाद्दोषनियम्यत्वमितिचेन्न उक्तप्रकारताव्यक्तेस्तल्लौकिकत्वस्यवा कार्यतावच्छेदका
घटकत्वेत्राकस्मिकतापत्तेः॥ एकधर्मावच्छिन्नविशेष्यताव्यक्तेरेकत्वेपिपरस्परानधिकरणवृत्तिनानाधर्मावच्छिन्नविशेष्यताकभ्र राम
मोत्पादकैकजातीयदोषस्थलेतादृशधर्मसमसंख्याकानांतज्जातीयदोषकार्यतानांतज्जातीयदोषविशिष्टत्वेनतत्तद्विशेष्यताव्यक्ति ३
संबंधेवाच्यत्वेनातिगौरवात्स्वावच्छेदकसंबंधभेदेनकार्यताभेदस्यावश्यकत्वात् रजतत्वावच्छिन्नलौकिकप्रकारतानिरूपित तादात्म्य

सांसर्गिकविषयतानिरूपितविशेष्यतात्वेन लौकिकतत्प्रकारताव्यक्तिनिरूपितविशेष्यतात्वेन वा संबंधस्योक्तयुक्तधर्मसमसंख्यकार्यत्वाभा-
वेपि संबंधघटकानां विशेषणविशेष्यभावाविनिगम्यत्वेनोक्तगौरवस्यावतारकतया तदपेक्षया लाघवेन तज्जातीयदोषविशिष्टरजतत्वेन ता-
दात्म्यसंबंधेनोक्तकार्यत्वस्यैकस्य युक्तत्वात् किंच भ्रमस्थले मन्मते कपालादिकं विनापि घटादेरुत्पत्त्या व्यभिचारापत्त्या कपालादिविशिष्ट-
घटत्वादिना तत्स्वीकाराऽऽवश्यकत्वेनोक्ततत्तदपेक्षयापि गौरवं तथाहि गोत्वघटत्वादिप्रत्यक्षे तु सास्नाकंबुग्रीवाद्यवच्छिन्नेन्द्रियसंयो-
गवत्समवायस्य ब्राह्मणत्वादिप्रत्यक्षे विशुद्धमातापितृकत्वादिनिश्चयस्य शुक्तित्वादिप्रत्यक्षे नीलपृष्ठत्वादिनिश्चयस्य उत्पलादिनेत्वचाक्ष-
षे सौरभादिसंयुक्तसमवायस्य जलत्वौ[illegible]ल्यादिचाक्षुषे रजतादिभिन्नपावकवृत्तिजलादिसमवायस्य कुंकुमगंधघ्राणजे घृतादिसंयु-
क्तसमवायस्य स्पर्शप्रत्यक्षे अङ्गुष्ठत्वक्संयुक्तसमवायस्य व्यासज्यवृत्तिसंख्यादिप्रत्यक्षे इंद्रियासंयुक्तासमवेतत्वस्य हस्तादिपरिमाण[illegible]प्रत्य-
क्षे हस्तादिपरिमितदेशावच्छिन्नेन्द्रियसंयोगवत्समवायस्य एवमन्यत्र प्रत्यक्षेपि तस्य तत्प्रकारतात्वेन वाच्यं तत्रापि गोत्ववृत्तिविशेष्यतादिविषय-
तागोत्ववृत्तिविशेष्यतादिविषयता लौकिकविषयतात्वेनानुगमय्य तदवच्छिन्नसंबंधेन चाक्षुषत्वावच्छिन्नं प्रति सास्नावच्छिन्नविजातीयसंयो-
गवत्प्रतियोगिकगोत्वविशिष्टसमवायत्वेन हेतुत्वं वाच्यं भ्रमस्थले व्यभिचारापत्त्योक्तसमवायस्य स्वविशिष्टचाक्षुषत्वावच्छिन्नं प्रत्येवोक्तहेतु-
त्वं वाच्यं एवमन्येषामप्युक्तानां स्वविशिष्टतत्तद्धर्मावच्छिन्नं प्रत्येवोक्तहेतुत्वं वाच्यं तथा च तत्तत्कार्यकारणतावच्छेदकघटकानां विशेषणवि-
शेष्यभावस्याविनिगम्यत्वेनावच्छेदकभेदेन कार्यकारणभावानन्त्यस्यावतारकतया महागौरवं॥ मन्मते तु भ्रमस्याविद्यावृत्तित्वेन चाक्षुषत्वाध-

भावेनोक्तकारणकार्यत्वेनोक्तकारणकार्यतावच्छेदकते दैशिकस्य न निवेशः॥४ अथवा समवायेन रजतावृत्तित्वेनोक्तप्रकारणस्याभावात्तेन संबंधेन भ्र
मस्थले रजतावृत्तित्वस्य संभवादिवावच्छेदकतासंबंधेनैव द्रव्यगुणकर्मणां दोषकार्यता वाच्या। नच नव्यतार्किकमते रूपादीनामव्याप्यवृत्तित्वेनावच्छे
दकतासंबंधेनावयवे रूपोत्पत्त्या पूर्वोक्तव्यभिचार इति वाच्यं नव्यतार्किकमते रूपादीनामवयविनि साक्षात्संबंधेनास्वीकारात् व्याप्तिविशेषविशि
ष्टत्वेन तादात्म्यसंबंधेन द्रव्यचाक्षुषहेतुत्वेन रूपस्य तद्देहेतुत्वात् दैशिकविशेषणतादिसंबंधेन वा दोषकार्यता वाच्या रूपादेर्विशेषणतासंबंधे
न सा वाच्या ध्वंसादेस्तु अवच्छेदकतासंबंधेन समवायादिसंबंधेन वा नच विशेषणतादिसंबंधेन रूपादेर्भ्रमविशेष्यतत्तदधिकरणे विशिष्टबु
द्ध्यापत्तिरिति वाच्यं तेन संबंधेन बाधाभावसत्त्वे सर्वेषामपि तथास्वीकारात् नचैवं दोषजन्यद्रव्यगुणकर्मणां दोषरहितेनापि ग्रहणापत्तिरिति
वाच्यं मन्मते विषयसमवेतज्ञाततायामिव तेषु स्वग्राहकपुरुषाणां निरूपितत्वाख्यसंबंधविशेषमंगीकृत्य तत्तत्पुरुषनिरूपितविषयक
त्वस्यैतत्पुरुषत्वेन हेतुतांगीकारात् अन्यथा त्वन्मतेऽपि एकपुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिपरत्वादीनां पुरुषांतरेणाग्रहणापत्तेः॥ प्रकारांतरेण
तादृशापत्तिवारणापेक्षया स्वापेक्षाबुद्धिजन्यद्वित्वादौ तत्तत्पुरुषाणां निरूपितत्वसंबंधकल्पनयोक्तहेतुत्वकल्पनस्यैव युक्तत्वात् तदुपदर्शितला
घवानुग्रहात् संयोगादिसंबंधेन गुणादौ कर्मादिप्रकारकधीस्थले तु कर्मादेरिव संयोगादेरपि गुणाद्यवच्छेदेनोत्पत्तिः नच यत्र यस्य कोपि संबं राम
धो न वास्तवः प्रसिद्धस्तदवच्छेदेन तस्य तत्संबंधस्य च भासमानस्योत्पत्तिर्यत्र तु यस्य सप्रसिद्धस्तयोः समवायादिना विशिष्टबुद्धिस्थले प्रसि ४
द्धसंबंधावच्छेदेन समवायत्वादिकमेव ज्ञायते सर्वत्रैव वा भ्रमस्थले रजतत्वादिधर्म एव ज्ञायत इत्येव कुतो नोच्यत इति वाच्यं अपूर्वस्य समवाय॰

त्वादेः रजतत्वादेर्वा धर्मस्योत्पत्त्यंगीकारे पूर्वानुभूतसमवायत्वादिना विशिष्टसंबंधेन रजतादिविशेषणविशिष्टपूर्वानुभूतरजतत्वादिविशिष्टबुद्धे
ताः भ्रमस्थले प्रवृत्त्यनुपपत्तेः सामान्यविशेषसमवायानां तु समवायादिना दोषकार्यत्वेपि न क्षतिः तेन संबंधेन तदुत्पत्तौ कारणांतरस्याकल्पनेते
न बाधकाभावात् अथावच्छेदकतासंबंधेन समवायादिसंबंधेन वा रजतादेरुत्पत्त्यंगीकारेपि इदं रजतमित्यादिभ्रमज्ञानीयविषयतानामवच्छेद्या
वच्छेदकाभावे किं नियामकमिति चेत् इदंत्वाद्यवच्छिन्नविशेष्यतानिरूपिततादात्म्यादिसंसर्गतानिरूपितरजतत्वाद्यवच्छिन्नप्रकारताशालिचा
क्षुषादौ तादृशविशेष्यतानिरूपितरजतत्वाद्यवच्छिन्नप्रतियोगिताकभेदत्वाद्यवच्छिन्नप्रकारताशालिनिश्चयरूपबाधाभावस्यैव नियामकत्व
थनिर्द्धर्मितावच्छेदकं भ्रमस्थले बाधाभावस्य न नियामकत्वं धर्मितावच्छेदकांतर्भावेनैव तस्य तथात्वादिति चेत् का क्षतिः विशेषणज्ञानसन्निक
र्षादेरेव तत्र नियामकत्वसंभवात् न च समवायेन द्रव्यगुणकर्मणां द्रव्यगुणकर्मसु भ्रमस्थले द्रव्याद्यनुयोगिकसमवायेऽवच्छेदकतासंबंधेनो
त्पद्यमानद्रव्यादिप्रतियोगिकत्वाभावेन तस्य तत्संबंधतया भानानुपपत्तिरिति वाच्यं तत्प्रतियोगिकत्वाभावेपि बाधकाभावसन्निकर्षादिसाम
ग्रीतः तस्य संबंधतया त्वन्मते इव भानसंभवात् न चावच्छेदकतासंबंधस्याप्युक्तसामग्रीतः उक्तस्थले भानापत्तिरिति वाच्यं उक्तसामग्रीसत्वे त्व
यापि तस्येष्टत्वात् यद्यपि इदं रजतमित्यादौ स्वाप्नभ्रमे संप्रयोगाभावेन बहिर्विषयभानासंभवाद्विषयनिष्ठप्रत्यासत्त्यादोषाणां न हेतु
त्वेन तथापि निद्रायाः तु वैषम्यादिदोषाणां आत्मनिष्ठतयैव हेतुत्वे इदंत्वादिना रजतत्वादिना च समवायेन निरूपकत्वेन वा कार्यत्वमिदमादे
र्भासमानस्वाप्नदेहावच्छिन्नत्वे मानाभावादहमिदंत्वविशिष्टवानित्यादिप्रत्ययापत्तिर्निर्द्धर्मितावच्छेदककेच स्वाप्नभ्रमे तत्तदुत्पादेरेव नियाम

कत्वं तत्तत्पुरुषसमवेतस्य तत्तत्पुरुषनिरूपितस्य वा प्रत्यक्षे तत्तत्पुरुषाणां तत्तत्पुरुषसमवेतविषयकमानसे शक्तिविशेषविशिष्टत्वेन धर्मादे
स्तादात्म्येन प्रतिबंधकत्वेन तदेदृस्य च हेतुत्वात् तेन मानसे प्रत्यक्षे संप्रयोगहेतुत्वानंगीकारेपि न क्षतिः॥ पूर्वपूर्वस्याप्यादेतुत्तरोत्तरस्वाप्नहेतु
त्वान्न युगपदेव तत्तद्विषयाणां स्वाप्नभ्रमः॥ ननु मानसप्रत्यक्षे धर्मादिभेदस्यैव विशेषकारणत्वाच्चाक्षुषभ्रमविषयरजतादावपि मानसा
पत्तिरिति चेन्न इष्टत्वात् परामृपगतस्य चाक्षुषमानसादिविषयत्वातो मिथो विरोधस्य निःप्रमाणकत्वात् किंच रजतादिचाक्षुषादिभ्रमस्थ
लेइदंत्वादिविशिष्टधर्म्यादिविषयकं चाक्षुषादिकं पूर्वसिद्धमस्ति तथा च तत्संबद्धतया रजतादिविषयस्यैवोत्पत्तिर्दृष्टा तन्मगत पूर्वसिद्धरजतादि
संबद्धतया चाक्षुषादेर्वोत्पत्तिरित्यत्र विनिगमकाभावेन रजतादेरुत्पत्तिक्षणेपि चाक्षुषादिविषयत्वसंभवः॥ न च विनष्टपदवस्थैन धर्म्यादि
चाक्षुषादिना जनितभ्रमस्थले तदसंभव इति वाच्यं तत्रापि तादृशचाक्षुषाद्युत्पत्तिक्षणे तदुत्तरक्षणे वा तादृशचाक्षुषाद्यंतरस्योत्पत्तिसंभ
वेन तत्रैव रजताद्युत्पत्तिसंभवात् गुडादेस्तिक्तरसादेर्गगनादेर्नैल्यादेर्भ्रमस्थले च यद्यपि गुडादिगोचररासनचाक्षुषाद्यसंभवस्तथापि र
सनागतजलादिरसरासनादेर्गगनगतालोकादिचाक्षुषादेश्च सत्वात्तत्रैवोपनीतगुडगगनादिविषयके तिक्तरसनैल्याद्युत्पत्तिः संभवत्येव
न चैवं विषयनिष्ठदोषस्य चाक्षुषादिगतपरंपरासंबंधेन हेतुत्वं विषयितया रजतादेः॥ कार्यत्वं वाच्यं तथा च गौरवमिति चेन्न रजतादिप्र राम
कारतानिरूपितसंसर्गतानिरूपितविशेष्यतासंबंधेन तत्पुरुषीयचाक्षुषत्वादिना कार्यत्वोपेक्षया स्वप्रकारतानिरूपितसंसर्गतानिरूपिता ५
यात्तत्पुरुषीयचाक्षुषविशेष्यतात्तसंबंधेन रजतत्वादिना कार्यत्वे गौरवात् न च तत्तत्पुरुषचाक्षुषनिरूपितत्वस्य संबंधघटकत्वेन प्रकारतासंस
र्गतयोर्विशेषणतया तन्निवेशमादाय विनिगमनाविरहेण कार्यकारणभावत्रयापत्या गौरवात् तत्पुरुषचाक्षुषत्वेन संबंधघटकं किंतु कार्य

तावच्छेदकमेवेति वाच्यं तत्तुत्तुत्वचाक्षुषत्वादिनाकार्यताभ्युपगमेपि तत्तुत्तुत्वचाक्षुषनिरूपितप्रकारतादिघटितप्रत्येकसंबंधमादायरजत
त्वादिनाकार्यत्वानुक्तौ गुरुत्वभावात् नच तत्तुत्तुथीयचाक्षुषनिरूपितविषयतांतरनिष्ठायाप्रकारतातस्याएवसंबंधघटकत्वंवाच्यमन्यथा
रजतादौपूर्वंतत्तुत्तुथीयचक्षुरादिसन्निकर्षंविनातत्तुत्तुथीयचाक्षुषप्रकारत्वासंभवेनस्वनिष्ठतादृशप्रकारताघटितसंबंधेनरजताद्यु
त्पत्त्यसंभवात् विषयतांतरनिष्ठप्रकारतायाश्चरजतादिप्रकारतातोभेदस्यावश्यकः तदवच्छेदकरजतत्वादिधर्मतादात्म्यसंबंधानवच्छिन्न
त्वात् तथाच विषयतांतरनिष्ठायारजतादिसंबंधघटकत्वासंभवइति वाच्यं अवच्छेदकभेदेनप्रकारतायाभेदानभ्युपगमेनैकस्याएवप्रकार
तायानानाधर्मसंबंधनिष्ठावच्छेदकतानिरूपकत्वसंभवात् नचैवंरजतमित्यादिभ्रमस्थलेरजतत्वादिनेदंत्वादिप्रकारइतिव्यपदेशापत्तिरि
ति वाच्यं इदंत्वादिनिष्ठप्रकारतायारजतत्वादिनिष्ठावच्छेदकतानिरूपकतावच्छेदकत्वस्यैकव्यपदेशाविषयस्यानभ्युपगमात् किंवावच्छेद
कभेदेनप्रकारताभेदेपि यथासमवायनानात्वपक्षेस्वसमवायस्यघटादौपूर्वमसिद्धत्वेपि अवयवरूपादिकारणबलादेवस्वसमवायिघटादि
समवायित्वसंबंधेनरूपादिकंकपालादौजायतेतथास्वप्रकारकचाक्षुषादेः पूर्वमसिद्धत्वेपिदोषादिकारणबलात्स्वप्रकारकचाक्षुषादिवि
शेष्यत्वसंबंधेनरजतादिरुत्पन्नोबाधकाभावः अथवाविषयनिष्ठस्यदोषस्यस्वाश्रयविशेष्यतानिरूपितसंसर्गतात्वसंबंधेनस्वाश्रयनि
ष्ठविशेष्यतात्वसंबंधेनवाहेतुत्वं तत्तुत्तुत्वचाक्षुषनिरूपितस्वप्रकारतानिरूपितत्वसंबंधेनतादृशनिरूपितत्ववत्संसर्गतानिरूपितत्वसंबंधे ६२
नवारजतत्वादिनाकार्यता ननुप्रकारतायांरजतत्वाद्यवच्छिन्नत्वमपिनिवेश्यअन्यथातन्नियमासिद्धापत्तेः तथाचरजतत्वादेर्द्वयानिवेशे

गौरवमिति चेन्न अन्यावच्छिन्नप्रकारतया रजतत्वावच्छिन्नं प्रतिसंबंधत्वाभावे न तन्निवेशप्रयोजना भावात् तस्य बाधाभावादिनियम्यत्वाद्य यद्वा
स्वलौकिकविषयताशालितत्तृतीयवाक्यार्थविशेष्यत्वसंबंधेनैव रजतत्वादिना विषयदोषकार्यत्वं रजतादिप्रकारतया इदंत्वाद्यवच्छिन्नविशे
ष्यतानिरूपकत्वादिकं तु बाधाभावादिनियम्यं आत्मनिष्ठप्रत्यासत्त्या दोषस्य कारणत्वे वाक्यार्थादिसमवायेन स्ववाक्यार्थादिना वा संबंधेन रजत
त्वादिनैव कार्यत्वसंभवः एवमारोप्यमाणरजतादिव्यधिकरणशुक्तीदंत्वाद्यवच्छिन्नविशेष्यताकभ्रमस्थले बाधाभावकार्यत्वमपि रजत
त्वादिनैवेति ततोऽप्यनिर्वचनीयख्यातिसिद्धिः तथाहि इदंत्वाद्यवच्छिन्नविशेष्यतानिरूपिततादात्म्यादिसंसर्गतानिरूपितरजतत्वाद्यवच्छि
न्नप्रकारताकवाक्यार्थादिना समवायेन बाधाभावजन्यत्वं वाच्यं तथा च तादृशसंसर्गतानिरूपितस्वप्रकारताशालिवाक्यार्थसमवायसंबंधेन तता
दृशवाक्यार्थसंबंधेन वा रजतत्वादिनैव तदुच्यतां रजतत्वाद्यवच्छिन्नत्वस्य वाक्यार्थीयसमवायस्य चानिवेशेन लाघवात् न तु पुरुषापेक्षया धर्मि
तावच्छेदकानामनंतत्वेन धर्मितावच्छेदकमनिवेश्य तत्तत्तृतीयवाक्यार्थत्वादिना रजतत्वाद्यवच्छिन्नप्रकारतानिरूपिततादात्म्यादिसंसर्गता
पित निरूपितविशेष्यतावच्छेदकत्वसंबंधेन स्वीयविशेष्यताविशेषावच्छेदकत्वसंबंधावच्छिन्नप्रतियोगिताकबाधाभावजन्यत्वांगीकारात् तत्तृ
तीयवाक्यार्थादिनिरूपितस्वप्रकारतानिरूपितसंसर्गतानिरूपितविशेष्यतावच्छेदकत्वसंबंधेन रजतत्वेनोक्तजन्यत्वांगीकारे रजतग राम
तेदंत्वद्रव्यत्वादावपि उक्तसंबंधेन रजतादेरुत्पत्त्यापत्तेः ग्रहापत्तेर्गौरवात् बाधाभावजन्यता रजतत्वादिना वक्तुमशक्येति चेन्न धर्मि ६
तावच्छेदकस्यैव संसर्गतावच्छेदकस्यापि संयोगसमवायतत्संयोगत्वादिभेदेन पुरुषापेक्षयानंत्यादुक्तविशेष्यतावच्छेदकत्वसंबंधे

नैवेदंत्वावच्छिन्नविशेष्यतानिरूपितासती रजतत्वावच्छिन्नप्रकारतानिरूपिताया संसर्गतातदवच्छेदकत्वसंबंधेनापि विनिगमनावि
रहेण तत्पुरुषीयवाक्यत्वादिनोक्तकार्यत्वस्य वाच्यतया तदपेक्षया लाघवेन तत्पुरुषीयवाक्यत्वादिनिरूपिते इदंत्वावच्छिन्नविशेष्यतानि
रूपितायास्त्वप्रकारतानिरूपितसंसर्गतातदवच्छेदकत्वसंबंधेन रजतत्वादिनैवोक्तकार्यत्वस्य युक्तत्वात् भक्तिगतेदंत्वस्यैवानिवेशाद्रजत
गतेदंत्वादौ रजतावृत्तित्वेनानापत्तिः किंच पुरुषापेक्षया धर्मितावच्छेदकानामानंत्येपि यावन्नधर्मान्धर्मितावच्छेदकीकृत्य कदापि कस्यापि न
बाधबुद्धित्वेन तदभावेन बाधाभावकारणत्वस्यैवानंगीकाराद्धर्मितावच्छेदकनिवेशपक्षे गौरवं प्रत्युत तत्तत्पुरुषनिवेशपक्षे एव गौरवं स पि०५
कलपुरुषाणामेवेहजन्मनि जन्मांतरे वा बाधबुद्ध्यवतारस्यावश्यकत्वात् नच प्रमेयवत्त्वं रजतमित्यादिबाधबुद्धौ धर्ममात्रस्यैव धर्मिता
वच्छेदकीकरणात्सर्वत्रैव धर्मितावच्छेदकतया बाधबुद्ध्यवतारस्यावश्यक इति वाच्यं उक्तबाधबुद्धिस्थले प्रमेयत्वावच्छिन्नावच्छेदकतानि
रूपितविशेष्यतानिवेशेन हेतुतादृशावकल्पनेनैव सकलधर्मनिवेशाभावेन धर्मितावच्छेदकनिवेशपक्षे गौरवाभावात् धर्मितावच्छेदकनि
वेशपक्षेपि एकधर्मावच्छिन्नतादृशावच्छेदकसंबंधेन बाधबुद्धिसत्त्वेप्यन्यधर्मावच्छिन्नतादृशावच्छेदकत्वसंबंधेन विशिष्टबुद्ध्युदयात्
न्निरवच्छिन्नतादृशावच्छेदकत्वसंबंधमादाय इदं न रजतमित्यादावेको हेतुतादृशोऽन्यस्तु तादृशावच्छेदकतावच्छेदकत्वादिसंबंधेन
प्रमेयवन्न रजतमित्यादौ कल्पनीयस्तथा च निरवच्छिन्नतादृशावच्छेदकत्वमादाय हेतुतास्थले स्वल्पतरतत्तदिदंत्वादिधर्मनिष्ठानव
च्छिन्नावच्छेदकतानिरूपकविशेष्यतांतर्भावेण हेतुत्वापेक्षया बहुतरतत्तत्पुरुषघटितत्वेनानिरवच्छिन्नविशेष्यतावच्छेदकत्वसंबंधे

नहितुलायामेवगौरवाच्च अपिचपित्रादिदेहोत्कर्षापकर्षयोः सतोः अंशत्वादेहेप्रीतिमात्युत्कर्षापकर्षदर्शनात्पित्रादिजन्यमेवांशत्वंप्रीतिमा
दिकेनाच्यं कार्योत्कर्षापकर्षयोः कारणोत्कर्षापकर्षाभ्यामेवदर्शनात् पित्रादिस्थप्रीतिमादेरनुभूयमानस्यांशे पोत्पत्त्यंगीकारेवाध
कस्याभावात् पुरुषांतरेणापिपित्रप्रीतिमादेर्ग्रहणापत्त्या पुत्रत्वमात्रे अंशत्वेवलाघवेनतस्यातीन्द्रियत्वकल्पनाच्च किंचसत्त्वस्याभावादित्या
दिनाव्यावहारिकप्रपंचस्यसृष्टिमुक्त्वासत्यंचानृतंचसत्यमभवत् इति तैत्तिरीयकश्रुतौव्यावहारिकसत्यत्वांशेनव्यावहारिकसृष्टिमनूद्या परसत्य
नृतत्वादितप्रातिभासिकरूपेणासत्यत्वादितपारमार्थिकसत्त्वस्यब्रह्मणोभवनोक्तेर्व्यावहारिकरजतादिविलक्षणंप्रातिभासिकंरज
तादिकंजायतइत्यवश्यंवाच्यं प्राणावैसत्यमित्यादिश्रुतौव्यावहारिकेसत्यपदप्रयोगात् व्यावहारिकसत्यपदसमभिव्याहृतानृतप
दस्यव्यावहारिकविपरीतप्रातिभासिकार्थकत्वावश्यकत्वात् अन्यथासत्यानृतवाक्यादेर्व्यावहारिकस्यसृष्टेः पूर्वमेवसत्त्वस्याभ
वादित्यादिनोक्तत्वात् शब्दात्मकवाक्यस्यगुणाभूतत्वेनभूतात्मकत्वात् भूतसृष्ट्युत्तरमेवसृष्ट्युक्तिसंभवात् अन्यथानृतादेरपिसृष्ट्युत्त्याप
तस्मर्त्ति ४ त्तेरेतद्वाक्यंव्यर्थमेवस्यात् भ्रमस्थलेरजतादिकंजायतइत्यवश्यंवाच्यं ननुशुक्त्यादौरजतरंगादिनानाप्रकाराणांभ्रमस्थलेबहूनामपू
र्वरजतादिव्यक्तीनामुत्पत्तिकल्पनेगौरवादन्यथाख्यातिरेवयुक्तेतिचेत् न अन्यथाख्यातिमतेपिएकस्मिन्धर्मिणिरजतादेर्युगपदुत्प राम
त्त्यविनश्यतांबहूनांनानापुरुषीयाणांभ्रमाणांकल्पनेगौरवात् अस्मन्मतेतत्रैकस्याएवरजतादिव्यक्तेः तत्तत्पुरुषीयसाक्षिताप ७
त्म्यशुक्त्याद्यवच्छिन्नचैतन्यभास्यत्वोपपत्तेः नचतत्तदंतःकरणावच्छेदेनचैतन्यगतनत्तदविद्यायाः परिणामस्यरजतादेरैक्यानुपप

घ२

त्तिरितिवाच्यं एकस्या एवाविद्यायास्तत्रतत्रदंतथकल्पनावच्छेदेनसंभवात् नानाविद्याभिरप्येकशुक्त्यवच्छिन्नचिन्निष्ठाभिरेकरजतादिजननसं
भवात्तत्परिणामस्याप्यैक्यसंभवात् किंच प्रथमं वृत्तौ कयुक्तिभिर्भ्रमविषयस्योत्पत्त्यावश्यकत्वे व्यक्तिकल्पनागौरवस्य वरं फलमुख स्प२
त्वेनादोषत्वमन्यथानुमितौ विशिष्टज्ञानत्वेन हेतुताकल्पने ज्ञानद्वयोत्तरं विशिष्टज्ञानव्यक्तीनां कल्पने परेषां गौरवं स्यात् एतेन रजतादेरु
त्पत्त्यनंतरं तस्य बाधकाद्युत्पत्त्यभ्युपगमपक्षे ऽविद्यावृत्तिकल्पनपक्षे चोभयोत्पत्तिकल्पने गौरवमित्यादिकं परास्तं अस्मदभ्युपगतरज
ताद्युत्पत्तिक्षणाद्व्यवहितोत्तरक्षणेपि बाधकस्याभ्युपगमाच्च सामग्रीसत्वे कार्योत्पत्तेर्दुर्निवारत्वात् न च रजतादेरुत्पत्त्यनंतरमपि पुनस्तस्यो
त्पत्त्यापत्तिरितिवाच्यं घटादिमति कपालादौ घटाद्युत्तरस्येव रजतादिमत्यज्ञाने रजताद्युत्तरोत्पत्त्यसंभवात् यत्र रजतादिभ्रमोत्तरं रंगादि
भ्रमोत्तरं पुना रजतादिभ्रमः तत्र रंगादिभ्रमसामग्र्या एव पूर्वजातरजतादिभ्रमविनाशकत्वांगीकाराद्द्वितीयभ्रमरजतादिभ्रमस्याज्ञानोत्तरोत्पाद
नकत्वाद्यनुपपत्त्यभावात् किंच तद्रूपद्वयस्थानामेव दोषाणां शक्तिविशेषेणाकारणतास्वीकारे रजतादिसत्वे रजताद्युत्तरस्योत्पत्त्यनापत्ते
श्च परमते बाधकाद्यादिसाधारणस्य अनुभवसिद्धत्वेन तथा वक्तुमशक्यत्वात् पराभ्युपगतानुव्यवसायोत्पत्त्यादेरस्मदनभ्युपगतत्वस्य वक्ष्य
माणत्वेन परेषामेव महागौरवात् एतेन द्रव्यगुणकर्मणां तदुत्पत्तिप्रतिबंधकत्वेपि सामान्यादिभ्रमस्थले पुनरपि सामान्याद्युत्पत्तिप्र
संगः सामान्याद्यपि तदुत्पत्तिप्रतिबंधकत्वकल्पने महागौरवमन्यथाख्यातिमते तस्याकृतत्वादित्यादिकं परास्तं वस्तुतस्तु सामग्रीम
त्क्षणोत्तरक्षणत्वं कार्येणाव्याप्यं न तु तदुत्पत्त्यापि अथवा कार्यतावच्छेदकसंबंधेन कार्यवद्देशावच्छेदेन कार्याधिकरणीभूतो यस्तद
न्यो यः सामग्रीमान् क्षणस्तदुत्तरक्षणत्वमेव कार्योत्पत्तिव्याप्यं किंच तद्रूपद्रव्यस्य कार्यतावच्छेदकावच्छिन्नाधिकरणस्य सामग्रीक्षण

स्योत्तरक्षणे कार्यतावच्छेदकावच्छिन्नस्योत्पत्त्यनभ्युपगमेपि न क्षतिः॥ कार्यतावच्छेदोत्पत्तिर्द्वितीयादिक्षणएवकार्योत्पत्तिसंभवात् धारावाहिक
ज्ञानस्थले द्विक्षणमात्रव्यवधानस्वीकारात् तत्त्वोक्तप्रतिबंधकत्वादिकल्पने गौरवादेवं च रजतादेरिव तत्त्वाकारवृत्तेस्तज्जातीयसत्वे पुनरुत्प
त्त्यनभ्युपगमेन परेषां गौरवाभावेप्यनिर्वचनीयवादे शुक्तीनामुक्तत्वाद् दृश्यमानत्वाद्रजताद्यपूर्वव्यक्तिकल्पनागौरवमधिकं चित्करमिति ध्ये
यं॥ किं वा नावृतचैतन्यतादात्म्यादेवापरोक्षत्वसंभवेन लौकिकविषयतायामेव मानाभावात् तस्यास्त्वन्मते दोषनियम्यत्वं वंध्यापुत्रोत्सवायमानं नच
प्रत्यक्षमनोवृत्तिविषयत्वस्य पूर्वोक्तरीत्या लौकिकालौकिकत्वभेदाभावेपि तन्मात्रस्यैवापरोक्षतारूपत्वसंभवे अनावृतचैतन्यतादात्म्यस्य तत्कल्पन
मप्यसिद्धमिति वाच्यं वृत्तिं विनापि वृत्तिसुखादावनावृतचैतन्यतादात्म्यादेवापरोक्षत्वसंभवेन लौकिकविषयतायामेव मानाभावात् संबंधेने
वापरोक्षताव्यवहारात् तेनैव सर्वत्र व्यवहारसंभवे वृत्तिविषयत्वस्य तद्रूपत्वाकल्पनात् अथ वृत्तिज्ञानसुखादावपि वृत्तिज्ञानस्योत्पत्तिः क
ल्प्यत इति चेन्न अतितरामधीरसि यतः श्रुतियुक्तिभिरात्मनः स्वप्रकाशानुभवत्वे सिद्धे तेनैवानावृतचिद्रूपेण सकलदृश्यानुस्यूतेनैकेन वृत्ति
ज्ञानसुखादिषु साक्षात्करोमीत्यादिव्यवहारसंभवे तेषूत्पत्तिं विना ज्ञानान्तरस्यानवृत्तितत्सामग्र्यादि कल्पयसि अत यस्तावदयमात्माऽस्म
सर्वानुभूः अत्रायं पुरुषः स्वयंज्योतिर्भवति येनेदं सर्वं विजानाति तं केन विजानीयात् यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः कतरः स आत्मा
येन वा पश्यति येन वा शृणोति येन वा गंधानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चास्वादु च विजानाति यन्मनसा न मनुते येनाहुर्मनो मतं राम
स्वप्रकाशो महानंदमात्मैवैतत्सर्वस्य द्रष्टा सर्वसाक्षी साक्षी चेता केवलो निर्गुणश्च तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति न दृष्टे ८
र्द्रष्टारं पश्येः अदृष्टो द्रष्टा नान्योतोस्ति द्रष्टा इत्याद्याः॥ श्रुतयश्चात्मनोनुभवात्मत्वे दृश्यत्वापत्त्या विनाशित्वमिथ्यात्वाद्यापत्तिः॥ कुमतिना

परिच्छिन्नात्मस्वरूपत्वे संभवत्यात्मधर्मतया अनंतकोट्यनुभवव्यक्तिकल्पने गौरवं आत्मनः प्रकाशांतराभ्युपगमे तस्यापि प्रकाशांतरमभ्युपेयमन्य
था प्रकाशासंबद्धस्य तस्य ग्राह्याविज्ञायमानत्वादसिद्ध्यापत्तिः प्रमेयत्वादिना कालांतरीणानुमानादिविषयत्वेपि तत्र तद्विषयकत्वेन तत्र तद्विषयभि
न्नत्वेन च तदसिद्धितादवस्थ्यं सर्वज्ञानं स्वविषयभिन्नमित्याद्यनुमानस्य संभवेपि तेनात्मनोन्यानुभवासिद्धिः आत्मान्यानुभववृक्षत्वे वाश्रयासि
द्ध्यापत्तिः तत्कालीनप्रत्यक्षप्रकाशांतराभ्युपगमेपि तथैव प्रकाशांतराणि वा व्यानीत्य नवस्थानिरवधि प्रकाशधारायानित्वाभ्युपगमेऽन
नुभवपराहतिर्जन्यत्वाभ्युपगमे संज्ञायविपर्ययापत्तिः यत्क्षणे आत्मनिश्चयो न जातस्तत्क्षणे देहोतःकरणादिर्वात्मनः संज्ञायाप घा
त्तिसंभवात् नहि तत्संज्ञयादिकं कस्यचिदनुभविकं तदुक्तं टीकादौ न हि जातु कश्चित्संदिग्धे अहमहं वेति वा न विपर्यस्यति नाहमेवेति नचो
क्तसंशयादिकं देहादावात्मत्वविशिष्टस्य वाच्यं तस्य च न प्रकाशत्वं सिद्धं तेपीति वाच्यं स्फुरणमात्ररूपस्य शुद्धात्मन एवोक्तसंशयादि
विषयत्वेनापादनात् देहादि स्फुरति न वा स्फुरतीति वा अयं घटो न वेत्यादि शुद्धघटत्वादिसंशयादिवत् अथ स्फुरणस्यानादृतचिद्रूप शानाप
स्यैव देहादौ सत्वेनोक्तसंशये हेतुत्वेन दोषाभावान्मम कॢप्तत्वेन च देहादि स्फुरणवत् प्रकाशज्ञानादिकार्यस्योक्तसंशयादेर्नोपपत्तिसंभवः अत ए
व पुस्तुबांतरीये देहादौ घटादौ च चैतन्यस्याज्ञानावृतत्वादिसत्वेन तत्र तादृशसंशयादि जायत एवेति चेन्न ईदृक्स्फुरणे ज्ञानांतरांगीकारे
र्व्यर्थ एवावरणमित्यर्थमेव ज्ञानांतरस्याभ्युपगमात् अथ व्यवहारार्थं स्फुरणे ज्ञानांतरमावश्यकमिति चेन्न स्फुरणतादात्म्येनैवा
त्मस्य च स्फुरणस्यापि व्यवहारादिसंभवात् व्यवहारादिमात्रे प्रति स्फुरणतादात्म्यस्यैव प्रयोजकत्वात् तस्मात् स्फुरणस्य व्यवहारादिकं

संशयविपर्ययाद्यविषयत्वं च स्वातिरिक्तानपेक्षमिति स्वतःसिद्धत्वमित्याद्याश्रयात्मतः स्वप्रज्ञानुभवरूपत्वं व्यवस्थापयंति ननु स्फुरणतादा
त्म्यस्यैवापरोक्षतारूपत्वे चाक्षुषादिवृत्त्यनुत्पत्तिदशायामपि भुक्तित्वादेः साक्षात्करोमीति व्यवहारादिः स्यात् न च जीवचैतन्येन भुक्तित्वादेरा
ध्यासिकतादात्म्याभावात्तदानन्तथाव्यवहारादिकं चाक्षुषादिवृत्त्युत्पादे तु भुक्तित्वाद्यवच्छिन्नचैतन्येन निर्गतांतःकरणपरिणामचाक्षुषाद्यव
च्छिन्नस्य जीवचैतन्यस्यैक्यात्तदुत्पत्त इति वाच्यं अविद्योपहितचैतन्यस्यैव जीवत्वे तस्यैव सर्वकार्योपादानत्वे चाक्षुषादिवृत्त्यवच्छेदं विना
पि अंतःकरणादिभिरिव भुक्तित्वादिविषयमात्रेणाध्यासिकतादात्म्यस्य सहजत्वादिति चेन्न अविद्योपहितचैतन्यस्य जीवत्वजन्यमात्रो
पादानत्वपक्षेपि सुखादाविव भुक्तित्वादौ चाक्षुषाद्यनुत्पत्तिकाले साक्षात्करोमीति व्यवहारादर्शनादेवावरकाज्ञानकल्पनादतावत्तचैत
न्य तादात्म्यस्यापरोक्षतारूपत्वे बाधकाभावात् यदि त्वंतःकरणोपहितचैतन्यमेव जीवः अविद्योपहितचैतन्यस्यैव वा जीवत्वे न तस्य सकलका चैत०
र्योपादानत्वं किंतु ब्रह्मणस्तदा तु जीवचैतन्यस्य भुक्तित्वादिवहिर्विषयेणाध्यासिकतादात्म्यसंबंधस्यैवाभावाच्चाक्षुषाद्यभावकाले न तथा
व्यवहारादिकं न च भुक्तित्वाद्याकारकचाक्षुषादिवृत्त्युत्पादेपि इदंत्वाद्याकारकचाक्षुषादिकाले भुक्तित्वाद्यवच्छिन्नचैतन्येन जीवचैतन्यस्यै
क्यसंभवात् भुक्तित्वादेः साक्षात्करोमीति व्यवहारादिः स्यादिति वाच्यं अंतःकरणावच्छेदतदभावकृतभेदनिवृत्तिरूपस्यैक्यस्य संभवेपि भु राम
क्तित्वाद्याकारकवृत्तिं विना तदवच्छेदेन तदधिष्ठानब्रह्मचैतन्यावरकाज्ञानसत्त्वात् भुक्तित्वमिह नास्ति न भाति भुक्तित्वमेवेदं न जानामीति व्य ९
वहारात् अनावृतचैतन्यसंबंधस्यैव साक्षात्करोमीत्यभिलापप्रवृत्त्यादिकार्यप्रयोजकत्वादावृतचैतन्यसंबंधस्य पराभ्युपगतनिर्विकल्पक

स्थानीयत्वात् न च वाक्यार्थादेः शुक्तित्वाद्यनुल्लेखेऽपि तदधिष्ठानब्रह्मचैतन्यस्य तज्ज्ञानेन न तत्त्वसाक्षात्कारपूर्वमावृतत्वमेवेति कथं शुक्तित्वापरोक्ष
त्वेति वाच्यं आवरणानवच्छेदकत्वरूपानावृतत्वस्य चित्संबंधविशेषणत्वात् शुक्तित्वादेर्वाक्यार्थादिकाले शुक्तित्वादितदधिष्ठानचितोः संबं
धस्यावरणानवच्छेदकत्वात् तस्माज्जन्यमात्रे जीवस्योपादानत्वे शुक्तित्वादिभिन्नजीवस्याध्यासिकोपनागसत्वेप्यावरणाभिभवार्थं ब्रह्म
ण उपादानत्वे तत्कोपरागार्थमावरणाभिभवार्थं च वाक्यार्थादिवृत्तिरिति तदभावकाले शुक्तित्वादेर्न साक्षात्काराभिलापप्रवृत्त्याद्यो
पत्तिः ८ वृत्तिज्ञानस्यावरकाज्ञानं प्रत्यभिभावकत्वं तु तन्नाशाजनकत्वं परेषां प्रतियोगिनः स्वप्रागभावनिवृत्तिजनकत्वपक्षवत् तन्ना
शरूपत्वं वा परेषां तस्य स्वप्रागभावनिवृत्तिरूपत्वपक्षवत् [illegible]वत् प्रतियोगिनो ध्वंससमये प्रागभावध्वंसानुवृत्तिवत् वृत्तिज्ञा
न ध्वंससमयेऽप्यज्ञानध्वंसानुवृत्तिसंभवादेतेनाज्ञानवृत्तिज्ञानयोः समानाकारतामात्रेणानाश्यनाशकभावांगीकारे स्यार्थान शुक्तित्वादि
प्रत्यक्षेण वाक्यार्थजनितादिभ्रमहेत्वज्ञानस्य निवृत्तिः स्यात् दृश्यते हि तेन तदनिवृत्तिः वाक्यार्थत्वादिना वाक्यार्थादिभ्रमहेत्वज्ञानत्वेन त
दंगीकारे तु गौरवमज्ञानवृत्तिज्ञानयोर्नाश्यनाशकभावं कल्पयित्वानावृतचैतन्यसंबंधस्य सकलापरोक्षतात्वकल्पनापेक्षयावहिर्
र्थे वाक्यार्थादिवृत्तेरंतरार्थे वानावृतचैतन्यस्यापरोक्षतात्वमित्येव कल्पनं युक्तमित्यादि कुबोधमपास्तं परेषां ज्ञानप्रागभावकारि
वास्माकमज्ञानवृत्तिज्ञानयोर्नाश्यनाशकभावांगीकारात् यादृग्वृत्तिज्ञानेन यादृशाज्ञानस्य वस्तुतो नाशस्तत्प्रागभावत्वं तत्रैवां
गीकृत्य स्वप्रागभावत्वे कालिकसंबंधावच्छिन्नाधेयत्वं चेत्तुभयसंबंधेन प्रमात्वेन कारणता अज्ञानवृत्तिप्रतियोगितासंबंधेन नाश्या

त्वेन कार्यतेत्यंगीकारसंभवात् प्रमात्वं च ज्ञानित्वविशेषः प्रमिनोमीत्याद्यनुभवसिद्धः ॥ न चाज्ञानस्य प्रागभावरूपत्वे भावाभावविलक्षणत्व
चैतन्यविषयकत्वादिसिद्धांतव्याघात इति वाच्यं परैर्ज्ञानस्य भावस्यापि ध्वंसप्रागभावत्वसविषयकत्वादिवत् भावाभावविलक्षणा
सविषयकत्वादिसत्वेपि प्रागभावत्वाविरोधात् प्रागभावेतरस्याप्रामाणिकत्वेप्यज्ञानस्य तत्र प्रमाप्रागभावत्वस्यैवोक्तवक्ष्यमाणत
र्कसहकृतप्रमाणगम्यत्वेनावश्यकत्वाच्च ननु घटज्ञानमेकमेव न तु मूलाज्ञानादखंडानंदावरकादन्यानि घटाद्यवच्छिन्नान्यज्ञाना
नि घटादिप्रमानिवर्त्यानीत्युपेयते तदा घटाद्याकारकप्रमयैव ज्ञाननिवृत्तिरूपो मोक्षः स्यादिति चेन्न एकाज्ञानपक्षे प्रमाविरहवि
शिष्टं यद्ज्ञानविषयतावच्छेदकत्वं तदभावविशिष्टस्यैव चैतन्यसंबंधस्यापरोक्षतारूपत्वात् प्रमाया अविद्याभिभावकत्वमुच्यते ता
दृशाभाववैशिष्ट्यं च सुखादिचितोः संबंधे सहजाज्ञानविषयतानवच्छेदकत्वात् घटादिचितोः संबंधे तु तन्निष्ठाज्ञानविषयतावच्छेदक
त्वस्य सत्त्वविशिष्टत्वात् न च चाक्षुषादिप्रमाविरहाद्यनुपस्थितावपि सुखादौ साक्षात्करोमीत्यादिव्यवहारात् कथमुक्तरूपा सर्वत्राप
रोक्षतेति वाच्यं उक्ताभावावच्छेदकतासंबंधेनाज्ञानाभाववैशिष्ट्यनिवेशात्संबंधानुपस्थितावपि क्षतिविरहात् प्रमाविरहवैशिष्ट्यं तु स्वसमानाधि
करणस्वविषयतावन्निरूपितत्वसंबंधेन स्वावच्छेदकत्वसंबंधेन वावच्छिन्नप्रतियोगिताकप्रमाविरहस्य सामानाधिकरण्यरूपं घटादि राम
चाक्षुषादिप्रमाकाले तु तस्यानिर्गमेन स्वसमानाधिकरणस्वाकारत्वसंबंधविशेषरूपविषयत्वस्य घटादौ स्वीकारात् घटादिचित्सं १०
बंधावच्छेदेनाज्ञानविषयत्वस्यैव प्रमाया अपि विदाश्रितत्वांगीकारात् घटादिचित्संबंधनिष्ठमज्ञानविषयतावच्छेदकत्वं नोक्तसा

मानाधिकरण्यवत् प्रमावच्छेदकत्वासमानाधिकरणं यत्स्वविषयतावच्छेदकत्वं तेन संबंधेनाज्ञानस्य योभावस्तद्विशिष्टचित्तादात्म्यमपरोक्षतेति
तु निष्कर्षः॥ अथवाज्ञाननानात्वपक्षे चिन्निष्ठस्य तद्विषयत्वस्यानादित्वेपि घटादिचित्संबंधे तदवच्छेदकत्वं कालविशेषावच्छेदेनैव यथा स्वीक्रि
यतेऽन्यथा प्रमाकालेपि दिनांतरविनष्टस्य तदज्ञानेन घटो नास्ति न भातीति व्यवहारस्यास्ति भातीति व्यवहाराभावस्य चापत्तेः॥ तथा एकाज्ञानपक्षे
पि प्रमातज्जन्योद्बुद्धसंस्कारकालान्यकालावच्छेदेनैव तदुररीक्रियते तथा केवलेन स्वविषयतावच्छेदकत्वसंबंधेनाज्ञानाभावविशिष्टस्य चि
त्संबंधस्यापरोक्षतात्वेपि न क्षतिः॥ एतेनोक्तविशिष्टाभावस्यापरोक्षताघटकत्वे ताद्रूप्येण प्रवृत्त्यादिकारणत्वे गौरवमित्यादिकमुद्धृतं न
च तथाप्यज्ञानत्वावच्छिन्नप्रतियोगिताकाभाववत्चैतन्यसंबंधत्वेन प्रवृत्त्यादौ कारणत्वापेक्षया लौकिकविषयताकप्रत्यक्षत्वेन कारण
त्वे लाघवमिति वाच्यं उक्तसंबंधेनाज्ञानसामान्याभावस्तद्धर्मिकविशिष्टचित्तादात्म्यसंबंधेन घटत्वस्यादिविशिष्टत्वापेक्षया घटत्वस्यादिलौकि
कप्रत्यक्षत्वस्य लघुत्वात् प्रमाणाज्ञानादिसत्त्वेऽज्ञानसत्वेनाऽस्मन्मते तदभावानिवेशेन प्रस्तुतलाघवाच्च किंचैतेन सति भात्यपि शुक्तित्वा
दौ सत्राभानाभिलापस्य प्रवृत्त्यादेश्च प्रतिबंधकत्वेनास्ति न भातीत्यभिलापादिजनकत्वं चाज्ञानस्यावरकत्वमित्युपनिषदेदुच्यते तथाच
तत्कल्पनागौरवापेक्षयांतरविषये साक्षिसंबंधस्यैव हि विषये चाक्षुषादिविषयत्वस्य साक्षात्करोमीत्यभिलापप्रवृत्त्यादिनियामकत्व
मिति वैरूप्यमपि युक्तमित्यादिकं परास्तं अस्ति भातीत्यत्राज्ञानाभावविशिष्टचैतन्यसंबंधस्य व्यवहार्यतया प्रवृत्त्यादिप्रयोजकतया च
अज्ञानसत्वे तदभावेन व्यवहाराद्यसंभवमात्रस्यैवाज्ञानं प्रतिबंधकमिति वाक्यार्थत्वेनाज्ञानस्य तत्प्रतिबंधकत्वाकल्पनान्नास्ति न भातीत्य
त्राज्ञानस्यैवास्तित्वभानविरोधितयाभिलापादिविषयत्वमात्रस्याभिलापादिजनकत्वप्रवादार्थतया तज्जनकत्वकल्पनात् अथाज्ञानाभावे

नैव चेत् भातीति व्यवहारप्रवृत्त्यादिकार्यं स्यात् तर्हि शुक्त्यादेः परोक्षवत्त्वात् तस्मात् यदि च प्रत्यक्षवृत्त्यैव तदंगीक्रियते तदा परोक्षवृत्त्यास्तीति व्यव
हारोपि न स्यादिति चेन्न यतोऽज्ञाने वैजात्यद्वयवत् तत्र चैकप्रमामात्रस्याभिभाव्यतावच्छेदकमन्यत्र प्रत्यक्षप्रमाया एव तत्राद्यवैजात्यविशिष्टज्ञा
नस्याभावविशिष्टचैतन्यमस्तित्वसत्तादिशब्दैर्व्यवह्रियते द्वितीयवैजात्यविशिष्टाज्ञानाभावविशिष्टं तु चैतन्यमस्तित्वसत्तादिभिर्भानस्फू
र्त्यादिभिश्च शब्दैर्व्यवह्रियते प्रवृत्त्यादिकारणं च न चास्तित्वसत्तासामान्यमन्यथा शुक्तित्वमे स्फुरतीत्येवं शुक्तित्वं मेस्तीत्यहंकारावछि
न्नत्वेन चैतन्यरूपमस्तित्वं व्यवह्रियेत देशकालसंबंधित्वं वा अन्यथा इहेदानीमस्तीति नियतदेशकालान्वयो न स्याच्चैतन्यस्य सार्वदिकत्वा
दिति वाच्यं यतः सत्तासामान्यस्यांतात्वेपि शुक्तित्वादिकं मे स्फुरतीतिवत्तन्मेस्तीति व्यवहारः स्यात् अथ मे स्फुरतीत्यत्र स्फुरणे आत्मनेज
न्यतासंबंधो भासते तत्र सत्तायां न भवति समवायादिसंबंधात् तत्स्यैत्विव्याप्तिरिति चेत् तर्हि मन्मतेपि स्फुरणतावच्छेदेनाहंकारावछि भाने॰
न्नत्वे भासते अस्तितात्वावच्छेदेन तु न तत्संभवति परोक्षवृत्तिस्थलीयास्तितायां तदसंभवात् अस्तितात्वसामानाधिकरण्येन तत्ज्ञाने त्विष्टा
पत्तिरिति तु त्वं वक्तास्तितावदकाज्ञाने अहंकारावच्छिन्नत्वान्वयसंभवात् परोक्षधीस्थलेपि मेस्तीति व्यवहारोपपत्तिः भावसामान्यादे
तदभाववत्सत्तासामान्ये नास्तिताव्यवहारासंभवः इदं च सत्तासामान्यं सदित्येकाकारव्यवहारयोर्विषयत्वेन रूपकल्पने मयुक्तं सत्सदित्यनुगतस
[illegible] दाकारव्यवहारस्यानुगतदेशकालसंबंधित्वेनासंभवः चैतन्यातिरिक्तमहादेशकालयोर्मानाभावात् इहेदानीं शुक्तित्वादि राम
कं ना[illegible]स्तीति न भातीत्यत्राप्यज्ञान एव देशकालावच्छिन्नत्वान्वयः शुक्तित्वाद्यवच्छिन्नचिद्विषयताकाज्ञानस्येदंत्वादिविशिष्टदेशकालावच्छिन्नवि ११
षयताकत्वादेरुपपादयिष्यमाणत्वाद् एवं च साक्षिविषयोपरागस्य सहजत्वपक्षेपि प्रत्यक्षवृत्तेर्विषयावच्छिन्नचिदाश्रयताकत्वमावश्यक

उच्चारयितृपुरुषरूपाहमर्थीयो रूपे चैजात्यस्य यद्ज्ञानत्वावच्छिन्नाभावकचै
तन्यस्य सत्ताशब्दार्थत्वात् उक्तव्यवहारो विवादेरूच्चारयितृपुरुषीयो रूपज्ञा
नरूपचित एवास्धात्वर्थत्वस्वीकारात् पुनरुक्तत्वापत्तानमेस्तीतिप्रयोगः ॥

मन्यथा भुक्तित्वादिना तादात्म्यवत्स्फुरणस्याहंकारावच्छिन्नत्वासंभवात् भुक्तित्वादिकं मे स्फुरतीति व्यवहारासंभवात् अथाज्ञानप्रमयोरे कदेशा
वच्छिन्नत्वं विना प्रागभावप्रतियोगिभावासंभवेनाभिभाव्याभिभावकभावासंभवादज्ञानावच्छेदकेनेदंत्वादिविशिष्टेन भुक्त्यादिदेशेनेव भुक्ति
त्वादिप्रमाया अवच्छेदो युक्तो न तु भुक्तित्वादिना तथा च प्रत्यक्षवृत्तिप्रमायाः कथं स्वविषयावच्छिन्नत्वनियम इति चेन्न कपालादिनाशजन्य
घटादिसंयोगनाशस्य स्वप्रतियोगिरूपप्रागभावावच्छेदकानवच्छिन्नत्वेन प्रागभावतत्प्रतियोगिनोरेकावच्छिन्नत्वनियमस्याभावात् अ
त एव प्रत्यक्षवृत्तिरिव परोक्षवृत्तिर्विषयावच्छेदेन न चितमाश्रयति किं त्वहंकारावच्छेदेनैव तत्प्रागभावरूपाज्ञानं तु इदंत्वादिविशिष्टवि
षयावच्छेदेनापि चितमाश्रयति तदवच्छिन्नस्य कार्यविषयकभ्रमजनकत्वात् न च परोक्षवृत्तिरपि प्रत्यक्षवृत्तिरिव विषयावच्छेदेन कुतो
न जायत इति वाच्यं अवच्छेदकतासंबंधेन चाक्षुषादिना चक्षुरादिसंयोगकार्यत्वांगीकारे प्रत्यक्षवृत्तेरिंद्रियसंयुक्तावच्छिन्नत्वेपि परोक्ष
वृत्तेस्तथात्वनियामकसामग्र्यकल्पनात् न च विषयतासंबंधेनैव कार्यत्वांगीकारसंभवेन प्रत्यक्षवृत्तेरपि तदसिद्धमिति वाच्यं भुक्तित्वं मे स्फु
रतीत्यत्रोक्तनिर्वाहासंभवस्योक्तत्वात् अवच्छेदकतासंबंधेन कार्यत्वानंगीकारे विनिगमकाभावाच्च परोक्षवृत्तेस्त्वतीतानागतव्यवहिता
र्थावच्छिन्नत्वासंभवस्यैव परामर्शादिकार्यताया अवच्छेदकतासंबंधानवच्छिन्नत्वे विनिगमकत्वात् अथ प्रत्यक्षवृत्तेरिंद्रियसंबद्धविष
यकत्वसिद्धये विषयतासंबंधेनेंद्रियसंयोगकार्यत्वस्यावश्यकत्वमेवावच्छेदकतासंबंधस्य तदनवच्छेदकत्वे विनिगमकं न च चक्षुरादि
प्रमाणस्यालोकरूपस्पर्शमहत्त्वादेर्गुरुत्वादिप्रतिबंधकाभावस्योद्भूतरूपस्पर्शादिविषयस्य वा विषयतया चाक्षुषादिकं प्रति हेतुत्वाव

न्यकत्वादिविषयतया संप्रयोगकार्यत्वं नावश्यकमिति वाच्यं चाक्षुषादिसविषयकत्वसिद्धये चक्षुरादेः संप्रयोगस्य वा कार्यत्वं विषयतयेत्यत्रावि
निगमनाविरहादिति चेन्न सधर्मितावच्छेदककविशिष्टबुद्धौ बाधाभावादिरूपाया विशिष्टधीमात्रे ऽवश्यं तत्त्वज्ञानाभावादिरूपायाश्च सामा
न्यसामग्र्याः कार्यतया ऽवच्छेदकतासंबंधेन वक्तुमशक्यतया विषयतानिवेशस्य तस्यामावश्यकतया संप्रयोगादिजन्यतायां विषयत
यानावश्यकत्वात् न च निर्विकल्पकप्रत्यक्षस्येन्द्रियसंप्रयुक्तविषयकत्वमुक्तरीत्या न संभवतीति तदनुरोधेन संप्रयोगादिकार्यत्वं विष
यतयावश्यकमिति वाच्यं अशाह निर्विकल्पके मानाभावात् विशिष्टबुद्धौ विशेषणज्ञानं हेतुरित्यत्र मानाभावात् तदनुरोधेन तत्कल्पने माना
भावात् न च जातिमान् घट इत्यादौ द्विविधविषयतानियमाय निरवच्छिन्नघटत्वादिविषयताकज्ञानस्य निरवच्छिन्नघटत्वादिप्रकारताक
ज्ञाने हेतुत्वमावश्यकमिति वाच्यं जातिविशेषेण संप्रयोगादेरेव तत्र हेतुत्वात् अन्यथा कारणतावच्छेदके विनिगमनाविरहात् वस्तुतस्तु
चैतन्यस्यैव ज्ञानत्वेनाध्यासिकस्य तत्तद्वेषस्य विषयतापरनामकस्य जडेषु कल्पितत्वात् घटादीनामज्ञानवत् द्विविधविषयीभूतचिद्विषयकत्वे
पि ज्ञानत्वे जडविषयकत्वे वा मानाभावः परमते पि ज्ञाने ऽनुव्यवसायविषयत्वस्य कल्पितत्वात् घटादीनां तु ज्ञानाभिव्यंजकत्वमात्रमज्ञानाभि
भावकत्वात् परमते मनोयोगादीनां ज्ञानजनकत्ववत् अज्ञानविषयचिद्विषयकत्वेनैव तासां प्रमात्वोपपत्तेः पूर्णानन्दाचार्यकाज्ञानतद
भिभावकवृत्त्योश्चैतन्यविषयत्वस्य कल्पितत्वेनाज्ञानतदभिभावकवृत्त्योरपि तथैव कल्प्यते तत्र वृत्तेः संसर्गविशेषिततयानुभव राम
स्थले एकानुयोगिकापरप्रतियोगिकत्वविशिष्टसंसर्गावच्छेदेनैव चैतन्यविषयता यथा इमो शुक्तिं पश्यामि घटीयो कर्मतो भूरणोमि १२
पर्वतं वह्निसंयुक्तमनुमिनोमीत्यादौ संसर्गविशेषिततया तदननुभवस्थले निर्विकल्पकवृत्तेः क्वचित्तत्तद्विषयावच्छेदेनैव यथा सो

यमित्यादिवाक्यजन्यशाब्दबोधादौ ॥ अखंडव्यक्तिमात्रावच्छेदेनक्वचिद्विषयतानवच्छेदेनैव चैतन्ये विषयता यथा महावाक्यादेस्तात्पर्यानुरोधेना
खंडचिन्मात्रविषयता ॥ अथ यत्र विषयविशेषितवृत्तेर्जन्यता [illegible] तत्र प्रत्यक्षवृत्तेर्विशिष्टविषयावच्छिन्नत्वेन जन्यत्वोदेर्युक्तत्वेपि प
रोक्षवृत्तेर्विशिष्टविषयावच्छिन्नविषयताकत्वेन जन्यत्वादिकल्पनागौरवमस्यायुक्तत्वात्तद्विषयकत्वमपि वृत्तेर्युक्तमितिचेन्न इदं हिगौ
रवं सविषयकज्ञानस्यनित्यत्वकृतं तत्र च महद्देव लाघवं पूर्वमेव प्रदर्शितं ॥ अथ विषयतायानित्यज्ञानरूपायाद्दृशि दृश्यसंबंधरूपायाः
क्लृप्तत्वेपि इच्छादिभिर्द्विवपरोक्षवृत्यापि दृग्रूपानां लाघवात्साक्षात्संबंधः कथं न कल्प्यत इति चेत् कल्प्यतां यदि संभवति कथं न संभवतीति
चेदतीतादिदृग्रूपानां परोक्षवृत्तीनां च भिन्नदेशकालत्वेन संबंधासंभवादन्यथा सर्वेषामेव मिथः संबंधस्य वक्तुं शक्यतया भ्रममात्रोच्छेदाप
त्तेः ॥ अथ भिन्नदेशकालत्वाभावस्य संयोगसमवायादिसत्यसंबंधव्यापकत्वेन गृहीतत्वात्तदभावात्सत्यसंबंधस्याभावनिश्चयेपि मिथ्या
संबंधः कथं न प्रतीतिबलात्कल्प्यत इति चेन्न वह्निमनुमिनोमीत्यादिप्रतीतेर्वह्न्याद्यवच्छिन्नायाश्चैतन्यविषयतानिरूपकानुमित्यादिवि
षयकत्वेनोपपत्तेः ॥ संबंधांतराकल्पकत्वात् ॥ अन्यथा सर्वत्र साक्षात्संबंधकल्पनया परंपरासंबंधोच्छेदापत्तेः ॥ अज्ञानविषय चिद्वि
षयकत्वं विना वृत्तेरज्ञातज्ञापकत्वरूपप्रमात्वानुपपत्तेः अज्ञातं वह्न्यादिमत्वं मयानुमितमित्याद्यनुभवेन वह्न्याद्यवच्छिन्नचिद्रूपमज्ञा
विषयकत्वस्य परोक्षवृत्तेरग्रहणात् नेह नानास्ति स एष नेति नेत्यात्मेति ॥ अथातआदेशो नेति नेति नेतीत्यादिश्रुतिबाधितत्वेन जडानां प्र
माणावेद्यत्वानुपपत्त्याश्रुतेरनवच्छिन्नचितीव प्रत्यक्षादीनामवच्छिन्नचित्येव विषयत्वोचित्यात् ॥ अज्ञानप्रमयोः समानविषयत्वोचि

त्वाच्च अज्ञानस्य च विद्विषयकत्वावच्छेदकत्वं वक्ष्यते तस्मात्सर्वत्र घटाद्यादिसंबंधावच्छिन्नचैतन्यविषयताकानुमितित्वादिनैव परामर्शादिजन्य
त्वादिस्वीकारे बाधकाभावः अत एव सर्वप्रमाणवेद्यस्मिन् ब्रह्मण्येव व्यवस्थिते इति वार्तिकाद्युक्तसिद्धांतः संगच्छते एवं च परोक्षवह्निस्थले
वह्न्यवच्छिन्नसाक्षिणो विषयस्यानभिव्यक्तत्वेपि यच्चिदिति तस्याध्यासः साक्षिणस्तदभिन्नत्वाद्विषयज्ञानत्वं वाच्यं तथा च वह्न्यभावकाले
पि वह्निं जानामीत्यादिव्यवहारः स्यात्॥ वह्न्यवच्छिन्नस्य तस्य तत्त्वे तु घटेतरे वज्ञानत्वं पुंसः सुखादिस्थले च वह्न्यस्वीकारेण तज्ज्ञानं दुर्वचं
स्यादिति अपि निरस्तं उक्तरीत्या अज्ञानविषयतानुपावरणानवच्छेदको यो विषयतात्मासिकसंबंधस्तद्वद्भिन्नसाक्षिण एव जाना
मीत्यादिव्यवहारनियामकत्वात् तत्र दृष्टान्तः करणावच्छिन्नयोरेवावरणवत्त्वो गुणिभावाभिभावकत्वात् तत्र दृष्टान्तः करणावच्छेदेन वह्न्यभा
वकाले तादृशव्यवहारापत्त्यसंभवात् तस्मात्सुखादेः साक्षात्कारादिव्यवहारानुरोधेन यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतर अयमात्मा
नंतरो बाह्यः कृत्स्नः प्रज्ञानघन एवेत्यादिश्रुत्यात्मन एव साक्षात्कारत्वज्ञानत्वाद्यवच्छेदकत्वे आत्मनीव बाह्यविषयादिष्वपि साक्षात्का
रत्वज्ञानत्वादिकल्पने निर्युक्तिकमेव तच्च ज्ञानं प्रकल्प्योक्तरीत्या तस्य साक्षात्कारादिव्यवहारनिर्वाहकत्वकल्पनाद्वरमुपलक्षणत्वं बाह्या
देरेव साक्षात्कारत्वज्ञानत्वादिकल्पनमेव युक्तमिति वेदान्तज्ञानस्यावच्छेदकल्प्यत्वात् सर्वाः प्रजा अहरहर्गच्छंत्य एतं ब्रह्मलोकं न विंदंती राम
त्यादिश्रुत्या सुषुप्तौ ब्रह्मस्फुरणाभावमुक्त्वा अनृतेन हि प्रत्यूढा इत्यादिश्रुत्यानृतशब्दितमिथ्यारूपेणाज्ञानेन प्रत्यूढत्वाद्दितादृशादि १३
तत्त्वस्य तत्र तदग्रहेतुत्वोक्तेः एवं नीहारेण प्रावृता अविद्यया मंतरे वर्तमानाः जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भव

तीत्यादिश्रुतेः ॥ अज्ञानेनावृतं ज्ञानमित्यादिस्मृतेश्च ॥ न चानन्तादिशब्दैर्ज्ञानाभावस्यैवोक्तेरिति वाच्यं सत्यात्मकत्वादेस्तद्विरोधित्वेनानृतज्ञाव
स्यानृतं शुक्तौ रजतमित्यादौ प्रयोगात् ज्ञानाभावस्य स्वस्मिन्नेव हेतुत्वोक्त्यसंभवात् मन्मते तु सुषुप्तस्य निर्विशेषब्रह्माभिन्नत्वेप्यज्ञा
नाभाववद्ब्रह्माभिन्नस्य साक्षिण एव ब्रह्मस्फुरणत्वमित्यभिप्रायेण तदुक्तिसंभवात् यदभावविशिष्टस्यैव यस्य व्यवहृतिप्रमाणत्वं त
स्यैव तत्रावरकत्वव्यवहारात् यथावरककपालादेर्दीपादौ नच ब्रह्माकारवृत्तिज्ञानाभावस्तथा तत्सत्वेपि जीवन्मुक्तौ ब्रह्मणो व्यव
हारात् चैतन्यरूपे ज्ञाने स्वाभावस्यावरकत्वोक्तेर्निरालंबनत्वापाताच्च किंच स्वस्वरूपं न जानामि पुरोवर्तिनं न जानामि त्वदुक्तमर्थं न
जानामीत्याद्यनुभवे भावरूपाज्ञानावगाहनात् तदपलापासंभवः ॥ न च तत्रापि ज्ञानाभावो विषय इति वाच्यं प्रतियोगिज्ञानसत्वे स्वरू
पादिज्ञानस्यैव सत्वेन तदभावप्रत्यक्षासंभवात् तदसत्वे त्वभावग्राहकसामग्रीविरहात् नच स्वरूपादिज्ञानसत्वे स्वरूपाद्यज्ञानं ना
स्ति तदसत्वे तु विशेषणतावच्छेदकप्रकारकज्ञानाद्यभावेन तदनुभवासंभव इति भावरूपमज्ञानमपि कथं ग्राह्यं यदि च साक्षिणो नित्य
त्वेन तत्रोक्तज्ञानादेरहेतुत्वेन तस्य भावरूपाज्ञानविषयकत्वसंभव इत्युच्यते तर्हि ज्ञानाभावविषयकत्वमपि तस्य तथैव संभवतीति वा
च्यं ज्ञानाद्यभावस्य साक्षिभिन्नत्वेपि प्रतीयमानत्वात्साक्ष्यनध्यस्तत्वेन तस्य भावरूपाज्ञा साक्षिसंबंधनिर्वाहकप्रमाणादेर्विना साक्षिवेद्य
त्वासंभवात् अथाविशेषहितचैतन्यस्यैव साक्षित्वपक्षेऽन्तःकरणावच्छेदेनेव घटाद्यवच्छेदेनापि ज्ञानाद्यभावस्य साक्ष्यध्यासस्वीका
रात्साक्षिमात्रवेद्यत्वसंभवः ॥ अथ घटादिज्ञानस्य दीर्घत्वादिव्यवहारवदभावव्यवहारे तत्तदधिकरणग्राहकसामग्र्या हेतुत्वात्तदभावका

लेतस्यनापत्तिरित्यमेव गगनादेश्साक्षिवेद्यत्वेसिद्धांतसिद्धेपितद्यवहारेतत्रदधिकरणग्राहकचक्षुराद्यपेक्षेतिचेन्न अभावबोधक
वाक्यत्वादिरूपतद्यवहारत्वापेक्षयाभावप्रत्यक्षत्वस्यैवलघुत्वेनतज्जन्यतावच्छेदकत्वोचित्येनप्रतियोग्यनुयोगिनिर्विकल्पकोत्तर
मभावस्यपरैरूपिप्रत्यक्षत्वानंगीकारेणचाभावप्रत्यक्षस्यनित्यसाक्षित्वासंभवात् अतएवगगनादेश्चक्षुरादिगम्यत्वोचित्यात्
भट्टवार्त्तिकादिमतेतथांगीकारात् अथेंद्रियसंबद्धविशेषणतयाभावप्रत्यक्षेजननीयेतस्यप्रतियोग्यनुयोग्यविशेषितस्यालौकिकतया
तद्विशेषितस्यप्रतियोग्यनुयोगितावच्छेदकविशिष्टवैशिष्ट्यगोचरप्रत्यक्षत्वेनप्रतियोग्यनुयोगितावच्छेदकप्रकारकज्ञानजन्यत्वाद
भावप्रत्यक्षत्वेननतादृशज्ञानजन्यत्वमितिचेन्न तादृशवैशिष्ट्यगोचरप्रत्यक्षत्वेनजन्यत्वांगीकारेपिस्वरूपंनजानामीत्यादिप्रत्यक्ष
स्याभावविषयकत्वेउक्तानुपपत्तितादवस्थ्यात् इंद्रियसंबद्धविशेषणतयेदंत्वादिप्रकारेणाभावप्रत्यक्षस्यसमवायादिप्रत्यक्षस्यचप्रति
योग्याद्यविशेषितस्यापुरुदयेनप्रतियोगितावच्छेदकादिप्रकारकज्ञानस्यइच्छान्यस्यासमवेतस्यप्रत्यक्षंप्रतिकारणीभूतेंद्रियसंबद्धविशेषण
तयाव्याप्यसामग्रीकत्वासंभवेननेत्याकारकाभावप्रत्यक्षवारणार्थंप्रतियोग्यादिज्ञानस्याभावप्रत्यक्षंप्रतिकारणत्वावश्यकत्वाच्च अभावस्या
नुपलब्धिप्रमाणगम्यत्वेपिप्रतियोग्यादिनिर्विकल्पोत्तरमभावानुपलब्धज्ञानस्यादर्शनेनप्रतियोगितावच्छेदकादिप्रकारकज्ञानस्यतत्रहेतुत्वा
त् अथस्वरूपंनजानामीत्यादौस्वरूपनिष्ठनिरवच्छिन्नविषयताशालिनोमुख्यपदार्थस्यवापुरोवर्तिनमित्यादाविदंत्वान्यद्रव्यत्वादिव्या राम
प्यधर्मनिष्ठनिरवच्छिन्नप्रकारताकस्यत्वदुक्तार्थमित्यादौत्वदुक्तार्थत्वव्याप्यधर्मनिष्ठनिरवच्छिन्नविषयताकस्यज्ञानस्याभावोवि १४
षयस्तथाचसामान्यतःस्वरूपादिज्ञानस्यकारणीभूतस्यसत्वेपितादृशाभावधीसंभवइतिचेन्न सोहमित्यादिवाक्यजन्यस्यस्वरूपनिष्ठ

क्तविषयताकज्ञानस्यसत्वेपिस्वरूपंनजानामीत्यनुभवात्सामग्र्यांमुख्यस्योपधायकत्वाद्युपस्थितावपितत्सत्वात् मुख्यस्योपधायकत्वानप्रतियो
गिकसमवायेनज्ञानसामान्याभावोविषयस्तथापिसामग्र्यांतादृशज्ञानत्वमविषयीकृत्यापिजायमानस्यनजानामीत्यनुभवस्यानुपपत्तेः॥ता
दृशानुभवेतादृशज्ञानत्वविषयीकरणेतदुत्तरंतद्विशिष्टबुद्ध्यापत्तेः॥इदं पृथिवीत्वादिज्ञानकालेपिश्रुत्यादाविदंनजानामीत्यादिश्रुति
त्वाद्यज्ञानानुभवात् त्वदुक्तार्थत्वव्याप्यवत्किंचिद्धर्मनिष्ठानवच्छिन्नविषयताकधीसत्वेपित्वदुक्तार्थंनजानामीत्यनुभवात् त्वदुक्तार्थत्वस्य
वस्तुगत्याव्याप्यंतन्निवेशोयदाघटत्वेनपटस्त्वदुक्तस्तदाघटत्वरूपेणत्वदुक्तार्थत्वव्याप्यघटत्वादिज्ञानसत्वेतादृशानुभवानुपपत्तेः॥वि
संवादिवाक्यस्थलेविशिष्टार्थाप्रसिद्ध्यात्वदुक्तविशिष्टार्थत्वव्याप्याप्रसिद्धेरुक्तव्याप्यत्वस्यप्रतियोगितावच्छेदकेनिवेशोविशिष्टवाक्या
र्थत्वव्याप्यत्वज्ञानस्यपूर्वमवश्यमपेक्षायांतदसत्वेतादृशानुभवस्यजायमानस्यानुपपत्तेः॥निवेशोचविशिष्टत्वतत्तद्धर्मानुपस्थित्यातन्नि
ष्ठानवच्छिन्नविषयताकज्ञानत्वावच्छिन्नाभावप्रत्यक्षानुपपत्तेः॥किंवाभावस्यसाक्षिरूपत्वात्सांगीकारेपिविषयविशेषितज्ञानाभावस्यन
साक्षिवेद्यत्वसंभवः॥साक्षियोग्यधर्मघटितधर्मावच्छिन्नाभावस्यसाक्ष्ययोग्यत्वात्तथासुखाद्यभावस्यवगुरुतरघटत्वाद्यवच्छिन्नाभाव
स्यापिसाक्षियोग्यतापत्तेः॥ननुसाक्षियोग्यत्वंक्वचित्सहजतत्स्वावरणाभावाद्यथासुखादौक्वचिच्चावरणाभिभावकप्रत्यक्षहन्नियोग्यत्वात्
धाचधर्माधर्मगुरुत्वादेस्तावत्तत्वेनप्रत्यक्षवृत्त्ययोग्यत्वेनचसाक्ष्ययोग्यतातज्ज्ञानाभावस्यसाक्ष्ययोग्यत्वेपिघटादेःप्रत्यक्षहन्नियोग्यत्वेन
साक्षियोग्यतातज्ज्ञानाभावस्यसाक्षिवेद्यत्वेबाधकाभावइतिचेन्न घटादिज्ञानत्वस्य घटादिविषयताशालित्वविशिष्टज्ञानत्वरूपतया

तत्र सकलपुरुषीयज्ञानानां वैशिष्ट्यघटकत्वेन तादृशज्ञानसाधारणविषयतानां च घटकतया तदवच्छिन्नाभावस्य साक्ष्ययोग्यत्वावश्यकत्वात् न
हि पुरुषान्तरीयज्ञानतद्विषयतादिकं पुरुषान्तरसाक्षिवेद्यं संभवति न च विषयताया ज्ञानभेदेऽप्यैक्यांगीकारेणैकस्या एव तस्याः सकलपुरु
षसाक्षियोग्यत्वात् घटादिविषयताकत्वज्ञानत्वयोरेकत्र प्रतियोगितायां मिलित्वावच्छेदकत्वमिति वैशिष्ट्यस्यावच्छेदकशरीराप्रविष्टत्वाच्च
नोक्तदोष इति वाच्यं विषयतायाः समवायवत्प्रतियोग्यनुयोगिभेदेन भेदावश्यकत्वादन्यथातिप्रसंगात् अवच्छेदकधर्मसंबंधभेदेनावच्छेदकताया
भेदावश्यकत्वेन व्यासज्यवृत्तित्वानुपपत्तेः प्रत्येकस्य चातिप्रसक्तत्वाद् अवच्छेदके वैशिष्ट्यस्यावश्यं घटकत्वाच्च अथ यथा वृत्तिज्ञानाज्ञानविशेष
णतया सर्वसाक्षिभास्यं सिद्धांते उच्यते तथैवाभावविशेषणज्ञानविशेषणतया सर्वसाक्षिभास्यमुच्यतामिति चेन्न वृत्तिज्ञानाज्ञानयोर्दिव
तमोतघटादिविषयकत्वादिधर्मस्यावरणाभावेनावरणानवच्छेदकस्य साक्षिसंबंधस्य सत्वात् साक्षिभास्यत्वसंभवेऽप्यभावस्य साक्ष्ययोग्यघटा
दिविषयकज्ञानत्वावच्छिन्ना[illegible]भावत्वेन सामान्यत एवायोग्यत्वकल्पनात् साक्षिणा घटादिज्ञानाभावव्यवहारासंभवात् अन्यथाममपि घटज्ञा
ने साक्षात्करोमीतिवत्परे घटज्ञानं साक्षात्करोमीत्यादिव्यवहारापत्तेः न च घटादिविषयकज्ञानप्रतियोगिकत्वेऽप्यभाव इव आवरणं नांगीक्रिय
ते तथा च तत्राप्यावरणानवच्छेदकसाक्षिसंबंधरूपसाक्षिभास्यत्वसंभवेऽपि पटाद्यवच्छिन्नानुयोगिताकत्वरूपेऽभावधर्मे साक्षिसंबंधस्यावरणा राम
वच्छेदकत्वांगीकारात् परादौ घटाद्यज्ञानं साक्षात्करोमीति व्यवहाराभाव इति वाच्यं पटादावनंताधिकरणावच्छिन्नानुयोगिताकत्वे साक्षिसंबं १५
धानामनंतावरणावच्छेदकत्वकल्पनापेक्षयाज्ञानाभावस्य साक्ष्ययोग्यत्वकल्पनाया एव युक्तत्वात् किं च इदं रजतमित्यादिभ्रमस्थले इदंत्वाघ

वच्छिन्नविषयतानिरूपितरजतादिभेदप्रकारताशालित्वे सति यस्तत्रेदं प्रामाण्यज्ञानाभाववत्वात् बाधकधीरिति निश्चयस्तत्वावच्छिन्नाभावत्वेन
बाधाभावस्य कारणत्वं वाच्यं तथा चावच्छेदकघटकानामनंतानां विशेषणविशेष्यभावे कामचारेणानेकहेतुत्वापत्त्या गौरवं सर्वतादृशनिश्च
यसामग्र्यभावत्वेनापि हेतुत्वं वाच्यं अन्यथा तादृशनिश्चयोत्पत्तिकाले तादृशभ्रमोत्पत्त्यापत्तेस्तथा चैतन्नाप्यतिगौरवं नवकार्यसहभावेनो
क्तनिश्चयाभावत्वेन हेतुत्वांगीकारात् उक्तसामग्र्यभावस्य हेतुत्वमिति वाच्यं कार्यकालवर्त्तित्वविशिष्टस्य कार्यप्रागसत्वे न तत्वेन कारणत्वासं
भवात् अथोक्तनिश्चयाभाववत्वे सति यः सामग्रीमत्क्षणोत्तरक्षणस्तत्वं कार्योत्पत्तिव्याप्यमथवा कार्योत्पत्तिकालावच्छेदेन तत्प्राक्कालावच्छेदे
न च यः कार्यविशेषनिष्ठः कारणतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकोऽभावस्तत्प्रतियोगितानवच्छेदको उक्तनिश्चयाभावत्वमेवोक्तनि
श्चयाभावस्य कारणत्वमिति कार्यसहभावेन कारणत्वमिति वाक्यार्थ इति चेन्न अन्याविशेषितस्यैव सामग्रीक्षणोत्तरक्षणत्वस्य कार्यो
त्पत्तिव्याप्यत्वांगीकारात् अन्यथा दंडादिहेतुत्वमनंगीकृत्य दंडचक्रादिसामग्रीमत्क्षणोत्तरक्षणत्वस्य घटाद्युत्पत्तिव्याप्यत्वमंगीकृत्य दंडा
दिहेतुत्वस्य विलोप्यतापत्तेः यदि चान्वयव्यतिरेकाभ्यां पूर्वक्षणे स्वेतरसकलकारणसत्वे यदसत्वे अग्रिमक्षणे कार्यव्यतिरेकस्तत्व
स्यैव कारणतारूपत्वाद् दंडादीनामवश्यं कारणत्वमित्युच्यते तदोक्तनिश्चयसामग्र्यभावेपि तत्तुल्यभावरूपाज्ञानांगीकारे तु रजतादिकं प्र
तीदंत्वाद्यवच्छिन्नविशेष्यताकत्वे सति रजतादिभेदाद्यवच्छिन्नविषयताकाज्ञानत्वेनैक्यसंबंधेन हेतुत्वमज्ञानत्वं च जातिविशेषस्तेन रजता
द्युत्पत्त्यापत्तिर्यदा चोक्तनिश्चयो न जातो जातोपि वा प्रामाण्यज्ञानाद्यास्कंदितस्तदा रजतभेदं न जानामीति तादृशाज्ञानानुभवात् तादृशाज्ञा
नजानामीत्यनुगतप्रतीत्योक्तहेतुतावच्छेदकत्वादिना च सिद्धः यदा चेदं न रजतमित्याद्यबाधनिश्चयस्तदा तदभिभाव्यस्योक्ताज्ञान
स्यैवाभावात् २

तांगीकाराद्जताद्युत्पत्तेरेवंवाप्रामाण्यज्ञानाभावनिश्चयत्वादीनांनिवेशेनानेनहेतुत्वस्यतादृशसामग्र्यभावेहेतुत्वस्यवाकल्पनान्महदेव
लाघवं ननुवाधनिश्चयस्याज्ञानध्वंसरूपस्योत्पत्तिकालेऽजताद्युत्पत्तेरापत्तिः ज्ञानस्याज्ञानध्वंसत्वपक्षे पूर्वक्षणेऽज्ञानसत्वात् ज्ञानस्याज्ञान
नाशकत्वपक्षेवाधनिश्चयोत्पत्तिक्षणेपितत्सत्वात् न चाज्ञानध्वंसोवाधनिश्चयइतिपक्षेतदुत्पत्तिक्षणेसमवायिकारणस्याज्ञानस्याभावात् कु
त्रकार्यमापाद्यमितिवाच्यं तत्क्षणेऽज्ञानस्याभावेप्यज्ञानत्वप्रदेशावच्छेदेनकारणकूटवान्त्र्यःक्षणस्तदुत्तरक्षणनिष्ठकार्योत्पत्तेरज्ञानाव
च्छिन्नत्वापादनेवाधकाभावादिति चेन्न कपालादेर्ध्वंसोत्पत्तिक्षणेतत्र घटाद्युत्पत्यापत्तिवारणाय जन्यसत्वावच्छिन्नंप्रतिप्रतियोगितास्वा
व्यवहितपूर्वत्वैतदुभयसंबंधेनाखंडोपाधिविशेषरूपेणध्वंसत्वेनप्रतिबंधकत्वकल्पनात्तत्रैवोक्तापत्तिवारणात् पंचेदमुक्तापत्तिवारणा
योक्तहेतुत्वस्यावश्यंवाच्यत्वात् परेषांसत्वंद्रव्यगुणकर्मसुकार्यताच्छसमवायेनास्माकंतुसत्वंद्रव्यमात्रेकार्यताचतादात्म्येनेत्येतावन्मात्र
भेदात् वाधनिश्चयस्याज्ञाननाशकत्वपक्षेतुतृतीयक्षणसाधारणाम्व्यवहितपूर्वत्वंनिवेश्यं अथैवमव्यवहितपूर्वत्वसंबंधेनयोवाधनिश्चय
स्याभावः विशेषणतासंबंधेनतद्विशिष्टयोवाधनिश्चयाभावस्तत्वेनैवहेतुत्वसंभवान्मन्मतेपिवाधसामग्र्यभावस्यनहेतुत्वं अगृहीताप्रामा
ण्यकानाहार्यत्वादिनात्वेनवाधनिश्चयस्यविरोधित्वं किंतुतत्वेनैवनिश्चयत्वस्याव्याप्यवृत्तिजातित्वमंगीकृत्याहार्यगृहीताप्रामाण्यकादिज्ञा राम
नेष्वतदंगीकारेणतथामप्यविरोधित्वापत्तेः तथाचकिंभावरूपाज्ञानकल्पनयेति चेन्न उक्तरीत्यामपिमहागौरवात् तथाहि अज्ञान १६
त्वजात्यपेक्षयानिश्चयत्वावच्छिन्नसमवायावच्छिन्नप्रतियोगिताकत्वसंबंधेननिश्चयविशिष्टाभावत्वेगुरुतरमुक्तसंबंधेनध्वंसाभावाप

ऽप्याचनिश्चयस्य स्वविषयविरोधितस्याभावो गुरुतरः अव्यवहितपूर्वत्वं च स्वसामानाधिकरण्यस्ववृत्तिकृतिवृत्तित्वं चेत्युभयसंबंधेन स्वप्रत
त्कृतेः स्ववृत्तित्वं कालिकं कालिकसंबंधेन स्वप्रागभाववत्त्वं चेत्युभयसंबंधेन कृतिवृत्तित्वं च कालिकेनेति त्वया वाच्यं मम तु स्ववृत्तिकृतिवृत्ति
त्वं स्ववृत्तिकृतिमत्कृतिवृत्तित्वं वाऽव्यवहितपूर्वत्वं वृत्तिकृतिमत्ता च कालिकेन वस्वप्रागभावासमानकालीने स्वासमानाधिकरणे च स्वप्रति
योगिताविरहेण कृतौ कालिकावच्छिन्नस्वप्रागभाववत्त्वस्योक्तकृतिवृत्तित्वे च समवायविशेषणतोभयसंबंधघटितसामानाधिकरण्यवि
रोधितत्वस्य निष्फलत्वात् तथा वाव्यवहितपूर्वत्वमपि ते गुरुतरं निष्ठि नो मीति प्रत्ययस्य प्रमात्वजात्यैवोपपन्नेश्च संशयस्य च प्रमात्वा
नंगीकारान्निश्चयत्वजातावपि मानाभावः ८ गृहीताप्रामाण्यकादिज्ञानविषयभ्रमत्वापायां दत्तो निश्चयत्वानंगीकारेपि क्षतिविरहात् प्राति
भासिकप्रमात्वेनैव तस्यानिश्चयत्वधीसंभवात् इदं रजतमित्यादिभ्रमप्रतिबाध्याभावादिनिश्चयजनकतायां परं पर्याऽवच्छेदकत्वेन तादृशज्ञा
तिकल्पनापेक्षया तादृशकारणतास्थानीयकारणत्वे साक्षादवच्छेदकतया वैजात्यविशेषस्यैव कल्पयितुमुचितत्वेन लौकिकसन्निकर्षादि
घुतदाश्रयत्वकल्पने विनिगमकाभावेन च तदाश्रयत्वेनाज्ञानस्यैव कल्पनौचित्यात् बाधसामग्र्यादिप्रतिबंधकत्वाकल्पनेनोपदर्शितलाघवा
नुग्रहात् प्रमां प्रत्यपि भ्रमात्मकबाधनिश्चयाभावनियतसन्निकर्षादेरेव जातिविशेषेण वा शक्तिविशेषेण वा हेतुत्वसंभवात् अनुमि
त्यादेः परामर्शादिकारणत्वस्थलेपि विशिष्टव्याप्यपक्षवैशिष्ट्यसाध्यज्ञानाभावस्योक्तवैशिष्ट्यविषयकप्रमात्वावच्छिन्नस्यैव हेतुत्वसं
भवादतिरिक्तनिश्चयत्वकल्पने प्रयोजनाभावात् न च शक्तिविशेष एव निश्चयत्वमिति वाच्यं अनुमित्यनुपधायकपरामर्शे शक्तिविरो

वसत्वेमानाभावात् निश्चयत्वस्य व्यवहाराच्च नचाज्ञानस्य चिदाश्रयत्वविषयत्वयोः कदाचिदिदंत्वविशिष्टरजतभेदाद्यवच्छेदके कदाचिच्च वि
द्यमानमपि तत्त्रयोर्नावच्छेदकमिति कल्पनमसमंजसमिति वाच्यं त्वन्मतेपि नित्यस्य बाधनिश्चयाभावस्यात्मसंबंधेन तत्र शुक्त्यवच्छिन्नत्वस्य
कदाचित्कस्यावश्यंवाच्यत्वात् अन्यथा बाधनिश्चये सत्यपि तदभावसत्त्वापत्त्या भ्रमाद्यापत्तेः ॥ अथ तत्तत्कालवृत्तिविशेषणतया तत्त्वाभावो हेतु
विशेषणतामात्रं तत्त्वाभावस्यात्मनि सार्वदिकमिति चेन्न संबंधाननुगमेनानंतहेतुत्वापत्तेस्तत्तत्कालत्वेनैव हेतुत्वापत्तेश्च संबंधाननुगम
स्यादोषत्वे प्रकाराननुगमस्याप्यदोषत्वापत्तेरन्यथा परिभाषामात्रत्वापत्तेः पार्थिवपरमाणुगतानां रूपाद्यभावाश्रयतायां कालविशेषावच्छि
न्नत्वस्य गगनादिगतायां शब्दविशेषाद्यभावाश्रयतायां कर्णाभेद्याद्यवच्छेदकस्य च परैरपि कल्पनात् किंच भ्रमस्थले बाधाभावस्य हेतुत्वेन त
त्कार्यता इदंरजतमित्याद्याकारकत्वोक्त्यादिना वाच्या उक्तरूपेणाज्ञानस्य हेतुत्वे तु तत्कार्यताप्रतीतिके रजतत्वादिनैवेत्यपि महालाघवमथै
व मुक्ताकारनियमो भ्रमे कथमिति चेत् शृणु यद्यप्युक्तरूपेणाज्ञानस्यैक्येन हेतुत्वं तादात्म्येन उक्तरजतत्वादिनैव कार्यत्वं तथापीदमावे
कश्चित्संबंधावच्छेदेनाध्यासिकसंबंधेन चिदाश्रिताज्ञानपरिणामस्य रजतादेस्तादृशाज्ञानतादात्म्यादेवोक्तचित्संबंधावच्छेदेनाध्यासिकसंबंधे
न चिदाश्रितत्वोपपत्त्या भ्रमरूपाया वृत्तेस्तादृशरजताद्यवच्छिन्नत्वेनोक्ताकारनियमोपपत्तेः यदवच्छेदेनाध्यासिकसंबंधेन चिदाश्रिताज्ञानस्य परि राम
णामो यत्र रजतादिके तत्तदवच्छेदेनाध्यासिकसंबंधेन चिदाश्रितमिति नियमात् अथ रजतादिनिष्ठायाः साक्षिप्रत्यक्षीयप्रकारताया इदंत्वाद्य १८
वच्छिन्नविशेष्यतानिरूपितेऽस्यादिसंसर्गतानिरूपकत्वं कथमिति चेत् आध्यासिकस्य चित्संबंधस्यैव विषयतापरनामत्वात् तस्य च रजतभे

रोधज्ञानवित्संबंधरूपस्येदमाद्यैक्यवित्तौ॥संबंधावच्छेदेनतादृशसंबंधरूपस्येदमादिवित्तौःसंबंधावच्छेदेनतादृशसंबंधरूपस्येदंत्वादिसं
बंधवित्तौःसंबंधावच्छेदेनतादृशसंबंधस्येदंत्वादिवित्तौःसंबंधावच्छेदेनस्वीकारात्तेषुचसंबंधेषुप्रकारतासंसर्गताविशेष्यतावच्छेदक
तात्वरूपाणांवैलक्षण्यानामनुभवबलादेवव्यवस्थितत्वात्परैरपितेषामनुभवबलादेवव्यवस्थितत्वोरीकारात्परस्परावच्छिन्नतावद्विषय
ताशालिसाक्षिज्ञानव्यवहारोपपत्तेःरजतत्वरंगावच्छिन्नाश्रयताकाद्रजतान्यत्वव्याप्यशुक्तित्वाद्यवच्छिन्नविषयताकाद्विज्ञानात्तत्तादात्म्येन
रजतादृश्यात्शुक्त्याद्यवच्छिन्नाश्रयताकरजतभेदाद्यवच्छिन्नविषयताकाज्ञानकार्यत्वेरजतत्वादिनैवनसंभवतितादृशाज्ञानविशि
ष्टरजतत्वादिनातदंगीकारेतुविपरीतगौरवमितिचेन्नअज्ञानोत्तररजतान्यरजतादिव्यावृत्तजातिविशेषाणामेवतत्तदज्ञानकार्यतावच्छेदक
त्वात्बाधाभावस्यकार्यत्वेतुनजातिविशेषेणविशिष्टज्ञानविषयतानांमिथोऽवच्छेद्यावच्छेदकभावासिद्ध्यापत्तेःअतएवयदवच्छिन्नेचैतन्ये
व्यावहारिकंप्रातिभासिकंवायदध्यस्तंतद्विषयतावच्छेदेनतद्विषयताकत्वंतन्मतस्यभ्रमंप्रत्यनावृतत्वात्तस्यतद्विषयतावच्छिन्नतद्विषय
ताकसाक्षात्कारत्वंयःसर्वज्ञइत्यादिश्रुतिसिद्धंसंगच्छतेअतएवचज्ञात्यावच्छिन्नचितिध्यस्तस्यादरसासइतिसिद्धांतः॥अन्यथाज्ञात्यादि
विषयतावच्छिन्नव्यक्त्यादिविषयताकज्ञानासिद्धेः॥एवंचेदमाद्यैक्यवित्तौःसंबंधावच्छेदेनाज्ञातेचिद्विषयतारूपदृश्यताव्यवहारनिया
मकस्स्वरूपसंबंधःउक्तयुक्तिभिस्तमेवभान्तमनुभातिसर्वमित्यादिश्रुतिभिश्चसिद्धःरजतभेदादिवित्तौःसंबंधावच्छेदेनचित्यज्ञानविष
यतारूपावृतत्वव्यवहारनियामकोऽन्यः॥संबंधउक्तयुक्तिभिरन्तेनहिप्रत्यूढानीहारेणावृताःअज्ञानेनावृतंज्ञानमित्यादिश्रुति

स्मृतिमिश्रसिद्धइति रजतताद्युपादानाज्ञानस्य मिथो विलक्षणसंबंधद्वयविप्रतिपत्तिश्च तु इत्यनिरस्ता किंचैतेन इदंनिष्ठरजतभेदादिचित्तोः सं
बंधावच्छेदेनाज्ञानचित्तोरेक एव संबंधो गीक्रियतामथवाज्ञानस्यैवाज्ञानस्यापि तादृशभेदादावेव विशिष्टविषयतांगीक्रियतां किंचित्यज्ञानस्या
न्नसंबंधद्वयेनाहंकाराद्यवच्छेदेन चित्संबंधस्यावश्यकतया तत एवाज्ञानस्य साक्षिभास्यत्वसंभवादित्यादिकं पराक्तं तादृशभेदादिचित्संबंधावच्छे
देनचित्येकस्यैवाज्ञानसंबंधस्यांगीकारेहि तत्परिणामरजतादेरपि तद्वच्छेदेनैव चित्संबंधापत्त्येदंनिष्ठरजतभेदवद्रजतमित्यादिर्विभ्रमा
कारः स्यान्नत्विदंरजतमित्यादिः तादृशभेदविषयतावच्छिन्नरजतादिविषयताकत्वेन ज्ञानं व्यवह्रियेतेन त्विदमेक्यमात्रविषयतावच्छि
न्नरजतविषयताकत्वेन रूपमिदं न जानामीतिवत् रजतभिन्नं न जानामीतिव्यवहारः स्यात् इदंत्वविशिष्टस्य रजतभेदस्य च द्वयोरेकज्ञा
तीयेऽज्ञानस्य चित्संबंधेऽवच्छेदकत्वविशेषाभावात् अथ ज्ञानस्येवेत्यादिकल्पनायां दोषः विशिष्टविषयताहि इदंत्वाद्यवच्छिन्नोद्देश्यतावच्छि
न्नरजतभेदत्वावच्छिन्नविधेयता तथा च उद्देश्यविशेषिततयाऽज्ञाने व्यवह्रियते न तु विशेषिततयेति चेत् न रजतभेदनिष्ठस्याज्ञानसं विधेय
बंधस्य विधेयतात्वेऽइदमादिनिष्ठस्याज्ञानसंबंधस्य उद्देश्यतात्वे च मानाभावात् अथ इदमाद्यविशेषितेरजतभेदादावेव विशिष्टविषयतेति चे
त् एवैतन्मात्रे चित्संबंधस्य क्लृप्तत्वेनोक्तविशिष्टत्वसंबंधद्वयावच्छेदेनाज्ञानचित्तोः संबंधद्वयमात्रकल्पनयोपपत्तौ उक्तभेदादिघटकेदंत्वाद्यन नाम
तपदार्थेषु अनंतानामज्ञानविषयतानामवच्छेद्यावच्छेदकभावापन्नानामंगीकारे गौरवमुक्तभेदादिविषयकाज्ञानजन्यरजतादेस्ता १८
दृशविषयकत्वं स्यान्नतु तज्ज्ञानस्य इदमेक्यादिविषयतावच्छिन्नरजतादिविषयताकत्वं रजतावच्छिन्नचित्तः स्यादतो सिद्धांतेपि रजतभे

दावच्छिन्नविद्विषयताकत्वमज्ञानगतंरजतस्यकिंनस्यादितिचेत्स्यादेवकुतोनानुभूयतइतिचेच्छुक्तौरजतभेदसंबंधस्यावृतत्वात्अथममापु
क्तभेदस्यावृतत्वान्नतद्विषयकत्वंरजतेनानुभूयतइतिचेन्नतथापिद्वितीयपक्षस्थितेर्बाधाज्ञानस्यतथात्वेपितथाविधाज्ञानकार्यत्वस्यइद
मेत्याद्यवच्छिन्नरजतत्वादिनांगीकारादिदंरजतादिचैतन्यस्यतादृशविषयताकत्वसिद्धिरितिचेन्नहिगौरवमेवमहन्मूर्द्धिस्वकीयेपातितं
त्वयायत्तुइदमेत्यादिवित्तेःसंबंधावच्छेदेनरजतभेदादेर्वाज्ञानविषयत्वमात्रमस्तुचित्यज्ञानस्योक्तसंबंधाभ्यांकृतमितितत्तुच्छमुक्त
भेदादिनिष्ठस्याज्ञानविषयत्वस्योक्तसंबंधावच्छिन्नत्वासंभवादवच्छेद्याधिकरणेसाक्षात्संबद्धस्यैवावच्छेदकत्वादिदंरजतादिचैतन्यस्योक्त
विषयताकत्वानिर्वाहाच्च एवंचगगनादितादात्म्यादिचित्संबंधावच्छेदेननेत्यादिचित्संबंधांगीकारेपितादृशतादात्म्यादेर्नेत्यादिप्रतियो
गिकत्वाभावात्तादात्म्येननेत्याद्युत्पत्तौक्तमायाश्चावयवनेत्यादियाकादिसामग्र्याश्चाभावेपिगगनेनीलमित्यादिभ्रमस्थलेनेत्याद्यु
त्पत्तिस्वीकारेनिराबाधएव किंचैवंतेनजपाकुसुमादिसन्निहितस्फटिकादौलोहितइत्यादिभ्रमस्थलेचक्षुरादिसंप्रयुक्तलौहित्यादेर
नुभूयमानस्यस्फटिकादावन्यथाख्यातिरितिवदंतश्शुद्रपराहताः उक्तरीत्यालौहित्यादावज्ञानहेतुत्वावरूपकत्वेनतादृशज्ञानस्य
चस्फटिकादितादात्म्यावच्छेदेनचित्संबद्धत्वान्नन्यदिशामलौहित्यादेरपितथात्वावरूपकत्वादन्यथालौहित्यादिचिद्विषयतायास्तादृ
शातादात्म्यविषयतावच्छिन्नत्वाद्यनुपपत्तेश्च नचस्फटिकादौलोहित्याद्यभावधीकालेपिलौहित्यादिभ्रमस्यजायमानस्योक्ताभा
वाज्ञानजन्यत्वानुपपत्तिस्तदातादृशाज्ञानस्योक्तधियानिवर्तितत्वादितिवाच्यं जपाकुसुमादिरूपाधिसन्निधानेनप्रतिबंधात्तया

तदसिद्धेः॥ तार्किकादिमते तु तत्र बाधाभावस्य हेतुत्वासंभवेपि जपादिसन्निधानस्यैवोक्तविशेष्यतावच्छिन्नप्रकारताशालिबुद्धित्वाव
च्छिन्नं प्रति हेतुत्वमवश्यं वाच्यमन्यथोक्तबुद्धेरुक्तप्रकारत्वस्याकस्मिकतापत्तेः॥ तथा च गौरवं गुणाः संयोगेन द्रव्यवान् जातिमानद्र
व्यादिभ्रमस्थले तु गुणाद्यनुयोगिकत्वे द्रव्यादिप्रतियोगिकत्वे चेत्युभयविशिष्टसंबंधावच्छेदेन संयोगाद्युपादानाज्ञानविशिष्टसंबंधोंगीकार्य
स्तादृशाद्यज्ञानविशिष्टसंबंधस्य च सांसर्गिकविषयतात्वेनांगीकारान्नानुपपत्तिः॥ संयोगादिविषयतायाश्च तादृशप्रतियोगिकत्वादिविषय
तावच्छिन्नत्वमिष्टत्वान्नापादनीयं अथवा गुणादेर्द्रव्यादेश्च विशिष्टसंबंधावच्छेदेनैव तादृशाज्ञानस्य विशिष्टसंबंधोंगीकारान्न तादृशगुणादिवि
शिष्टसंबंधे विशेष्यतात्वस्य तादृशद्रव्यादिविशिष्टसंबंधे च प्रकारतात्वस्य स्वीकारादविरोधः एतेन तादृशभ्रमस्थले गुणानुयोगिकसंयोगाद्य
प्रसिद्ध्या तद्विशिष्टसंबंधस्याज्ञानविशिष्टसंबंधावच्छेदकत्वासंभवः॥ संयोगादेर्द्रव्यादेश्च तत्रोत्पत्तिस्वीकारे गौरवमित्यादिकं परास्तं॥ हृदो वह्निमा
नित्याद्याकारकानुमित्याद्याभासरूपभ्रमस्थले तु परमते यथातीतानागतवह्न्यादिनिष्ठविषयतावच्छिन्नातीतानागतहृदादिवि
षयतानिरूपकत्वमनुमित्यादौ स्वीक्रियते तथास्माकमप्यतीतानागतहृदादिसंयोगादिविशिष्टो॥ संबंधावच्छेदेनाज्ञानविशिष्टः संबं
धस्य संभवान्नमन्मते अतीतानागतहृदादेर्वर्तमानसूक्ष्मावस्थास्वीकारात् तदीयविशिष्टसंबंधस्यैवाज्ञानविशिष्टसंबंधावच्छेदकत्वसंभवा नाम
न्न तादृशाज्ञानमपरिणामवह्न्यादेरपि तादृशसंबंधसंभवः॥ अतीतानभिन्नकालीनयोरवच्छेदकत्वासंभवप्रयुक्तो दोषः॥ ननु भ्रमविष १८
यीभूतरजतादौ चाक्षुषानुमित्यादिवृत्त्यभावात् वृत्तिसूक्ष्मपरिणामाकाररूपसंस्काराभावेन तादृशरजतादिस्मरणानुपपत्तिः॥

न च चाक्षुषत्वादिवृत्तिरेव तत्र जायते चक्षुःसंप्रयोगादिसामग्रीसत्त्वादिति वाच्यं प्रमात्वजात्यवच्छिन्नं प्रत्येवांतःकरणस्य परिणामित्वांगी
कारेण प्रमावृत्तेरंतःकरणपरिणामचाक्षुषत्वासंभवात् अज्ञानप्रमयोरेकावच्छेदेन चिद्विषयतानियमाय स्वविषयतयावच्छे
दकत्वसंबंधेन प्रमां प्रति तेन संबंधेनाज्ञानस्य हेतुत्वकल्पनाद् ज्ञानचिद्विषयतानवच्छेदकेन शुक्तिरजतचित्संबंधेन प्रमाचिद्विषय
तया अवच्छेत्तुमशक्यत्वादस्यैवं रजतचाक्षुषमे जातं रजतं पश्यामीत्यादिव्यवहारो न स्यादिति [illegible] चेन्न इदमाकारचाक्षुषाभिव्यक्त
चिदध्यस्तत्वेन रजतादौ तथाव्यवहारात् अथ तथापीदं रजतमित्यादिभ्रमस्य चाक्षुषतायां नेदं रजतमित्यादिचाक्षुषविरोधित्वं न स्या
चाक्षुषस्यैव बाधविधया तद्विरोधित्वादिति चेन्न तादृशभ्रमकालेऽशुक्त्यादिनीलपृष्ठावच्छिन्नचक्षुःसंयोगादिवृत्त्युत्पत्त्यव्यंजकाभावेन
त शुक्तित्वादेरिव रजतभेदादेरप्यचाक्षुषत्वोपपत्तेः वा किंविशेषतादेर्वारणमेव प्रतिबंधकत्वस्य चक्षुरादिसंप्रयोगकारणत्वस्य वा कल्प
नयोपपत्तिसंभवाच्च तादृशाशकेऽश्ववक्तृगत्या तादृशचाक्षुषस्य यस्मात्तोत्पत्तिरुत्पत्तिर्वा तत्रैव स्वीकर्तुं शक्यत्वात् अथापि जाग्रद्भ्रम
स्थले कथंचिद्रजतादिचाक्षुषादिवृत्तिरुच्यते स्वप्नभ्रमविषये तु तदसंभवात् केवलेन मनसा प्रमायाअजननात् सुखादेः साक्षिमात्रवे
द्यत्वात् संस्कारस्यानुपपत्तिरेव एतेन यदृच्छ्यवच्छिन्नचिन्नाश्या यावंतोऽर्थास्तद्वृत्तिसूक्ष्मावस्थैव तावतां संस्कारस्तथा चेदं रजतमित्या
दिभ्रमस्थले इदमाद्याकारचाक्षुषवृत्तिसूक्ष्मावस्थैवेदमादेरिव रजतादेरपि संस्कार इत्यपि परास्तं स्वाप्नभ्रमस्थले तु वृत्तिसामान्याभा
वादपीत्यनुरीत्या जाग्रद्भ्रमस्थले संस्कारनिर्वाहेऽपि स्वाप्नभ्रमस्थले तदनिर्वाहात् न च भ्रमविषये वृत्तिपरिणामो जायत इत्युच्यते तर्हि

स्वप्नभ्रमस्थले हि मवक्ष्यमाणसामग्र्या जाग्रद्भ्रमस्थलेऽपि वृत्तिसंभवादुक्तकल्पना व्यर्था यदवच्छिन्नचैतन्ये प्रध्वस्ते तत्सूक्ष्मावस्थाया
एव तत्संस्कारस्य वक्तुं शक्यत्वेन भ्रमविषयसूक्ष्मावस्थाया एव तत्संस्कारत्वसंभवात् गुणो सूक्ष्ममनोवच्छिन्नविज्ञस्यापि घादेः सूक्ष्म
मनोनाशरूपस्थूलावस्थारूपसंस्कारेण जागरे स्मृतिसंभवात् स्वप्नादिस्थलेऽपि वृत्तिकल्पनानौचित्यात् इदमाद्याकारवृत्तेरिव रजतादेः
सूक्ष्मावस्थाया अपि संस्कारत्वे बाधकाभावात् इदन्तापि विषयकत्वस्य तयोस्तुल्यत्वादिति चेन्न वदंतिस्मृतिजनकसंस्कारोद्बोधकत्वे
न यानि हि स्मानि तेषामेवानुगतानां शक्तिविशेषेणानुगतानां वा स्मृतिहेतुत्वसंभवेन संस्कारत्वमानाभावः ८ अथानुभूतमेवस्म
र्यते नान्यदित्यन्वयव्यतिरेकाभ्यामनुभवस्य हेतुत्वे निर्णीते तस्य साक्षाद्संभवाद्व्यापारः ९ कल्प्यः स च चिद्रूपस्यानुभवस्य नित्यत्वा
तदवच्छेदकवृत्तिसूक्ष्मावस्थारूपोऽन्यस्यानुगतस्याभावात् स एव च संस्कार इत्युच्यत इति चेन्न अन्वयव्यतिरेकयोरनुभवस्योद्बो
धकसमवधानपूर्वनियतत्वे नान्यथासिद्धत्वादन्यथासिद्धत्वेऽपि वा प्रमावृत्तिसूक्ष्मावस्थारूपध्वंसवद्भ्रमविषयरजतादिसूक्ष्मा
वस्थारूपध्वंसेऽपि संस्कारत्वजात्यंगीकारसंभवेनानुपपत्त्यभावात् गुणः पडुत्पन्नयोर्वृत्तितदवच्छेदकघटादिनाशयोरैक्येन विष
यनाशोऽपि संस्कारत्वस्य वृत्तेर्वृत्त्यंतरनाशं विनापि तन्नाशस्येव तत्संस्कारत्वस्य वाचद्रूपवक्तव्यत्वात् स्वावरणानवच्छेदकत्वेन संबं भाम
धेन वितं प्रति निरूपकतास्यसंबंधविशेषेण संस्कारत्वजात्या कार्यत्वकल्पनात् स्वसामग्रीवलाज्जायमानस्य वृत्तिनाशस्य वृ २०
त्तिघटादाविव भ्रमविषये तन्नाशस्येव संस्कारत्वविशिष्टतमानिरूपकत्वसंबंधेनोत्पत्तिसंभवादुपेक्षात्मकवृत्तिस्थलेऽप्यावरणा

मिभवानंगीकारेणोपेक्षाविरहस्यापि संबंधस्य विशेषेण वा संस्कारानुपधानात् आवरणं च असत्त्वापादकाज्ञानविषयत्वं बोध्यं तेन सत्यरजत
स्थले रजताकारवृत्तिनाशो मिथ्यारजतस्थले चेदं रजताकारवृत्तिनाशो रजतनाशो वा संस्कारो यद्यंगीक्रियते तर्ह्यनुगतरूपेण तस्य रज
तानुभवव्यापारत्वासंभव इत्यादिकं परास्तं रजतनिरूपितत्वविशिष्टसंस्कारत्वस्योक्तरीत्यानुगतत्वात् आस्तां वाभ्यमविषये ध्वंसादि
रूपेणैव संस्काररूपेणाप्यंतःकरणपरिणामः अन्यथा समूलभ्रमबाधे रजतादिसूक्ष्मावस्थाया अपि बाधादग्रे भ्रमविषयरजतादि
स्मरणानुपपत्तेः अथवा रजताद्यर्थरूपेणैव भ्रमरूपवृत्तिरूपेणाप्यज्ञानं परिणमते अन्यथा रजतादेर्भ्रमो जातो न त्वध्येत्यनुभव
स्य दुरुपपादत्वात् नन्वेवं भ्रमस्थले वृत्तिविषययोर्द्वयोरुत्पत्तिकल्पने गौरवमिति चेत् न फलमुखत्वेनादोषत्वस्योक्तत्वात् तथा युग
पदुत्पन्नविनष्टत्वेनैकप्रागभावध्वंसप्रतियोगित्वस्यैव स्वीकारादेकस्यैव परिणामस्य रजतादिविषय रूपत्व तदाकारवृत्तिरू
पत्वयोः संभवाच्च रजतत्वादिभ्रमत्वाभ्यां अव्याप्यवृत्तिरूपाभ्यां एकस्यापि विषयिविषयत्वसंभवाच्च तच्च भ्रमान्यद्यत्स्वावच्छेदकं
तत्तादात्म्यसंबंधेन भ्रमत्वेन कार्यत्वमैक्येन भ्रमान्यविशिष्टावस्थाज्ञानत्वेन कारणत्वं अवस्थारूपाज्ञानत्वमज्ञानत्वजातिव्याप्य
जातिविशेषः अज्ञानत्वस्यैव निवेशो घटाद्युपधायके मूलाज्ञाने भ्रमानुपधायके व्यभिचारात् तन्निवेशः दोषाद्यसमवधानकालेप्य
नुभूयमानोऽज्ञानेन भ्रमानुपधानात् भ्रमान्यविशिष्टेति वैशिष्ट्यं च तादात्म्यं स्वपूर्वत्वं स्ववृत्तिक्षणवृत्तित्वं चेति त्रितयसंबंधेन वृत्ति
द्वयं कालिकेन तत्तु चाकचिक्यदर्शनादिदोषकार्यत्वस्य रजतत्वादिनानाधर्माघटितेन तादृशदोषविशिष्टत्वेनैव लाघवेनावच्छे

राद्भ्रमस्यापि तादृशकार्यतावच्छेदकाक्रान्तत्वात् दोषाद्यसमवधानकाले दोषादिसहकारिविरहात् भ्रमरूपकार्यानुत्पादे व्यभिचारस्यानापाद
कइति चेन्न तथा सति दोषादिकं विनापि रजतभेदाग्रहज्ञानेन रजताद्युत्पादनापत्तेः रजतभेदाग्रहज्ञानं विना रंगभेदाग्रहज्ञानसहकारेण दोषा
दिना स्वविशिष्टस्य रंगादेर्जननेन दोषादेः रजतभेदाग्रहज्ञानव्याप्यसामग्रीत्वसंभवात् तस्मात्स्वविशिष्टरजतत्वादिनैव दोषादिकार्यत्वाद्व्यभिचा
रवारणायोक्तविशेषणमावश्यकं भ्रमरूपस्यावच्छेदकतादात्म्येन भ्रमांतरेण व्यभिचारणाय भ्रमान्यदिति भ्रमत्वं च जातिविशेषः भ्राम्यामीत्याद्य
नुगतानुभवादिना सिद्धः तस्य चान्वयव्यतिरेकाभ्यां दोषजन्यधीव्यंगपत्वात् परतस्त्वं प्रमात्वस्य तु न तस्य लीयदोषरूपप्रतिबंधाभावे सतिसा
क्षिणो व विषयीकरणात् स्वतस्त्वं यद्यपि परोक्षप्रमाया विषयेरतीतानागतेरवच्छेदो न संभवति न वा विषयविषयिभावो ज्ञानाज्ञानयो
र्वविषये स्तरंगीकारात् प्रमाभ्रमयोरन्यो न्यूनत्वाभावात् ज्ञानव्यंजकत्वेन संस्कारादिजनकत्वेन च तत्र ज्ञानपदस्याकरेकविसृष्टुक्तत्वात्
तथापि परोक्षभ्रमस्यैवोपादानाज्ञानपरिणामीभूतविषयाणां समकालीनत्वान्नैरवच्छेदे बाधकाभावः स्वावच्छेदकस्यानेस्वनिरूपकेति वा निवे
शनीयं तथैवं प्रत्यक्षप्रमायाइव प्रत्यक्षभ्रमस्य विषयावच्छिन्नत्वानुभवविरोध इति वाच्यं तादृशानुभवस्य प्रमास्थलेपि परोक्षमसंगति
पन्नत्वादेकाज्ञानोपादकत्वेन भ्रमतद्विषययोरवच्छेद्यावच्छेदकभावोपचारसंभवाच्च अपरोक्षपरोक्षत्वे तु प्रमायाइव भ्रमस्यापि अनावृत राम रु॰
चित्त्वेवच्छिन्नविषयनिरूपितत्वं आवृतचित्त्वेवच्छिन्नविषयनिरूपितत्वं रूपएव अपरोक्षभ्रमविषयइव परोक्षभ्रमविषयेभातीति व्यवहा २१
राभावेनाभानोपादकावरणस्वीकारादनुमित्याद्यविवेकादावपरोक्षत्वादिव्यवहारस्येति विरहात् अथवाउक्तनिरूपितत्वविशिष्टधीत्वं

पेतेधीत्वं च रजतधीर्बुद्धिरित्यादिश्रुत्योक्तमिथ्यादिव्यावहारमेव कामादीनां पृथगुक्तेः॥ प्रत्यक्षप्रमामात्रनिवर्त्याज्ञानजन्यत्वप्रमा(मा)त्रनिवर्त्याज्ञानजन्यत्वाभ्यां
वा भ्रमप्रत्यक्षपरोक्षत्वयोर्व्यवहारः॥ तथा च भ्रमसूक्ष्मावस्थैव संस्कारो भ्रमविषये स्थाप्यः॥ यद्वा निरूपकताख्यसंबंधेन भ्रमे प्रतिस्वपरिणामा
व्यवहितपूर्ववर्त्यवस्थाऽज्ञानत्वेन भ्रमान्यस्वपरिणामनिष्ठविषयतासंबंधेन हेतुत्वे भिन्नकालीनयोरपि विषयतायाः संबंधत्वात् रजतादेरुत्प
त्तिपूर्वक्षणे रूप्यकसंबंधेनाज्ञाने त्वे रजतादेरपि संभवत्येव॥ ननु मूलस्य भ्रमस्य बाधेनादृढसंस्कारस्यापि बाधात्कथं भ्रमध्वंसस्मृतिरिति चेत् बाधोत्त
रमिदं रजतमासीदित्यादिस्मृतिर्न जायत एव॥ जायमानायाश्चात्रमे रजतभ्रम आसीदित्यादिस्मृतेस्तु तत्करणपरिणामरूपसंस्कारजन्यत्वा
त्वानुपपत्तिः॥ अथ प्रमाभ्रमवृत्तिसंस्कारदृढमूलकस्मृतिजनकत्वस्य प्रत्यादिजनकत्वस्य वासंभवः॥ भ्रमस्थले इदमादिप्रमावृत्तेः॥ रजताद्यनवगाहि
त्वाद्रजतादिभ्रमवृत्तेरिदमाद्यनवगाहित्वात् सुखादेर्वृत्तिसामान्याभावात्॥ इदं रजतमित्यादिप्रमास्थले द्रव्यत्वावच्छिन्नविशेष्यतानिरूपित
रजतत्वावच्छिन्नप्रकारताकनिश्चयत्वेन परमते हेतुत्वेपि सिद्धान्ते तदसंभवः॥ चित्यकचैत्यसंबंधावच्छेदेनापरवृत्त्याध्यासात् चिद्वृत्त्यसंबंधाना
मवच्छेद्यावच्छेदकभावाख्यनिरूप्यनिरूपकभावांगीकारेपि निरूपकताख्यवृत्तिविषयसंबंधानांतरांगीकारे मानाभावात्॥ अथ समूहालंबना
द्विशिष्टवृत्तेर्वैलक्षण्यानुरोधेन समूहालंबने विशेषणादेः प्रत्येकं निरूपकत्वे विशिष्टे तो च विशेषणविशिष्टविशेष्यस्यैव विशिष्टवृत्ति
निरूपकत्वे वा समूहालंबनवृत्तिनिरूपकत्वव्यावृत्ताखंडवैलक्षण्यवत्॥ अत एव विशिष्टवृत्तीनामपि विशेष्यविशेषणे तत्रापि विशेषणां
तरं विशिष्टस्यैव शिष्टमित्याद्यवांतरवैलक्षण्यानुपपाद्यतन्निरूपकत्वेप्येव मिथोव्यावृत्तवैलक्षण्यांगीकारान्निरूपकत्वे वाकारापर

पर्याप्तः कश्चन संबंधः तथाच विशेषणता विशिष्टविशेष्यनिरूपकतया विशेष्यादिगतविलक्षणानिरूपकता कायावाप्रमादेतेस्मत्यादिजनकत्वसंभ
वदिति चेन्न तादृशार्थत्वमात्रस्य संशयेत्यादिसाधारण्यात् निश्चयत्वस्य च ज्ञानत्वव्याप्यजातिरूपस्य सत्त्वाभावात् तादृशप्रमात्वेन हेतुत्वे
स्वप्ने रजतमित्याकारकभ्रमादपीच्छाद्युदयेन व्यभिचारात् तत्र तादृशभ्रमस्य हेतुत्वान्तरकल्पने गौरवादिति चेत् सत्यं तथापि विशिष्टस्मृती
च्छादौ विशिष्टाज्ञानाभावस्य प्रयोजकत्वसंभवः न च शुक्त्यादौ शुक्तिरजतादौ च विशिष्टाज्ञानस्यैवाप्रसिद्धेर्नैवमिति वाच्यं स्वावच्छिन्नविषय
ताकत्वस्तु तृतीय अज्ञानाश्रयतानवच्छेदकत्वं स्वावच्छेदकत्वे चेत्युभयसंबंधेन विशेषणविषयताविशिष्टाया विशेष्यसंसर्गविषयतायास्त्स्या
स्तत्तृतीयस्मृतीच्छादौ हेतुत्वसंभवात् विषयता च विशेष्यसंबंधस्तु तादृशाश्रयतानवच्छेदकत्वं च तादृशावच्छेदकत्वसंबंधेन स्वाश्रयत्वं ता
भाववत्त्वं तथा च शुक्तिरूप्यादिविषयतादेस्तादृशसंबंधाप्रसिद्धावपि शुक्तित्वाश्रयतादिप्रतियोगिकतादृशसंबंधेन शुक्तिरूप्यादिविषयत्वा
द्यभावप्रसिद्धेर्न दोषः अज्ञाने च प्रकृतेऽसत्त्वापादकं ग्राह्यं तेन परोक्षप्रमास्थलेऽज्ञानापादकाज्ञानसत्त्वेऽपि न क्षतिरेवं विशिष्टप्रत्यक्षत्वा
दिनापत्तेर्हेतुत्वादिकं तत्राभानापादकाज्ञाननिवर्तकनिर्वाच्यं यत्तु विशिष्टचाक्षुषत्वादिनापत्तेर्या हेतुत्वादि तत्रास्माकमप्युक्तरीत्या तथैवाज्ञा
नाभिभावकत्वं प्रमात्वेनैव नन्वेवं अज्ञानविषयतया सर्वसाक्षिभास्यमिति सिद्धान्तविरोधः प्रमायं विना शुक्तित्वमिह न जानामीति व्यवहा राम
रनियामकस्य साक्ष्यभिन्नचित्संबंधस्यानावृतशुक्तित्वादावभावात् तदभावे च साक्षिभास्यत्वकथनायोगादिति चेन्नोक्तव्यवहारनियाम २२
कसंबंधाभावेऽपि शुक्तित्वमिह न जानामीत्यज्ञानविशेषणतया शुक्तित्वावच्छिन्नविषयताकत्वस्येदमवच्छिन्नाश्रयताकत्वस्य चाज्ञानग

तस्य साक्ष्यनाद्दतसंबंधवतो व्यवहारे रोगोक्तसिद्धांतसंगतेः ॥ नचैवमज्ञाते घटं जानामीति व्यवहारो न स्यादिति वाच्यं इष्टत्वात्सविषय
कत्वस्त्रिविशेषणतयैव विषयाणां ज्ञातत्वांगीकारात् नहि कश्चिदनुभवति अज्ञातो घटो ज्ञातइति अतएव घटत्वेन प्रमोत्पादे घटत्वेनेमं
जानामि चैत्री[illegible]यत्वादिना तुन जानामीत्यनुभवः ॥ अथ प्रमावच्छुपरमे पीधादिविशेषणतया साक्षित्वाभास्यमाने भुक्तित्वादिविशि
ष्टइदमादौ जानामीति व्यवहारानुपपत्तिस्तावृत्तिचित्संबंधस्य तत्प्रयोजकत्वात्प्रमोपरमे चावरणसंभवादिति चेन्न नानाज्ञानपक्षे प्र
माकालइवेच्छादेरप्यतिकाले प्यज्ञानांतरावरणानंगीकारात् साकल्ययोग्यवृत्तित्वेनैवासत्वापादकाज्ञानाभिभावकत्वांगीकाराद्वा अ
तएवस्मृतौ प्रमात्वानंगीकारेपि तस्याअसत्वापादकाज्ञानाभिभावकत्वसंभवाद्योग्यत्वेनैवसंस्कारवारणादेकाज्ञानपक्षेपि साकार
योग्यवृत्त्यभावविशिष्टाज्ञानाभावस्यैव जानामीत्यादिव्यवहारादिनियामकत्वात्प्रमादिकालस्याज्ञानसंबंधावच्छेदकत्वानंगीकाराद्वो
पपत्तेस्साक्षाद्वा न्यूनाज्ञाने दुरुपहृवं ननु अज्ञानस्यावर्त्तकधर्मातिथ्ययस्यानीयत्वेन रजताद्भिमेदत व्याप्यतदवच्छेदकधर्मावच्छिन्नवि
षयताकस्य तस्य रजतादिभ्रमहेतुत्वसंभवे पिशुक्तित्वाद्यवच्छिन्नविषयताकस्य तस्य तद्धेतुत्वे न स्यात् शुक्त्याद्यव्याप्यत्वादि विशिष्टशुक्तित्वाद्यव
च्छिन्नविषयताकस्य तत्वेतस्य ये शुक्तिविषयाकारकतावच्छेदकव्याप्य घटत्वानवगाहिप्रमानभिभाव्यतावृत्तिविषयतावच्छेदकव्याप्यत्वाद्यनवगाहिन्यापि
शुक्तित्वावच्छेदेन रजतादिभेदप्रकारकोद्बुद्धसंस्कारविशिष्टयोक्तप्रमयातदभिभवसंभवइति चेन्न तद्विशिष्टायाअपि शुक्तित्वा
दिप्रमायास्तदभिभावकत्वस्य शुक्तित्वादिमात्रावच्छिन्नविषयताकाज्ञाने रजतादिभ्रमहेतुत्वस्य वाकरेशुक्तेरखंडचिदाकारवस्म

यत्ते स्तथाज्ञानाभिभावकत्वानुपपत्तेश्च तयोर्व्यावर्त्तकधर्मागोचरत्वादुक्तसंस्काराविशिष्टत्वाच्चेति चेत्सत्यं व्यावर्त्तकधर्मानाकलकत्वेप्यन्व
यथातिरिक्तास्यामुक्तज्ञानस्य भ्रमहेतुत्वादुक्तज्ञानप्रमयोश्चाभिभाव्याभिभावकभावांगीकारात् किंच शुक्तित्वाद्यवच्छिन्नविषयताकज्ञा
नस्य रजतादिभ्रमहेतुत्वं शुक्तित्वादिप्रमायास्तद्ज्ञानाभिभावकत्वं चैवा कार्येषूक्तेन तद्ज्ञानविषयतावच्छेदकशुक्तित्वादौ रजतादि
भेदावच्छेदकत्वाविरोधितत्वमुक्तं न चोक्तसंस्काराविशिष्टमुक्तप्रमायामुक्तं च खण्डचिदाकारवस्मादेनैरखण्डचिदाकारज्ञानाभिभाव
कत्वं नानुपपन्नमविद्यादिरूपस्य फलस्य प्रपंचानात्मत्वे च स्थेति प्रतिसंधानानुपपत्तस्य दार्ढ्योपजनमन्यो दृढसंस्कारसहकृतत्वात् न चावि
द्यादिकं सत्त्वस्य चेति भ्रमस्य दृढत्वं नाविद्याद्यात्मकमिति ज्ञानस्यैव परमतत्रीत्या विरोधित्वं न तु उक्तसंस्कारसहकृतस्य शुद्धचिन्मात्रज्ञान
स्येति वाच्यं इदं रजतमित्यादिज्ञाने शुक्तित्वाद्यवच्छेदेन रजतान्यत्वगोचरो दृढसंस्कारविशिष्टस्यैव शुक्तित्वादिज्ञानस्यैव शुक्तित्वा
द्यवच्छेदेन रजताद्यन्यत्वगोचरो दृढसंस्कारविशिष्टस्य शुक्तित्वादिसामान्यस्यापि शुक्तौ रजतमित्यादिधीविरोधित्वौचित्यात् तन्न्या
येन प्रकृते विरोधित्वसंभवात् किंच परैरपि घटो न घट इत्यादिभ्रमे घट इत्यादिज्ञानस्यैव निर्धर्मितावच्छेदककस्य विरोधित्वमुच्यते तत
न्यायेन शुद्धचिति तदन्यत्वरूपजडत्वविशिष्टस्याविद्यादिभ्रमं प्रति शुद्धचिन्मात्रगोचरज्ञानस्य विरोधित्वं निष्प्रत्यूहं न च परमते ता नाम
दृशभ्रमेच्छाविरहविशिष्टस्यैव तादृशज्ञानस्य विरोधित्वं सिद्धांते तु उक्तज्ञानमात्रस्य विरोधित्वमिति वैषम्यमिति वाच्यं द्वैतमात्रवीत २३
रागपुरुषश्रवणमोक्षहेतुतादृशज्ञानोदयेन तादृशज्ञानस्यापि द्वैतभ्रमेच्छाविरहविशिष्टत्वात् किंचाहं ब्रह्मास्मीति वाक्यजन्यज्ञानस्य नाहं दे

ह्येत्यादिश्च मविरोधितावच्छेदकविषयताकत्वं परमतेऽङ्गीक्रियते तथा च शुद्धचिन्मात्रे तदज्ञानाभिभवप्रयोजकविलक्षणाकारत्वं कार्यैरो
वनिर्वाहे किमिति तस्य सप्रकारकत्वनिर्वन्धश्च विलक्षणाकारे च तत्त्वंपदार्थतावच्छेदकपरामर्शपूर्वकतत्त्वंपदार्थलक्षणज्ञानाबोधनाज्ञानादिश्चा
दसामग्र्या एव नियामकत्वमित्यन्यत् नन्वौपनिषदानामपि तादृशज्ञानं शुद्धचिदाकारत्वं किमिति निर्वन्ध इति चेदौपनिषदं पुरुषं पृच्छामि
नावेदविन्मनुते तं बृहन्तं पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन् यन्मनसा न मनुत इत्यादिश्रुतिभिश्च तास्त्वयो
नित्वादित्यादिन्यायात् घटः सन्नित्यादिप्रत्यये घटाद्यवच्छिन्नचित एवं विषयत्वांगीकारात् सुखादीनां साक्षिभास्यत्वेन मनसश्चा
तेऽपेण प्रमाणत्वाकल्पनाद्दृश्यते त्वग्र्यया बुद्ध्या इत्यादिश्रुतौ च तृतीयायाश्च कर्तृत्वमात्रार्थत्वादनवच्छिन्नचित उपनिषदेकगम्यत्वश्रि
श्रवणादुपनिषदश्चोपक्रमादिभिः शुद्धचित्येव तात्पर्यग्रहात् प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः तमेव विदित्वातिमृ
त्युमेति इत्यादिश्रुतिभ्यश्च तस्याज्ञातत्वोक्तेः अज्ञानकार्योपहितचितोऽज्ञातत्वासंभवात् जीवेशभेदाद्यनादिपदार्थानां च संसारदशायां भास
मानत्वेन तदुपहितचितोऽप्यज्ञातत्वासंभवात् शुद्धचित्येवाज्ञातत्वपर्यवसानात्तस्यैव श्रुतितात्पर्यविषयत्वात् तज्ज्ञानस्यैवोक्तरीत्याऽविद्या
भिभावकत्वसंभवेऽधिकांशतात्पर्ये मानाभावाच्च ननु शुद्धचिति श्रुतेस्तात्पर्येऽपि श्रुतिजन्यतज्ज्ञानेऽर्थान्तरस्यापि दैववशात्संपन्नत्वाद्व
संस्कारादिसामग्रीबलात्तद्भाने तस्याप्यज्ञानाभिभावकत्वं भवत्विति चेन्न वत्येव न च तमेवेत्यादिश्रुतिविरोध इति वाच्यं एकधैवानुद्रष्ट
व्यं कोऽसौ मोहः कः शोक एकत्वमनुपश्यत इत्यादिके केवलार्थकैकपदघटितश्रुत्यैकवाक्यतया चिदंशसंसर्गगोचरत्वमात्रस्यैवोक्तेश्च

त्वाबोधनात्तस्य॥ शुद्धचिदज्ञानाभिभावकप्रयोजकशुद्धचित्प्रकाशत्वस्य न्यायप्राप्तस्यानुवादमात्रत्वाच्च सम्यग्ज्ञानत्वेन विषयार्थान्तरग्राहिशु
द्धचित्प्रकाशज्ञानस्य मोक्षजनकत्वाव्यवच्छेदकत्वात्तदर्थोपमर्दनादिति चेत् शुद्धिं ध्याता सोऽनन्ततत्त्ववित् न शुद्धिमर्हत्यनर्द्धोद्योगः तत्त्वस्य वेदितेत्या
दिकमविद्यानन्तत्वज्ञाने स्यात् श्रोतरविषयकेप्यज्ञानाभिभावकत्वमङ्गीकृत्योक्तं ध्यानदीपिकायां विद्यारण्यश्रीचरणैः॥ अन्यथातिरिक्तत्वेन
सम्पातिपदिकमात्रान्वय इति पञ्चपादिकायुक्तिः॥ संसर्गासंगि सम्यग्धीहेतुतेति तत्त्वप्रदीपिकायुक्तिश्चोक्तरीत्यानेया यदि तु मोक्षहेतुज्ञाने
तत्त्वातिरिक्तं न भासत इति नियमो द्वैताद्वैतबुद्ध्योर्न योगपद्यमिति विद्यारण्यानुमतेन मसवह लालोकयोरिव तयोर्विरोध इति तत्त्वदीपना
र्थं न दाराग्न्यसम्पर्कमित्यादिजिज्ञासायाः तत्रभानप्रतिबन्धकत्ववत्त्वीतयागस्य तत्त्वजिज्ञासायास्तत्वे तत्रभाने प्रतिबन्धकस्य संभवा
त्वानुपपत्तिरिति ध्येयं ननु कृज्ञानमुद्दिश्य विषयभोगमात्रतिरस्कारेण प्रवृत्त्यनुपपत्तिः॥ तस्य भोगमात्रापेक्षयोत्कर्षाभावात् सुखदुःखा
भाव तत्साधनान्यत्वेनोद्देश्यत्वासंभवाच्च ननु मोक्षरूपनिवृत्तिद्वारा यनित्यसुखसाधनत्वेन तादृशज्ञानस्य सातिशयविनाशिभोगमात्रति
रस्कारेणोद्देश्यतेति वाच्यं मोक्षस्य चिन्मात्रत्वेऽसाध्यत्वादनुपपत्तेः॥ चिदन्यत्वे अन्तोऽन्यदार्त्तमित्यादिश्रुत्या मिथ्यात्वादिहेतुकानुमित्यादिना
च विनाशित्वात् न चाविद्याध्वंसोपहितात्मैव मोक्षोऽविद्याध्वंसस्य सदसदनिर्वाच्येभ्योऽभिन्नोऽविद्यानुपादानकत्वाद्विद्याविशिष्ट राम
प्रसेवाविद्याया उपादानत्वात् तद्ध्वंसस्य च तत्कालीनरूपत्वे द्वैतशिष्टाभावान्न यथा चाविद्याध्वंसोपहितचितः स्वानवच्छिन्नानन्दभानरूप २४
त्वेनाविद्याध्वंसस्यावच्छिन्नत्वसकलानन्दतिरस्कारेण काम्यत्वसंभवात् तत्साधनस्यापि तथैव काम्यतेति वाच्यं उक्तध्वंसस्याविद्यानुपा

दानकत्वेपि दृश्यत्वादेर्दृष्टैव मिथ्यात्वसंभवाद्दृक्दृश्ययोः संबंधानुपपत्तिरूपात् उक्ततर्केण व्याप्तिनिश्चयादिति चेत् सत्यं मिथ्यात्वेपि नाद
द्यध्वंसस्याविद्यानुपादानकत्वाद्घटादीनामिव ध्वंसत्वेनाविनाशित्वसंभवात् अविद्याध्वंसस्य ध्वंसे अविद्योन्मज्जनप्रसंगात् तदुपहितात्मस्व
रूपस्य मोक्षस्य नित्यत्वेनानित्यसकलपुरुषार्थापेक्षया उत्कर्षात् न च विषयसुखस्येवानवच्छिन्नसुखस्यैवान्येच्छानधीनेच्छाविषयत्वं न तु तज्ज्ञा
नस्य तथा च तज्ज्ञानस्य सुखदुःखाभावो प्रतिसाधनत्वेनैव काम्यता वाच्या तच्च तस्य न संभवतीति काम्यत्वासंभव इति वाच्यं चिद्रूपस्य सुख
स्याद्वतस्याकाम्यत्वेन सुखभानस्यैव सर्वत्र काम्यत्वात् विषयसुखस्थलेपि चंदनादिसंयोगजन्यमनोवृत्तिविशेषादानंदापादकावरणा
णांगीकारेण तद्विशिष्टचित एवात्मसुखभानरूपायाः काम्यत्वात् या च गतिरन्येच्छां विनैव काम्यते सा पुरुषार्थ इत्यभ्युपगम्य
ते अत एव सुखं मे भविष्यति महत्परं तु तव न भास्यतीति प्रतारितस्तत्सुखं न कोपि कामयते न चावरणनाशं कल्पयित्वा तद्विशिष्टचितः
सुखभानत्वकल्पनाद्वरं चिद्रूपमनोवृत्तिविशेषस्यैव सुखमिति वरं कल्पनामिति वाच्यं मनोवृत्तिं विनापि सुषुप्तौ चिद्रूपसुखभानस्य सुख
महमस्वाप्समिति जागरितस्मृत्युदयात् न चाविद्यावृत्तेरेव सुषुप्तौ सुखं संभवतीति वाच्यं चित्सुखस्यैव निर्वाहे तदा तत्कल्पनागौरवात्
रजोगुणोद्रेकस्यावरणस्याभावादेव तदानीं तज्ज्ञानसंभवात् अत एव विषयसंयोगेन वासनाक्षयेण वा अंतःस्थैर्यतारतम्येन सुखभान
तारतम्यं किंच मा न भूवं भूयासमित्यन्येच्छानधीनेच्छायाश्चिदात्मनि दर्शनात् सुखमेव सः न च बलवद्व्याधिपीडायां माभूवमिति द्वेष
स्याप्यन्येच्छानधीनस्य कदाचिद्दर्शनात् दुःखमपि तत्स्यादिति वाच्यं तादृशद्वेषस्य दुःखद्वेषेणैवोदयात् अभ्युपगमे मा न भूवं इति

इच्छायाश्चेदयात् आनंदरूपममृतं यद्विभाति एषोस्य परमानंदः॥ भूमैव सुखं नाल्पे सुखमस्ति विज्ञानमानंदं ब्रह्म आनंदो ब्रह्मे त्यादिश्रु
त्यात्मन आनंदत्वोक्तेः॥ न च नाल्पे सुखमिति स्वारस्येन भूम्नि सुखमित्यर्थः॥ इति वाच्यं भूमात्वेव विजिज्ञासितव्य इत्यग्रिमस्य भूमैव सुख
मित्यस्य च सावधारणस्यानुसारात् अल्प इत्यस्य वाल्पमित्यर्थकत्वात् परमप्रयोजनत्वेन भूम्न एव प्रकरणप्रति[illegible]पाद्यत्वात् भूमासं
प्रसादा[illegible]दध्युपदेशादिति न्यायात् प्रियोन्यस्मात्सर्वस्मादंतरतरं यदयमात्मेत्यादिश्रुतिभिः॥ स्वान्यसर्वापेक्षया आत्मनः॥ प्रियत्वोक्तेः॥ अ
त एव [illegible] दुःखाभावस्य पुरुषार्थतावादोप्यपास्तः॥ सुखव्यंजकत्वेनैव तस्य काम्यत्वाच्च दुःखाभावापेक्षया सुखलघुता [illegible] त
तस्मान्नित्यं देवसुखमिति तस्यावरणावि[illegible]क्षेपध्वंसोपहिताया मोक्षत्वमव्याहतं वस्तुतस्तु चिदन्यस्य विनाशिनो तत्वज्ञानार्थी
नाविद्याध्वंसस्यानंगीकारेपि न क्षतिः॥ चित एव तत्वज्ञानतत्संस्काराद्युपहितायात् व्यवहारनियामकत्वसंभवात् निवृत्तिरात्मामो
हस्य ज्ञातत्वेनोपलक्षित इति वार्तिकाद्युक्तेः॥ तत्वज्ञानार्थीनाग्निमसमयसंबंधवत्वस्य तत्वज्ञानाभावप्रयोज्याविद्यात्मकाभावप्रति
योगित्वस्य वा तत्वज्ञानसाध्यत्वस्यानवच्छिन्नसुखरूपमोक्षरूपात्मनि संभवात् दंडाद्यस्याग्निमक्षणासंबंधः॥ दंडाभावात् घटाभावद्गति
वत् तत्वज्ञानादिहानीश्च नवच्छिन्नं सुखं प्राप्तं तत्वज्ञानाभावादत्राहमिति प्रतीतेः॥ वस्तुगत्या तत्सुखस्यासाध्यत्वेपि साध्यत्वभ्रमे नाम
णेव सर्वत्र प्रवृत्तिस्वीकारात् तादृशासाध्यत्वस्यैव लोकसिद्धस्य श्रुत्यादिभिरनुवादात् एवं च ब्रह्मप्रमाया एवाज्ञानध्वंसत्वांगीका २५
रपक्षेपि न क्षतिः॥ अथ ब्रह्मप्रमाया अविद्याध्वंसत्वे तन्नाशकाले कथमविद्यानाश्यव्यवहारः॥ यद्वि चोत्र मोत्र रमनः॥ प्रदिशमानामे
णापि प्रवृत्तिसंभवाच्च तादृशभ्रमस्य चापरोक्षतत्वज्ञानेन निवर्त्यत्वात् येवाधिकसुखस्यापि नित्यचिद्रूपत्वेन तदर्थमपि साध्यत्वभ्रमेर

वपूर्वपूर्वमनःपरिणामध्वंसत्वात् घटनाशस्य घटप्रागभावनाशत्ववत् प्रमानाशादिरेवाविद्याध्वंस इत्युच्यते तथापि विदेहकैवल्यप्राक्
नचरममनःपरिणामध्वंसः क इति पर्य्यनुयोगावकाशकत्वं यदि च तद्ध्वंसो नाभ्युपेयते तद्व्यवहाराभावादित्युच्यते तदपि तादृशपरिणामध्वंसाग
त इति पर्य्यनुयोगानुद्धारादिति चेत्तर्हि यत्र ध्वंसोंगीकृतः तत्र प्रतियोगिध्वंसागत इति पर्य्यनुयोगात्कथं निस्तारः अथ तत्र प्रतियोगी घटादि
ध्वस्त इति चेत्सत्यमुक्तं किंतु ध्वंसः प्रतियोग्यवस्थाविशेषो वा प्रतियोगिनोऽत्यंतभिन्नो वा आद्ये प्रतियोगिनः पूर्वावस्थाध्वंसा गतेति पर्य्यनु
योगः अंत्ये ध्वंसस्य ज्ञातत्वेपि प्रतियोगी क्वगत इति पर्य्यनुयोगः दुरुद्धरः अथ ध्वंसकालात्पूर्वं प्रतियोगिप्रमाणगोचरत्वेन ध्वंसकालेन
तु कथंचिज्ज्ञातो ध्वस्त इतिव्यवहारार्थं तु ध्वंसोंगीक्रियत इत्युच्यते तर्हि प्रकृते विदेहकैवल्यपर्यंतं व्यवहारस्योपकारीत्यासंभवात् तदुत्तरं चच
रमपरिणामस्य प्रमागोचरत्वात् व्यवहारस्येवाभावेन ध्वंसानंगीकारेपि क्षत्यभावान्नकाप्यनुपपत्तिरिति सुचिरं विभावनीयमथ
ध्वंसकाले प्रतियोग्यसत्तायां ध्वंससामग्र्यव नियामिका तद्देशावच्छेदेन ध्वंससामग्रीमत्क्षणत्वस्य तद्देशावच्छेदेन प्रतियोगिमान्यःका
लः तत्पूर्वत्वानधिकरणत्वव्याप्यत्वात् तत्प्रतियोगिध्वंसस्य तत्सहानवस्थाननियतत्वाच्च उक्तं च चरमपरिणामस्य तु पश्चादसत्तायां राम
नियामकाभाव इति चेन्न प्रारब्धभोगतत्कर्मणः देहादिनिवृत्तौ प्रतिबंधकत्वेन विदेहकैवल्यपर्यंतमनोवृत्त्यादिरूपस्य प्रारब्धभो २६
गोपयुक्तप्रपंचस्य सत्त्वेपि अग्रेतदसत्तायां तत्वप्रमायास्तत्वाज्ञाननतत्प्रयुक्तपूर्वावस्थानं नियतत्वादिति दिक्॥ ॥इत्यद्वैतसि
द्धांतविद्योतने परमहंसपरिव्राजकश्रीब्रह्मानंदसरस्वतीविरचिते प्रथमपरिच्छेदः॥ ॥श्रीः॥ शुभमस्तु॥ श्रीगुरुभ्यो नमः॥ शुभमस्तु

इत्यद्वैतसिद्धांतविद्योतने प्रथमपरिछेदः समाप्तः॥

स्वामिता:-ब्रह्मानन्द सरस्वती

ॐ श्रीगणेशाय नमः॥ सदनंतचिदानंदे जगतीयत्रजायते रजतादीवभ्रुत्पादो तदेवाहंपरागतिः॥ नन्वदेशांतरीयरजतादेरेवभानेनोपप
त्ताविदं रजतमित्यादिभ्रमस्थले शुक्त्यादौ रजताद्युत्पत्तिकल्पने गौरवमिति चेन्न रजतादौ चक्षुरादेः सन्निकर्षं विना चाक्षुषाद्यनुपपत्तेः
न च लौकिकविषयतासंबंधेनैव चाक्षुषादिकं प्रति चक्षुरादिसंप्रयोगस्य हेतुत्वादलौकिकचाक्षुषादिकमलौकिकज्ञानलक्षणादि
संप्रयोगेनैव भविष्यतीति वाच्यं सुरभिचंदनमित्यादौ सौरभं पश्यामीत्यादिप्रत्ययाभावेन विषयतासंबंधेन चाक्षुषत्वावच्छिन्ना
धिकरणतायाः सौरभादौ सत्वे मानाभावेनालौकिकान्यविषयतासंबंधेन चाक्षुषाद्युत्पत्तये ज्ञानलक्षणादेः॥ सन्निकर्षत्वस्य कल्पयि
तुमशक्यत्वात् सौरभं स्मरामीत्यादिप्रत्ययाभ्युपगमेन विषयतासंबंधेन स्मृतित्वावच्छिन्नाधिकरणतायास्तत्र स्वीकारात् यु
गपत् ज्ञानद्वयमानाभावेप्येकस्मिन्नेव ज्ञाने चाक्षुषत्वादिस्मृतित्वादिसत्वे बाधकाभावात् साक्ष्यांशिकत्वयोः॥ प्रामाणिकैर्या
दृशत्वस्याप्रामाणिकत्वात् चाक्षुषत्वादेर्विषयितावच्छेदकपर्यन्तस्य संभवाच्च लौकिकालौकिकत्वविशेषाभावेन विषयतासंबंधेन
चाक्षुषमात्रे लाघवात् संप्रयोगहेतुत्वांगीकारात् इदं रजतं पश्यामीत्याद्यनुभवेन भ्रमस्थलेपि लौकिकविषयत्वावश्यकत्वाच्च
अन्यथा रजतादेर्लौकिकप्रत्यक्षं विना रजताद्यानयनादौ प्रवृत्त्यनुपपत्तेः॥ अथ संप्रयोगस्य वदोषस्याप्यन्वयव्यतिरेकाभ्यां प्रत्य राम
क्षहेतुत्वमिति चेन्न शुक्त्यादौ रजताद्युत्पत्तौ स्वीक्रियमाणायां अवश्यं संप्रयोगहेतुत्वेनैवोपपत्तेः॥ प्रथमक्षणे चाक्षुषाद्यसंभवे १
पि मन्मते साक्षिभास्यत्वेनैव प्रातिभासिकत्वोपपत्तेः॥ द्वितीयादिक्षणेषु संप्रयोगसत्त्वात् तृतीयादिक्षणेषु नित्यसिद्धसाक्षिणा

१

अद्वैतसिद्धांतविद्योतनप्रथमपरिच्छेदारंभः

१

चाक्षुषादिवृत्तिविषयकस्य रजतं पश्यामीत्याद्याकारस्य संभवात् तन्मतेपि विशिष्टवैशिष्ट्यगोचरजन्यप्रत्यक्षस्य विशेषणतावच्छेदकप्र
कारकज्ञानादिजन्यत्वेनानुव्यवसायस्य च व्यवसायरूपविषयजन्यत्वेन तृतीयक्षणे दोषवत्तादृशानुभवस्य संभवात् किंच विषयदोषस्य
कारणत्वस्यैव तत्कार्यतारजतादिलौकिकप्रकारतानिरूपितसंसर्गतानिरूपितविशेष्यतासंबंधेन चाक्षुषत्वादिना वाच्यौ तथा च ला
घवात्तादात्म्यादिसंबंधेन रजतत्वादिनैव साध्यतामिंद्रियनिष्ठकाचादिदोषस्यापि शंखादिविषयविशेषणएवपीतत्वादिभ्रमविशेषज
ननात्तादृशविशेषणनिष्ठेन स्वाश्रयसंयोगादिहेतुत्वेन तत्कार्यतापि समवायादिनापीतत्वादिनैवाच्यतां एवमात्मनिष्ठस्य रागादिदोषस्य
हेतुत्वस्थलेपि रजतत्वादिनैव न च तत्र रजततादात्म्यप्रत्यासत्त्यसंभव इति शंकनीयं शरीराद्यवच्छेदेन ज्ञानादेरिव शुक्तीदंत्वादिविशिष्टा
वच्छेदेन रजततादात्म्यसमवायेबाधकाभावात् तत्प्रत्यासत्त्यैव कार्यत्वसंभवादतएवभ्रमस्थले रजताद्युत्पत्यंगीकारे दोषरहितस्यापि
तत्प्रत्यक्षमस्त्विति परास्तं तत्तद्व्यक्तिसमवेतविषयकप्रत्यक्षे तादात्म्येन तत्तद्वस्तुत्वेनहेतुत्वात् न च मनसा रजतादिकं साक्षात्करोमी
त्यनुभवापत्तिरिति वाच्यं मनःसन्निकर्षविलंबेन सुखादिसाक्षात्कारस्य विलंबादर्शनेन तस्य तत्र हेतुत्वाकल्पनात् साक्षात्कारत्व
स्यैव जन्यसाक्षात्कारत्वस्यापींद्रियसन्निकर्षजन्यत्वव्याप्यत्वेमानाभावात् ननु तथाप्यहं सुखीति वदहं रजतवानित्यादिप्रत्ययप्र
मास्यादिति चेन्न अहमिहैवास्मि तिप्रत्ययस्य विशेष्यतावच्छेदकीभूततत्तच्छरीरावच्छेदेनेतद्देशमात्रसंयोगित्वावगाहित्ववदुक्त
प्रत्ययस्यापि तत्तदवच्छेदेन रजताद्यवगाहित्वेनभ्रमत्वात् परमतेपि शरीरभिन्नत्वेनैवात्मनोहमाकारप्रत्ययविषयत्वात् ननु

कैरीकायोमिश्रैः॥ ये प्यहंकारास्पदस्यात्मत्वमास्थियते तैरप्यहमाकारप्रत्ययस्यातात्त्विकत्वमभ्युपेयम् अहमिहैवास्मि सदने जानान इत्या
द्यैः सर्वगतस्यात्मनः प्रादेशिकत्वानुभवादिति देहावच्छिन्नमात्रसंयोगित्वरूपप्रादेशिकत्वस्य शरीरावच्छेदेनात्मनि सत्वेपि तत्रशरी
राभेदस्य विरहेणाहं प्रत्ययस्य भ्रमत्वरूपमतात्त्विकत्वमित्यर्थः॥ नच रागादिदोषप्रत्यक्षे वा विषयतैव लाघवेन हेतुः हेतुमज्ज्ञावागी
कारात् कथं तत्र भ्रमविषयोत्पत्तिरिति वाच्यं येन प्रकारेण रागस्तेनैव प्रकारेण तस्य प्रत्यक्षभ्रमे हेतुत्वेन विषयतावच्छेदकत्वसंबंधेनैव
हेतुतद्भावस्य वाव्यतया तदवच्छेदकयोस्तत्तुल्यवीयत्वस्यावश्यं निवेश्यतया तदपेक्षया रजतादिरागत्वेन रजतत्वादिना समवायेन त
दुत्कर्षकत्वात् अन्यथा कार्यतावच्छेदकसंबंधे विषयतानिरूपितत्वावच्छेदकतात्वेपर्गौरवेप्यविशेषणभावविनिगमकविरहेण
हेतुताद्वयस्य संबंधतावच्छेदके गौरवस्यचापत्तेः॥ सकलविषयेषु रागानुदयेन पुनरुत्थापेक्ष यावद्विषयाधिक्येपि विषयनिवेशाकृत
गौरवाभावात्॥ अथ तत्र रजतादेः शुद्धसमवायेन कार्यत्वे इदंत्वादिविशिष्टावच्छेदेनात्मसमवायनियमासंभवः॥ समवायस्य तद्व
च्छिन्नतानियामककारणकल्पने तु गौरवमिति चेन्न अवच्छेदकतासंबंधेनेदंत्वादिविशिष्टावच्छिन्ने प्रतीदंत्वादिना तादात्म्येन हेतु
त्वस्य संयोगादी इदमाद्यवच्छिन्नत्वनियमाय क्लृप्तत्वेन तत्तद्वरागादिजन्यरजतादेरिदमाद्यवच्छेदकनियमसिद्धेः॥ अत्यावयविना राम
मपि घटादीनां पटाद्यनुयोगिकवाय्वादिसंयोगाद्यवच्छेदकत्वानुभवेनेतद्धर्मापि स्वावच्छिन्नस्यावच्छेदकतयात्पन्नोहेतुत्वस्य क्लृप्तत्वा २
त् गुणादेरागादिपुरुषदोषजन्यभ्रमे मानाभावेन गुणादेः स्वावच्छिन्नहेतुत्वस्याक्लृप्तत्वेपि क्षतिविरहात्॥ वस्तुतस्तु रागादिपु

उभयदोषजन्यरजतादेर्गुणावच्छिन्नात्मसमवेतत्वनियामककल्पने फलमुखत्वाद्वनगौरवं दोषः॥ एतेन स्वाप्नादिभ्रमे इदं रजतमित्याका-
कारके इदंत्वादिमतो रजतादेश्च द्वयोरप्यारोपात् तत्र तस्य स्वावच्छिन्ने प्रति हेतुत्वस्याक्लृप्तत्वेन तत्कल्पने गौरवमिति परास्तं इदमादिरजता-
द्योः परस्परावच्छिन्नत्वनियामककल्पनस्य फलमुखत्वात् एवं च विषयगतसत्यासत्यादोषस्य कारणत्वस्य लोपित तु उभयत्रारोपित-
स्यात्मनापि ग्रहणावारणाय तत्तु उभयसमवेतत्वेन वाकविकल्पदर्शनत्वादिकारणतावच्छेदकमिव रजतत्वादिके कार्यतावच्छेदकमपि विशि-
ष्टतो वा क्लृप्तत्वादिनात्र दोषकार्यतागौरवेपि तत्र तद्विशेष्यराम्यावच्छेदकत्वात् अन्यथैकपुरुषीये चाक्षुषादिभ्रमापत्तेः॥ जपाकुसुमा-
दिसन्निधानदोषस्य हेतुतास्थले स्फटिकलौहित्यादेरेकस्यैव सर्वैर्ग्रहणाभ्रान्तिधिरेहणमन्मतेपि कार्यतावच्छेदके तदनिवेशः॥ अ-
थविषयनिष्ठसत्यासत्यादोषहेतुतास्थले रजतादिनिष्ठा कार्यता केन संबन्धेनेति चेत् येन संबन्धेन रजतादिश्चाक्षुषादिभ्रमनिया-
मकतातेनेव तर्हि समवायेन रजतादिप्रकारकभ्रमस्थले समवायेन रजताद्युत्पत्तेरसंभवः॥ तत्र क्लृप्तकारणताकस्य रजतावयवत्वसं- त ५
योगादेरभावात् अन्यथाख्यातिमते प्रत्यक्षे संप्रयोगदोषयोरिव मन्मतेपि रजतोत्पत्तेरवयवादिदोषयोर्विकल्पनेन हेतुत्वमिति चेन्न हि-
न्यथाख्यातिमते बाह्यसन्निकर्षाणां कार्यतावच्छेदके चाक्षुषत्वादेः स्वविशिष्टत्वनिवेशापेक्षया भवन्मते रजतत्वघटत्वपटत्वाद्यनंत-
धर्मेषु रजतावयवकपालतंतुतत्संयोगादीनां कार्यतावच्छेदकेषु तद्विशिष्टत्वनिवेशे महागौरवं एवं स्पार्शनत्वेन भूतचतुष्टयमात्रवृत्ति-
जातिविशेषेण वा समवायेन जन्यद्रव्यं प्रति पृथिवीत्वादिना गंधादिके प्रति हेतुत्वस्य क्लृप्तत्वादात्मनि समवायेन द्रव्यगंधाद्युत्पत्तिप्रसं-

भेदेन तादृशहेतुतानिरूपितकार्यतावच्छेदकं तादृशकारणतावैशिष्ट्येन विशेषणीयमिति महागौरवमिति चेन्न एवं अन्यथाख्यातिमते हि रज
तादिप्रकारतानिरूपितसंसर्गतानिरूपितविशेष्यतादिसंबंधेन दोषकार्यत्वे वाच्ये रजतादिनिष्ठत्वप्रकारतात्वयोस्तादृशप्रकारतानिरू
पितत्वसंसर्गतात्वयोः तादृशसंसर्गतानिरूपितत्वविशेष्यतात्वयोर्विशेष्यविशेषणभावविनिगमकाभावाद्धेतुतद्भाववाहुल्ये
न तन्मतापेक्षयापि महागौरवं अवयवतत्संयोगाद्यपेक्षया दोषाणामनेतानां कार्यतायामवच्छेदकस्य सर्वत्र गुरुशरीरत्वाच्च अथ संबं
धतावच्छेदकमनिवेश्य वसंबंधावाच्यः संबंधाननुगमस्यादोषत्वात् ज्ञानभेदेन भिन्नानामपि त[द्वि]शेष्यताव्यक्तीनां संबंधत्वसंभवादि
ति चेन्न एकस्माद्दोषात् नानाचाक्षुषोत्पत्तिस्थले तत्तद्ज्ञानभेदेन विशेष्यताभेदात्तत्तद्विशेष्यताव्यक्तिसंबंधेन तत्तद्दोषविशिष्टचा
क्षुषत्वे कार्यतावच्छेदके वाच्ये तथा चैकजातीयसंबंधेन कार्यतावच्छेदकावच्छिन्नवृत्तिवृत्तिमानाभावस्य प्रतियोगितानवच्छेदकं कारणता
वच्छेदकमित्यवरीत्या संबंधाननुगमकारणतैकस्यैव कुत्राप्यशक्यतया संबंधेनावच्छेदक निवेशस्यावश्यकत्वात् अन्यथा प्रकारवि
धयाऽवच्छेदका ननुगमस्याप्यदूषणतापत्तेः दोषजन्यरजतत्वप्रतियोगिकतत्तत्समवायादीनामननुगतानामेव रजतावयवादिकार्य
ल तावच्छेदकस्य मयापि वक्तुं शक्यत्वेन तन्मतेपि गौरवापत्तेश्च अथ ज्ञानभेदेपि विषयत्वाभेदस्वीकारात् उक्तविशेष्यताव्यक्तेश्चाक्षुषादि राम
व्यक्तिभेदेप्येकत्वात्तद्व्यक्तित्वेनैव संबंधत्वे तस्या वाच्ये रजतत्वावच्छिन्नप्रकारतायाश्च संबंधतावच्छेदकाघटकत्वेपि वक्तुं गत्या क्वचिद्विशेष्य ३
तानिरूपकत्वाद्दोषनियम्यत्वमिति चेन्न उक्तप्रकारताव्यक्तेस्तत्रैको किंकृतस्य वा कार्यतावच्छेदकाघटकत्वे आकस्मिकतापत्तेः सकथमीव

छिन्नविशेष्यताव्यक्तेरेकत्वेपि परस्परानधिकरणवृत्तिनानाधर्मावच्छिन्नविशेष्यताकभ्रमोत्पादकैकजातीयदोषस्थले तादृग्धर्मसमस्तस्या
कानीततज्जातीयदोषकार्यत्वात् तज्जातीयदोषविशिष्टत्वेन तत्तद्विशेष्यताव्यक्तिसंबंधैर्वाच्यत्वानीतेगौरवात्स्वावच्छेदकसंबंधभेदेन कार्यताभेद
स्यावश्यकत्वात् इदंरजतत्वावच्छिन्न[illegible]किकप्रकारतानिरूपितताद्दात्म्यसांसर्गिकविषयतानिरूपितविशेष्यतात्वेन लौकिकतत्प्रकारताव्य
क्तिनिरूपितविशेष्यतात्वेन वा संबंधेन स्योक्ता उक्तधर्मसमस्तस्य कार्यत्वाभावेपि संबंधघटकानां विशेषणविशेष्यभावाविनिगम्यत्वेनो
क्तगौरवस्यावश्यकत्वात् तदपेक्षया लाघवेन तज्जातीयदोषविशिष्टरजतत्वेन ताद्दात्म्यसंबंधेनोक्तकार्यत्वस्यैकस्य युक्तत्वात् किं
च भ्रमस्थले तन्मते कपालादिकं विनापि घटादेरुत्पत्त्या व्यभिचारापत्त्या कपालादिविशिष्टघटत्वादिना तदस्वीकाराद्गौरवं तुल्यमेकं
नवतुतदपेक्षयापि गौरवं तथाहि गोत्वघटत्वादिप्रत्यक्षेऽस्माकं तु ग्रीवाद्यवच्छिन्नेन्द्रियसंयोगवत्समवायस्य ब्राह्मणत्वादिप्रत्यक्षे ६७
विशुद्धमातापितृकत्वादिनिश्चयस्य शुक्तित्वादिप्रत्यक्षे नीलपृष्ठत्वादिनिश्चयस्य उत्पलादिनैल्यचाक्षुषे सौरप्रभादिसंयुक्तस
मवायस्य जलशोणावयवादिचाक्षुषे रजतादिभिन्नपात्रवृत्तिजलादिसमवायस्य कुंकुमगंधघ्राणजे घृतादिसंयुक्तसमवायस्य स्पर्शप्र
त्यक्षे त्रुटित्वक्संयुक्तसमवायस्य व्यासज्यवृत्तिसंख्यादिप्रत्यक्षे इंद्रियासंयुक्तासमवेतत्वस्य हस्तादिपरिमाणप्रत्यक्षे हस्तादिपरि
मितदेशावच्छिन्नेन्द्रियसंयोगवत्समवायस्य एवमन्यप्रत्यक्षेपि तस्य तस्य कारणत्वं वाच्यं तथापि गोत्ववृत्तित्वे विशेष्यतादिविषय
ता गोत्ववृत्ति लौकिकविषयतात्वेनानुगम[illegible]प्यतदवच्छिन्नसंबंधेन चाक्षुषत्वावच्छिन्नं प्रतिसारत्वावच्छिन्नविजातीयसंयोगवत्य

तथाच

तियोगिकगोत्वनिष्ठसमवायत्वेनहेतुत्वंवाच्यंभ्रमस्थलेव्यभिचारापत्तेरुक्तसमवायस्यस्वविशिष्टचाक्षुषत्वावच्छिन्नंप्रत्येवोक्तहेतुत्वंवा
च्यएवमन्यथाप्रमाणुकानांस्वविशिष्टतद्धर्मावच्छिन्नंप्रत्येवोक्तहेतुत्वंवाच्यं तथाचतत्तत्कार्यकारणतावच्छेदकघटकानांविशेषणवि
शेष्य[illegible]भावस्याविनिगमत्वेनावच्छेदकभेदेनकार्यकारणभावानन्त्यस्यावश्यकत्वान्महागौरवं मन्मतेतुभ्रमस्याविषयांश
त्रित्वेनचाक्षुषत्वाद्यभावेनोक्तकारणकार्यत्वेनोक्तकारणकार्यतावच्छेदकेतद्विशिष्टस्यननिवेशः॥ अथवासमवायेनरजतत्वा
द्युत्पत्तौचाक्षुषकारणस्याभावेनतेनसंबंधेनभ्रमस्थलेरजतत्वाद्युत्पत्त्यसंभवात्तदवच्छेदकतासंबंधेनैवद्रव्यगुणकर्मणांदोषकार्य
तावाच्या नचनव्यतार्किकमतेरूपादीनामव्याप्यवृत्तित्वेनावच्छेदकतासंबंधेनावयवेरूपस्यापूर्वोक्तव्यभिचारइतिवाच्यं नव्यतार्कि
कमतेरूपादीनामवयविनिसाक्षात्संबंधेनास्वीकारात्तु शब्दविशेषविशिष्टत्वेनतादृशात्मसंबंधेनद्रव्यचाक्षुषहेतुत्वेनरूपस्य
तद्धेतुत्वाद्दोषकविशेषणतादिसंबंधेनवादोषकार्यतावाच्या रूपादेर्विशेषणतासंबंधेनसावाच्या ध्वंसादेस्तत्त्वावच्छेदकतासं
बंधेनसमवायादिसंबंधेनवा नचविशेषणतादिसंबंधेनरूपादेर्भ्रमविशेष्यतत्तद्धर्मिकरजतविशिष्टबुद्ध्यापत्तिरितिवाच्यं तेनसं
बंधेनबाधाभावसत्त्वेसर्वथाप्रमापितथास्वीकारात् नचैवंदोषजन्यद्रव्यगुणकर्मणांदोषरहितेनापिग्रहणापत्तिरितिवाच्यंभ राम
द्रमतेविषयसमवेतज्ञाततायामिवेतस्यस्वग्राहकपुरुषावान्निरूपितत्वात्स्वसंबंधविशेषमंगीकृत्यतत्तत्पुरुषनिरूपितविषयक ४
प्रत्यक्षतत्तत्पुरुषत्वेनहेतुत्वांगीकारात् अन्यथातन्मतेपिएकपुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिपरत्वादीनांपुरुषांतरेणग्रह

णपत्तेः प्रकारांतरेण तादृशापत्तिवारणे विशेष्यतासंबंधापेक्षाबुद्धिजन्यद्वित्वादौ तत्तदुच्चारणां निरूपितत्वसंबंधकल्पनयोर्हेतुत्व
कल्पनेस्यैव युक्तत्वात् उपदर्शितलाघवानुग्रहात् संयोगादिना संबंधेन गुणादौ कर्मादिप्रकारकधीस्थले तु कर्मादेरिव संयोगादे
रपि गुणाद्यवच्छेदेनोत्पत्तिः ॥ न च यत्र यस्य कोपि संबंधो न वास्तवः प्रसिद्धस्तदवच्छेदेन तस्य तत्संबंधस्य च भासमानस्योत्पत्तिर्यत्र
तु यस्य स प्रसिद्धस्तयोः समवायादिना विशिष्टबुद्धिस्थले प्रसिद्धसंबंधावच्छेदेन समवायादिकमेव जायते सर्वत्रैव वा भ्रमस्थ ता० ६
स्थ० लेरजतत्वादिधर्म एव जायत इत्येव कुतो नोच्यत इति वाच्यं ॥ पूर्वं समवायत्वादिना रजतत्वादेर्वा धर्मस्योत्पत्त्यंगीकारे पूर्वानुभूत
समवायत्वादिना [illegible] विशिष्टसंबंधेन रजतत्वादिविशेषणविशिष्टपूर्वानुभूतरजतत्वादिविशिष्टेवच्छेदेन भ्रमस्थ
ले प्रत्यनुपपत्तेः ॥ सामान्यविशेषसमवायानां तु समवायादिनाशेषकार्यत्वेपि न क्षतिः ॥ तेन संबंधेन तदुत्पत्तौ कारणांतरस्या
कृप्तत्वेन बाधकाभावात् ॥ अथावच्छेदकतासंबंधेन समवायादिसंबंधेन वा रजतादेरुत्पत्त्यंगीकारेपि इदं रजतमित्यादिभ्रमज्ञा
ति० नीयविषयतानामवच्छेद्यावच्छेदकभावे किं नियामकमिति चेत् इदंत्वाद्यवच्छिन्नविशेष्यतानिरूपिततादात्म्यादिसंसर्गतानिरूपि
तरजतत्वाद्यवच्छिन्नप्रकारताशालिबाधकधीयादौ तादृशविशेष्यतानिरूपितरजतत्वाद्यवच्छिन्नप्रतियोगिताकभेदत्वाद्यव
च्छिन्नप्रकारताशालिनिश्चयरूपबाधाभाव एव नियामकः ॥ अथ निर्धर्मितावच्छेदकभ्रमस्थले बाधाभावस्य न नियामकत्वं ध
र्मितावच्छेदकातभावेनैव तस्य तथात्वादिति चेत्का क्षतिः ॥ विशेषणज्ञानसन्निकर्षादेरेव तत्र नियामकत्वसंभवात् ॥ ननु सम
वायेन द्रव्यगुणकर्मणां द्रव्यगुणकर्मसु भ्रमस्थले द्रव्याद्यनुयोगिकसमवायत्वावच्छेदकतासंबंधेनोत्पद्यमानद्रव्यादिप्रति

यौगिकत्वाभावे न तस्य तत्संबंधतयाभानानुपपत्तिरिति वाच्यं तत्प्रतियोगिकत्वाभावेऽपि बाधाभावसन्निकर्षादिसामग्रीसत्त्वे तस्य सं
बंधतयात्वन्मतेऽपि भानसंभवात् न चावच्छेदकतासंबंधस्याप्युक्तसामग्रीतः उक्तस्थले भानानुपपत्तिरिति वाच्यं उक्तसामग्रीसत्त्वे तथापि
तस्येष्टत्वात् यद्यपि इदं रजतमित्यादौ स्वाश्रयाश्रमसंयोगाभावेन बहिर्विषयभानासंभवाद्विषयनिष्ठप्रत्यासत्त्याद्यावश्यकत्वेन हे
तुत्वं तथापि निष्ठावच्छेदकत्वरूपसाधारण्यादिहेत्वादौ आत्मनिष्ठतयैव हेतुत्वं इदंत्वादिकं च समवायेन निरूपकत्वेन वा कार्यत्वमित्यादे रजततादिषु
र्भासमानत्वावच्छेदकावच्छिन्नत्वेन मानाभावात् हमिदंत्वविशिष्टत्वादिप्रत्ययानापत्तिर्निर्धर्मितावच्छेदकं केवलस्वात्रैश्येन त
न्तुत्वादेरेव नियामकत्वं न तन्तुत्वसमवेतस्य तन्तुत्वघटितरूपितस्याप्रत्यक्षे तत्तन्तुत्वाद्यापत्त तन्तुत्वसमवेतविषयक
मानसे ज्ञानविशेषविशिष्टत्वेन धर्मादिस्ताहत्य न प्रति च भ्रमकत्वेन तदिन्द्रियस्य च हेतुत्वात् तेन मानसप्रत्यक्षे
संप्रयोगहेतुत्वानंगीकारेऽपि न क्षतिः पूर्वपूर्वस्वाश्रयादृष्टत्वेन तत्स्वाश्रयहेतुत्वात् युगपदेव तत्तद्विषयारोपस्वाश्रयभ्रमः तेन मानसप्र
त्यक्षे धर्मादिभेदस्यैव विशेषकारणत्वाद्याक्षुषभ्रमस्थले इदंत्वादिविशिष्टधर्म्यादिविषयकचाक्षुषादिकं पूर्वसिद्धमपूर्वसिद्ध
र्विषयरजतादावपि मानसापत्तिरिति चेन्नेष्टत्वात् परामृष्टगतस्य चाक्षुषमानसादिविषयत्वान्नामिथो विरोधस्य निःप्रमाणक
त्वात् किंच रजतादिचाक्षुषादिभ्रमे रजतादिसंबद्धतया चाक्षुषादेर्वोत्पत्तिरित्यत्र विनिगमकाभावेन रजतादेरुत्पत्तिक्षणे राम
पि चाक्षुषादिविषयत्वसंभवः नच विनष्टपदवस्थेन धर्म्यादिचाक्षुषादिना ज्ञातितभ्रमस्थले तदसंभव इति वाच्यं तत्रापि तादृशा ५
चाक्षुषाद्यसक्षणे तदुत्तरक्षणे वा तादृशचाक्षुषाद्युत्तरस्योत्पत्तिसंभवेन तत्रैव रजताद्युत्पत्तिसंभवात् गुडादौ तिक्तर
स्ति तथा च तत्संबद्धतया रजतादिविषयस्यैवोत्पत्तिर्दर्शितरगत ५

सादेर्गगनादौ नेत्रादेर्भ्रमस्थलेच यद्यपि गुडादिगोचररासन चाक्षुषाद्यसंभवस्तथापि रसनागत जलादेरसनादेर्गगनगतालोकादिश्चाक्षु
षादेश्च सत्वात्तत्र चोपनीत गुडगगनादिविषयके निरुक्तरसनेत्राद्युत्पत्तिसंभवत्येव नन्वेवं विषयनिष्ठदोषस्य चाक्षुषादिगतपरंपरासं
बंधेन हेतुत्वे विषयितया रजतादेः कार्यत्वं वाच्यं तथाच गौरवमिति चेन्न रजतादिप्रकारतानिरूपितसंसर्गतानिरूपितविशेष्यतासंब
न्धेन तत्तृतीयचाक्षुषत्वादिना कार्यत्वोपगमस्यावश्यकत्वे प्रकारतानिरूपितसंसर्गतानिरूपितायां तत्तृतीयचाक्षुषविशेष्यतायां तत्संबंधेन र
जतत्वादिना कार्यत्वे गौरवाभावात् नचैवं तत्तृतीयचाक्षुषनिरूपितत्वस्य संबंधघटकत्वे न निवेशे प्रकारतासंसर्गतयोर्विशेष्यतान
यान्निवेशमादाय विनिगमनाविरहेण कार्यकारणभावत्रयापत्त्या गौरवा[redacted]त् एवं तत्तृतीयचाक्षुषनिरूपितत्वस्य संबंधघ
टकत्वे न निवेशे प्रकारतासंसर्गतयोर्विशेष्यतानयान्निवेशमादाय विनिगमनाविरहेण तत्तृतीयचाक्षुषत्वेन संबंधघटके किंतु
कार्यतावच्छेदकमेवेति वाच्यं तत्तृतीयचाक्षुषत्वादिना कार्यताभ्युपगमेपि तत्तृतीयचाक्षुषनिरूपितप्रकारतादिघटितप्रत्येकसं
बंधमादाय रजतत्वादिना कार्यत्वोक्तौ गुरुत्वाभावात् नचैवं तत्तृतीयचाक्षुषनिरूपितविषयांतरनिष्ठाया प्रकारतायास्तस्यावश्यसंबंधघ
टकत्वे वाच्यमन्यथा रजतादेः पूर्वं तत्तृतीयचक्षुरादिप्रकारतातो भेदस्यावश्यकत्वे सन्निकर्षं विना तत्तृतीयचाक्षुषप्रकारत्वासंभवे
न स्वनिष्ठतादृशप्रकारताघटितसंबंधेन रजताद्युत्पत्त्यसंभवात् विषयांतरनिष्ठप्रकारतायाश्च रजतादिप्रकारतातो भेदस्यावश्यकः
तदवच्छेदकरजतत्वादिधर्मतादात्म्यादिसंबंधानवच्छिन्नत्वान्नचापि विषयांतरनिष्ठाया रजतादिसंबंधघटकत्वासंभव इति वाच्यं तत्र व
च्छेदकभेदेन प्रकारताया भेदानभ्युपगमे नैकस्या एव प्रकारताया नानाधर्मसंबंधनिष्ठावच्छेदकतानिरूपकत्वसंभवात् नन्वेवं रज

तन्निष्ठेत्यादि भ्रमस्थले रजतत्वादिना इदंत्वादिप्रकारक इति व्यपदेशापत्तिरिति वाच्यं इदंत्वादिनिष्ठप्रकारतात्वे रजतत्वादिनिष्ठावच्छेदकता
त्व२ निरूपकतावच्छेदकस्यैव तद्व्यपदेशविषयस्यानभ्युपगमात् किंचावच्छेदकभेदेन प्रकारताभेदेपि यथा समवायनानात्वपक्षे स्वसमवा
यस्य घटादौ पूर्वमसिद्धत्वेपि अवयवरूपादिकारणवलादेव स्वसमवायिघटादिसमवायित्वसंबंधेन रूपादिकं कपालादौ जायते तथा
स्वप्रकारकत्वाख्यो दोषः पूर्वमसिद्धत्वेपि दोषादिकारणवलात् स्वप्रकारकचाक्षुषादिविशेष्यत्वसंबंधेन रजतादौ उत्पन्नो बाधका
भावः अथवा विषयनिष्ठस्य दोषस्य स्वाश्रयविशेष्यतानिरूपितसंसर्गतात्वसंबंधेन स्वाश्रयनिष्ठविशेष्यतात्वसंबंधेन वा इ
दंत्वे तत्तद्यच्चाक्षुषत्वनिरूपितस्वप्रकारतानिरूपितत्वसंबंधेन तादृशनिरूपितत्ववत्संसर्गतानिरूपितत्वसंबंधेन वा रजतत्वा
दिना कार्यता ननु प्रकारतया रजतत्वाद्यवच्छिन्नत्वेलमपि निवेश्यमन्यथा तन्नियमासिद्ध्यापत्तेः तथाच रजतत्वादेर्घटादिनि
वेशगौरवमिति चेन्न अन्यावच्छिन्नप्रकारतया रजतत्वावच्छिन्नत्वे प्रतिसंबंधित्वाभावेन तन्निवेशप्रयोजनाभावात् तु
तस्य बाधाभावादिनियम्यत्वाच्च यद्वा स्वलौकिकविषयताशालिनं तु तुरीयचाक्षुषविशेष्यत्वसंबंधेनैव रजतत्वादि
नाविषयदोषकार्यत्वं रजतादिप्रकारतया इदंत्वाद्यवच्छिन्नविशेष्यतानिरूपकत्वादिकं तु बाधाभावादिनियम्यं अ
तस्तन्निष्ठप्रत्यासत्या दोषस्य कारणत्वे चाक्षुषादिसमवायेन स्वचाक्षुषादिनावा संबंधेन रजतत्वादिनैव कार्यत्वसंभवात् राम
एवमारोप्यमाणरजतादिव्यक्तिकरणभु इदंत्वाद्यवच्छिन्नविशेष्यताकभ्रमस्थले बाधाभावकार्यत्वमपि र ६

जतत्वादिनैवेति तत्तोप्यनिर्वचनीयख्यातिसिद्धिः ४ तथाहि इदंत्वाद्यवच्छिन्नविशेष्यतानिरूपिततादात्म्यादिसंसर्गतानिरूपितरजत
त्वाद्यवच्छिन्नप्रकारताकचाक्षुषत्वादिना समवायेन बाधाभावजन्यत्वं वाच्यं तथा च तादृशसंसर्गतानिरूपितस्वप्रकारताशालि
चाक्षुषसमवायसंबंधेन तादृशचाक्षुषसंबंधेन वा रजतत्वादिनैव तदुत्पत्तौ रजतत्वाद्यवच्छिन्नत्वस्य चाक्षुषीयसमवायस्य चानि
वेशेन लाघवात् न तु प्रत्युत्पाद्यपेक्षया धर्मितावच्छेदकानामनंतत्वेन धर्मितावच्छेदकमनिवेश्य तत्तत्पुरुषीयचाक्षुषादिना रजत
त्वाद्यवच्छिन्नप्रकारतानिरूपिततादात्म्यादिसंसर्गतानिरूपितविशेष्यतावच्छेदकत्वसंबंधेन स्वीयविशेष्यताविशेषावच्छेद
कत्वसंबंधावच्छिन्नप्रतियोगिताकबाधाभावजन्यत्वांगीकारात् तत्पुंरुषीयचाक्षुषादिनिरूपितस्वप्रकारतानिरूपितसं
सर्गतानिरूपितविशेष्यतावच्छेदकत्वसंबंधेन रजतत्वेनोक्तजन्यत्वांगीकारे रजते इदंत्वद्रव्यत्वादावपि उक्तसंबंधेन रजताद्दृत्य ताग७
त्वापत्तेरिष्टापत्तौ च गौरवात् बाधाभावजन्यता रजतत्वादिनावच्छुमद्राक्ष्यति चेन्न धर्मितावच्छेदकस्य वस्तुसंसर्गतावच्छेदकस्यापि
संयोगसमवायतद्वत्संयोगत्वादिभेदेन प्रत्युत्पाद्यपेक्षयाऽनंत्यात् उक्तविशेष्यतावच्छेदकत्वसंबंधेनैवेदंत्वाद्यवच्छिन्नविशेष्यतानि
रूपितासती रजतत्वाद्यवच्छिन्नप्रकारतानिरूपितातादात्म्यसंसर्गतातदवच्छेदकत्वसंबंधेनापि विनिगमनाविरहेण तत्पुरुषी
यचाक्षुषत्वादिनोक्तकार्यत्वस्य वाच्यतया तदपेक्षया लाघवेन तत्पुरुषीयचाक्षुषादिनिरूपितेदंत्वाद्यवच्छिन्नविशेष्यतानि
रूपितायाः स्वप्रकारतानिरूपितसंसर्गतातदवच्छेदकत्वसंबंधेन रजतत्वादिनैवोक्तकार्यत्वस्य युक्तत्वात् अकिंचितेदंत्व

स्यैव निवेशाद्रजतगौरेतिदंत्वादौ रजतत्वाद्युत्पत्तिर्नापत्तिः॥ किंच गुरुत्वापेक्षया धर्मितावच्छेदकानामानन्त्येपि यावद्धर्मान् धर्मितावच्छेदकीकृत्य कदापि कस्यापि न बाधबुद्धिस्तदन्तर्भावेन बाधाभावकारणत्वस्यैव गौरवानंगीकाराद्धर्मितावच्छेदकनिवेशापक्षे न गौरवं प्रत्युत तत्तल्लघुधर्मनिवेशापक्षे एव गौरवं सकलगुरुधर्माणामेवेह जन्मनि जन्मान्तरे बाधबुद्ध्यवतारस्यावश्यकत्वात् न च प्रमेयवन्नरजतमित्यादिबाधबुद्ध्या धर्ममात्रस्यैव धर्मितावच्छेदकीकरणात्सर्वत्रैव धर्मितावच्छेदकतया बाधबुद्ध्यवतारस्यावश्यकत्वादिति वाच्यं उक्तबाधबुद्धिस्थले प्रमेयत्वावच्छिन्नावच्छेदकतानिरूपितविशेष्यतानिवेशेन हेतुतावच्छेदककल्पनेन सकलधर्मनिवेशाभावेन धर्मितावच्छेदकनिवेशापक्षे गौरवाभावात् धर्मितावच्छेदकानिवेशापक्षेपि एकधर्मावच्छिन्नतादृशावच्छेदकत्वसंबंधेन बाधबुद्धित्वेप्यन्यधर्मावच्छिन्नतादृशावच्छेदकत्वसंबंधेन विशिष्टबुद्ध्युदयात्निरवच्छिन्नतादृशावच्छेदकत्वसंबंधमादायेदं न रजतमित्यादावेकोहेतुतावच्छेदकोऽन्यस्तु तादृशावच्छेदकतावच्छेदकत्वादिसंबंधेन प्रमेयवन्नरजतमित्यादौ कल्पनीयस्तथा च निरवच्छिन्नतादृशावच्छेदकत्वमादाय हेतुतास्थले स्वल्पतरतन्त्रादिदंत्वादिधर्मनिष्ठानवच्छिन्नावच्छेदकतानिरूपकविशेष्यतानिवेशेन हेतुत्वापेक्षया बहुतरतत्तल्लघुधर्मादितन्निरूपणनिरवच्छिन्नविशेष्यतावच्छेदकत्वसंबंधेन हेतुतायामेव गौरवाच्च अपि च पित्तादिदोषोत्कर्षापकर्षयोः सतोः शंखादौ पीतिमाद्युत्कर्षापकर्षदर्शनात् पित्तादिजन्यमेव शंखपीतिमादिकं वाच्यं कार्योत्कर्षापकर्षयोः कारणोत्कर्षापकर्षाभ्यामेव दर्शनात् पित्तादिस्थपीतिमादेरनुभूयमानस्यारोपोत्पत्त्यं राम ७

गीकारे बाधकस्योक्तत्वात् पुरुषांतरेणापि पित्तपीतिमादेर्ग्रहणापत्त्या पुरुषमात्रं प्रत्येव लाघवेन तस्यानीन्द्रियत्वकल्पनाच्च किंच
सच्चत्यच्चाभवदित्यादिना व्यावहारिकप्रपंचसृष्टिमुक्त्वा सत्यं चानृतं च सत्यमभवत् इति तैत्तिरीयकश्रुतौ व्यावहारिकसत्यपर
सत्यशब्देन व्यावहारिकसृष्टिमनूद्यानृतशब्दितप्रातिभासिकरूपेणासत्यशब्दितपारमार्थिकसत्यस्य ब्रह्मणो भेदेनोक्तेर्व्याव
हारिकरजतादिविलक्षणं प्रातिभासिकं रजतादिकं जायत इत्यवश्यं वाच्यं प्राणा वै सत्यमित्यादिश्रुतौ व्यावहारिकसत्य
पदप्रयोगात् व्यावहारिकसत्यपदसमभिव्याहृतानृतपदस्य व्यावहारिकविपरीतप्रातिभासिकार्थकत्वावश्यकत्वात् तच्च
न्यथासत्यानृतवाक्यादेर्व्यावहारिकस्य सृष्टेः पूर्वमेव सच्चत्यच्चाभवदित्यादिनोक्तत्वात् शब्दात्मकप्रपंचस्यगुणाभूतत्वेन
भूतात्मकत्वात् भूतसृष्ट्युक्त्यैव सृष्ट्युक्तिसंभवात् अन्यथानृतादेरपि सृष्ट्युक्त्यापत्तेरेतद्वाक्यं व्यर्थमेव स्यात् तस्माद्भ्रमस्थले
रजतादिकं जायत इत्यवश्यं वाच्यं ननु शुक्त्यादौ रजतरंगादिनानाप्रकाराणां भ्रमस्थले बहूनामपूर्वरजतादिव्यक्तीनामु
त्पत्तिकल्पने गौरवादन्यथाख्यातिरेव युक्तेति चेत् न अन्यथाख्यातिमतेऽपि एकस्मिन्धर्मिणि रजतादेर्युगपदुत्पन्नवि
नष्टानां बहूनां नानापुरुषीयाणां भ्रमाणां कल्पने गौरवात् अस्मन्मते तत्रैकस्यैव रजतादिव्यक्तेस्तत्तत्पुरुषीयसाक्षि
तापन्नशुक्त्याद्यवछिन्नचैतन्यभास्यत्वोपपत्तेः न च तत्तदंतःकरणावच्छेदेन चैतन्यगततत्तदविद्यायाः परिणामस्य रजतादे
रैक्यानुपपत्तिरिति वाच्यं एकस्या एवाविद्यायास्तत्रतत्तदंतःकरणावच्छेदेन संभवात् नानाविद्याभिरप्येकशुक्त्यवछिन्न

चित्तिरिष्टाभिरेकरजतादिजननसंभवात्तत्परिणामस्याप्यैक्यसंभवात् किंच प्रथमप्रवृत्तोक्तयुक्तिभिर्भ्रमविषयस्यात्यन्तावस्तुपकत्वे व्यक्ति
कल्पनात्तद्रूपगौरवस्य चरमस्य फलमुखत्वेनादोषत्वमन्यथा मतुमितो विशिष्टज्ञानत्वेन हेतुता कल्पने ज्ञानोद्द्वयोत्तरं विशिष्टज्ञानव्य
क्तीनां कल्पने परेषां गौरवं स्यात् एतेन रजतादेरुत्पत्त्यनंतरं तस्य चाक्षुषाद्युत्पत्त्यभ्युपगमपक्षे विद्यावृत्तिकल्पनपक्षे चोभयोरत्य
न्तिकल्पने गौरवमित्यादिकं परास्तं अस्मदभ्युपगतरजताद्युत्पत्तिक्षणाद्व्यवहितोत्तरक्षणेऽपि चाक्षुषस्याभ्युपगमाद्धि सामग्रीसत्वे
कार्यानुत्पत्तेर्दुर्निवारत्वात् न च रजतादेरुत्पत्त्यनंतरमपि पुनस्तस्या उत्पत्त्यापत्तिरिति वाच्यं घटादिमति कपालादौ घटाद्युत्तरस्येव
रजतादिमत्यज्ञाने रजताद्युत्तरोत्पत्त्यसंभवात् यत्र रजतादिभ्रमोत्तरं रंगादिभ्रमोत्तरं पुनः रजतादिभ्रमः तत्र रंगादिभ्रमसाम
ग्र्या एव पूर्वज्ञातरजतादिभ्रमविनाशकत्वांगीकाराद्ग्रिमरजतादिभ्रमस्याज्ञानांतरोपादानकत्वाद्युपपत्त्यभावात् विन
ष्टद्रव्यस्थानामेव दोषाणां शक्तिविशेषेण कारणतास्वीकारे रजतादिसत्वे रजताद्युत्तरस्योत्पत्त्यनापत्तेश्च परमते चाक्षुषा
दिधारायामनुभवसिद्धत्वेन तथा वक्तुमशक्यत्वात् पराभ्युपगतानुव्यवसायोत्पत्त्यादेरस्मदनभ्युपगतत्वस्य वक्ष्यमाणत्वे
न परेषामेव महागौरवात् एतेन द्रव्यगुणकर्मणां तदुत्पत्तिप्रतिबंधकत्वेऽपि सामान्यादिभ्रमस्थले पुनरपि सामान्याद्यु राम
त्पत्तिप्रसंगः सामान्यादेरपि तदुत्पत्तिप्रतिबंधकत्वकल्पने महागौरवमन्यथाख्यातिमते तस्याः क्लृप्तत्वादित्यादिकं परा ८
स्तं वस्तुतस्तु सामग्रीमतः क्षणोत्तरक्षणत्वं कार्येणाव्याप्यं न तेन तदुत्पत्त्यापि अथवा कार्यतावच्छेदकसंबंधेन कार्यवद्दे

णावच्छेदेन कार्याधिकरणीभूतो यस्तदन्योयः सामग्रीमान् क्षणस्तदुत्तरक्षणत्वमेव कार्योत्पत्तिव्याप्यं विनश्यदवस्थकार्यितावच्छेदका
वच्छिन्नाधिकरणस्य सामग्रीक्षणस्योत्तरक्षणे कार्यतावच्छेदकावच्छिन्नस्योत्पत्त्यनभ्युपगमेपि न क्षतिः कार्यनाशोत्पत्तिः द्वितीयादिक्षणए
व कार्योत्पत्तिसंभवात् धारावाहिज्ञानस्थले द्वितीयँक्षणमात्रव्यवधानस्वीकारादन्यथोक्तप्रतिवंधकत्वादिकल्पने गौरवादेवं चरजता
देरिव तद्वाक्यस्य तज्जातीयसत्वे पुनरुत्पत्त्यनभ्युपगमेन परेषां गौरवाभावेप्यनिर्वचनीयवादेयुक्तीनाभ्युक्तत्वाद्दृश्यमाणत्वावच्छ
ताघपूर्वव्यक्तिकल्पना गौरवमकिंचित्करमिति ध्येयं किंचानावृत्तचैतन्यतादात्म्यादेवापरोक्षत्वसंभवेन लौकिकविषयतायामेवमा
नाभावात् तस्यास्त्वयोक्तदोषनियम्यत्वं वंध्यापुत्रोत्सवाय मानं न च प्रत्यक्षमनोवृत्तिविषयत्वस्यापूर्वीकरीत्या लौकिकालौकिक
त्वभेदाभावेपि तन्मात्रस्यैवापरोक्षतारूपत्वसंभवे अनावृत्तचैतन्यतादात्म्यस्य तत्कल्पनमप्यसिद्धमिति वाच्यं। वृत्तिं विनापि
वृत्तिसुखादावनावृत्तचैतन्यसंबंधेनैवापरोक्षताव्यवहारात् तेनैव सर्वत्र तद्व्यवहारसंभवे वृत्तिविषयत्वस्य [illegible] तद्रूपत्वाकल्प
नात् अथ वृत्तिज्ञानसुखादावपि वृत्तिज्ञानस्योत्पत्तिः कल्प्यत इति चेत् अतितरामभ्योसि यतः श्रुतियुक्तिभिरात्मनः
स्वप्रकाशानुभवरूपत्वे सिद्धे तेनैवानावृतचिद्रूपेण सकलदृश्यपातुस्फूर्तेनेकेन वृत्तिज्ञानसुखादिषु साक्षात्करोमीत्यादिव्य
वहारसंभवे तदुत्पत्तिविनाशाद्यनल्पसंख्यवृत्तितत्सामग्र्यादिकल्पयसि श्रुतं यस्तावदयमात्मा ब्रह्म सर्वानुभूः अत्रायं पु
रुषः स्वयंज्योतिर्भवति येनेदं सर्वं विजानाति तं केन विजानीयात् यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः कतरः स आत्मा

येन वा पश्यति येन वा शृणोति येन वा गंधानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चास्वादु च विजानाति यन्मनसा न मनुते येनाहुर्म
नो मतं स्वप्रकाशमहानंदमात्मैवैतत्सर्वस्य द्रष्टा सर्वस्य साक्षी साक्षी चेता केवलो निर्गुणश्च॥ तमेव भांतमनुभाति सर्वं तस्य भासा सर्व
मिदं विभाति न द्रष्टेर्द्रष्टारं पश्येः॥ अद्रष्टो द्रष्टा नान्योतोस्ति द्रष्टा इत्याद्याः॥ युक्तेश्च आत्मनोनुभवान्यत्वे दृश्यत्वापत्त्या विनाशि
त्वमिथ्यात्वाद्यापत्तेः॥ क्लृप्तनित्यापरिच्छिन्नात्मस्वरूपत्वे संभवत्यात्मधर्मतयाऽनंतकोट्यनुभवव्यक्तिकल्पने गौरवं आत्मनः॥ प्र
काशांतराभ्युपगमे तस्यापि प्रकाशांतरमभ्युपेयमन्यथा प्रकाशासंबंधस्य तस्य शशविषाणायमानत्वादसिद्ध्यापत्तेः॥ प्रमेयत्वादि
ना कालांतरीणानुमानादिविषयकत्वेपि तत्तद्विषयत्वेन तत्तद्विषयभिन्नत्वेन च तदसिद्धितादवस्थ्यं सर्वं ज्ञानं स्वविषयभि
न्नमित्याद्यनुमानस्य संभवेपि तेनात्मान्यानुभवासिद्धेः॥ आत्मान्यानुभवपक्षत्वे चाश्रयासिद्ध्यापत्तेः॥ तत्कालीनप्रत्यक्षप्रका
शांतराभ्युपगमेपि तथैव प्रकाशांतराणि वाच्यानीत्यनवस्था निरवधिप्रकाशधारायाश्चित्यत्वाभ्युपगमेऽनुभवपराहति
र्जन्यत्वाभ्युपगमे विपर्यासापत्तेः॥ यत्क्षणे आत्मनिश्चयो न जातस्तत्क्षणे देहांतःकरणादिष्वात्मनः॥ संशयाद्याप
त्तिसंभवात् न हि तत्संशयादिकं कस्यचिदनुभविकं तदुक्तं टीकादौ नहि जातु कश्चित्संदिग्धेऽ राम
हमन हं वेति नवा विपर्यस्यति नाहमेवेति तदुक्तं संशयादिकं देहादावात्मत्वविशिष्टस्य वाच्यं तस्य च न स्वप्रकाशत्वं सिद्धांते र्द
पीति वाच्यं स्फुरणमात्ररूपस्यैव देहादौ सत्वेनोक्तसंशयहेतुत्वेन दोषाना मक्लृप्तत्वे
स्पशुक्रालन एवोक्तसंशयादिविषयत्वेनापादनाद्देहादिस्फुरति न वा स्फुरतीति वा अयं घटो न वेत्यादिश्च घटत्वादिसंशयादिवत् अथ स्फुर
णस्यापि ज्ञानान्नारतविद्रूप

ध्वंससमये प्रागभावध्वंसानुवृत्तिवत्तद्वत् न च देहादिस्फुरणावरकाज्ञानादिकार्यस्योक्तसंशयादेर्नोत्पत्तिसंभवः अत एव पुत्रवात
रीयदेहादौ घटादौ च चैतन्यस्याज्ञानावृतत्वादिसत्वेन तत्र तादृशसंशयादि जायत एवेति चेन्न हि स्फुरणे ज्ञानांतरांगीकारो व्य
र्थ एवावरणनिवृत्यर्थमेव ज्ञानोत्पत्त्यभ्युपगमात् अथ व्यवहारार्थं स्फुरणे ज्ञानांतरमावश्यकमिति चेन्न स्फुरणतादा
त्म्येनैवान्यस्यैव स्फुरणस्यापि व्यवहारादिसंभवात् व्यवहारादिमात्रं प्रति स्फुरणतादात्म्यस्यैव प्रयोजकत्वात् तस्मात्स्फुर
णस्य व्यवहारादिकं संशयविपर्य्यासार्थविषयत्वं च स्वातिरिक्तानपेक्षमिति स्वतः सिद्धत्वमित्याद्या आत्मनः स्वकी
यानुभवरूपत्वं व्यवस्थापयंति ननु स्फुरणतादात्म्यस्यैवापरोक्षतारूपत्वे चाक्षुषादिवृत्त्युत्पत्तिदशायामपि भुक्ति
त्वादौ साक्षात्करोमीति व्यवहारादिः स्यात् न च जीवचैतन्येन भुक्तित्वादेराध्यासिकतादात्म्याभावात्तदा न तथा व्यवहा
रादिकं चाक्षुषादिवृत्त्युत्पादे तु भुक्तित्वाद्यवच्छिन्नचैतन्येन निर्गतांतःकरणपरिणामचाक्षुषाद्युत्पत्तिकाले वच्छि
न्नस्य जीवचैतन्यस्यैक्यान्न दुष्यत इति वाच्यं अविद्योपहितचैतन्यस्यैव जीवत्वे तस्यैव च सर्वकार्योपादानत्वे चाक्षुषादिवृ
त्त्यवच्छेदं विनापि अंतःकरणादिभिरिव भुक्तित्वादिविषयमात्रेणाध्यासिकतादात्म्यस्य सहजत्वादिति चेन्न अविद्यो
पहितचैतन्यस्य जीवत्वजन्यमात्रोपादानत्वपक्षेपि सुखादाविव भुक्तित्वादौ चाक्षुषाद्युत्प [redacted]

ति काले साक्षात्करोमीति व्यवहाराद्यदर्शनादेवावरकाज्ञानकल्पनादनादृते चैतन्यतादात्म्यस्यापरोक्षतारूपत्वे बाधकाभावात् य
दित्वंतःकरणोपहितचैतन्यमेव जीवः अविद्योपहितचैतन्यस्यैव वा जीवत्वेपि न तस्य सकलकार्योपादानत्वं किंतु ब्रह्मणस्तदा तु
जीवचैतन्यस्य शुक्तित्वादिबहिर्विषयैराध्यासिकतादात्म्यसंबंधस्यैवाभावाच्चाक्षुषाद्यभावकाले न तथा व्यवहारादिकं न च शुक्ति
त्वाद्याकारकचाक्षुषादिवृत्त्यनुत्पादेपि इदंत्वाद्याकारकचाक्षुषादिकाले शुक्तित्वाद्यवच्छिन्नचैतन्ये न जीवचैतन्यस्यैक्यसंभवा
त् शुक्तित्वादेः साक्षात्करोमीति व्यवहारादिरिति वाच्यं अंतःकरणावच्छेदेन तदभावकृतभेदनिवृत्तिरूपस्यैक्यस्य संभवेपि शुक्तित्वा
द्याकारकवृत्तिं विना तदवच्छेदेन तदधिष्ठानब्रह्मचैतन्यावरकाज्ञानसत्वात् शुक्तित्वमिह नास्ति न भाति शुक्तित्वेनेदं न जानामी
ति व्यवहारात् अनावृतचैतन्यसंबंधस्यैव साक्षात्करोमीत्यभिलापप्रवृत्त्यादिकार्यप्रयोजकत्वात् वृत्तिचैतन्यसंबंधस्य पराभ्युपग
तनिर्विकल्पकस्थानीयत्वात् न च चाक्षुषादेः शुक्तित्वाद्यनुत्पादेपि तदधिष्ठानब्रह्मचैतन्यमूलाज्ञानेन तत्वसाक्षात्कारपूर्वमा
वृतमेवेति कथं शुक्तित्वापरोक्षतेति वाच्यं आवरणानवच्छेदकत्वरूपानावृतत्वस्य चित्संबंधविशेषणत्वात् शुक्तित्वादे
चाक्षुषादिकाले शुक्तित्वादितदधिष्ठानचितोः संबंधस्यावरणानवच्छेदकत्वात् तस्माज्ज्ञप्तिमात्रे जीवस्योपादानत्वे शुक्तित्वा
दिभिर्जीवस्याध्यासिकोपरागसत्वेप्यावरणाभिभवार्थं ब्रह्मण उपादानत्वे तूक्तोपरागार्थं च चाक्षुषादिवृत्तिरिति तदभावका
ले शुक्तित्वादेर्न साक्षात्काराभिलापप्रवृत्त्याद्यापत्तिः वृत्तिज्ञानस्यावरकाज्ञाने प्रत्यभिभावकत्वं तु तन्नाशाजनकत्वं परेषां प्रति
योगिनः स्वप्रागभावनिवृत्तिजनकत्वपक्षवत् तन्नाशरूपत्वं वा परेषां तस्य स्वप्रागभावनिवृत्तिरूपत्वपक्षवत् प्रतियोगिनो

ध्वंससमये प्रागभावध्वंसानुवृत्तिवत् वृत्तिज्ञानध्वंससमयेऽप्यज्ञानध्वंसानुवृत्तिसंभवादेतेनाज्ञानवृत्तिज्ञानयोः समानाकारतामात्रेण
नाश्यनाशकभावांगीकारे स्यार्दौ न शुक्तित्वादिप्रत्यक्षेण चाक्षुषरजतादिभ्रमहेतुज्ञानस्य निवृत्तिः स्याद्दृश्यते हि तेन तदनिवृत्तिः
चाक्षुषत्वादिना चाक्षुषादिभ्रमहेतुज्ञानत्वेन तदंगीकारे तु गौरवम् अज्ञानवृत्तिज्ञानयोर्नाश्यनाशकभावं कल्पयित्वा नावृतचैतन्य
संबंधस्य सकलापरोक्षतात्वकल्पनापेक्षया बाह्यार्थे चाक्षुषादिवृत्तेरांतरार्थे चानावृतचैतन्यस्यापरोक्षतात्वमित्येव कल्पनं युक्त
मित्यादिकुचोद्यमपास्तं परेषां ज्ञानप्रागभावयोरिवास्माकमज्ञानवृत्तिज्ञानयोर्नाश्यनाशकभावांगीकारात् यादृशवृत्तिज्ञानेन या
दृशाज्ञानस्य वस्तुतो नाशस्तत्प्रागभावत्वं तत्रैवांगीकृत्य स्वप्रागभावत्वे कालिकसंबंधावच्छिन्नत्वविशेषणत्वं चेत्युभयसंबंधेन प्रमात्वेन
कारणता अज्ञानवृत्तिप्रतियोगितासंबंधेन नाश्यत्वेन कार्यतेत्यंगीकारसंभवात् प्रमात्वं च जातिविशेषः प्रमिनोमीत्याद्यनुभवसि
द्धः न चाज्ञानस्य प्रागभावरूपत्वे मानाभावविलक्षणत्वं चैतन्यविषयकत्वादिसिद्धांतव्याघात इति वाच्यं परेषां ज्ञानस्य भावस्यापि
ध्वंसप्रागभावत्वसविषयकत्वादिवत् भावाभावविलक्षणस्य सविषयकत्वादिसत्वेऽपि प्रागभावत्वाविरोधात् प्रागभावांतरस्याप्रामाणि
कत्वेऽप्यज्ञानस्य तत्र प्रमाप्रागभावत्वस्य वक्ष्यमाणतर्कसहकृतप्रमाणगम्यत्वेन लाघवरूपकत्वाच्च ननु यद्यज्ञानमेकं न तु मू मेव
लाज्ञानादखंडानंदावरकादन्यानि घटाद्यवच्छिन्नान्यज्ञानानि घटादिप्रमाणनिवर्त्यानीत्युपेयते तदा घटाद्याकारकप्रमयैवाज्ञाननिवृत्ति
रूपो मोक्षः स्यादिति चेन्न स्वकाज्ञानपक्षे प्रमाविरहविशिष्टं यदज्ञानविषयतावच्छेदकत्वं तदभावविशिष्टस्यैव चैतन्यसंबंधस्यापरो

स्वतान्तरूपत्वात्प्रमाया अविद्याभिभावकत्वमुच्यते तादृशाभाववैशिष्ट्यं च सुखादिचितोः संबंधे सहजाज्ञानविषयतानवच्छेदकत्वात् घटादिचितोः
संबंधे तु तन्निष्ठाज्ञानविषयतावच्छेदकत्वस्य शुक्तिविशिष्टत्वात् न च चाक्षुषादिप्रमाविरहदशायां तु पस्थितावपि सुखादौ साक्षात्करोमीत्या
दिव्यवहारात् कथमुक्तरूपा सर्वत्रापरोक्षतेति वाच्यं उक्तावच्छेदकतासंबंधेनाज्ञानाभावस्यैव निवेशात् संबंधानुपस्थितावपि क्षतिवि
रहात् प्रमाविरहे वैशिष्ट्यं तु स्वसमानाधिकरणस्वविषयतावन्निरूपितत्वसंबंधेन स्वावच्छेदकत्वसंबंधेन वा अवच्छिन्नप्रतियोगिताक
प्रमाविरहस्य सामानाधिकरण्यरूपं घटादिचाक्षुषादिप्रमाकाले तु तस्यागतिगमेन स्वसमानाधिकरणस्याकाराख्यसंबंधे विशेष
रूपविषयत्वस्य घटादौ स्वीकारात् घटादिचित्संबंधावच्छेदेनाज्ञानविषयत्वस्यैव प्रमाया अपि चि[illegible]त्वांगीकारात् घटादिचि
त्संबंधनिष्ठाज्ञानविषयतावच्छेदकत्वेनोक्तसामानाधिकरण्यवत् प्रमावच्छेदकत्वासमानाधिकरणा[illegible]दित्वविषयतावच्छेदकत्वं
[illegible]केतनसंबंधेनाज्ञानस्याभावस्तद्विशिष्टचित्तादात्म्यमपरोक्षतेति तु निष्कर्षः ४ अथवा अज्ञाननानात्वपक्षे चिन्निष्ठस्य तद्वि
षयत्वस्यानादित्वेऽपि घटादिचित्संबंधेन तदवच्छेदकत्वं कालविशेषावच्छेदेनैव यथोररीक्रियते अन्यथा प्रमाकालेपि दितांतरचितंस्यदृशा
ति३ नेन घटो नास्ति न भातीति व्यवहारस्यापत्तिर्भातीति व्यवहाराभावस्य चापत्तेः ४ तथा एकाज्ञानपक्षेऽपि प्रमातज्जन्योद्बुद्धसंस्कारकालान्यका राम
लावच्छेदेनैव तदुरीक्रियते तथा च केवले न स्वविषयतावच्छेदकत्वसंबंधेनाज्ञानाभावविशिष्टस्य चित्संबंधस्यापरोक्षतोतोपि न क्षतिः ४ एते
नोक्तविशिष्टाभावस्यापरोक्षताघटकत्वे ताद्रूप्येण घटत्वादिकारणत्वे गौरवमित्यादिकमुक्तं न च तथाप्यज्ञानत्वावच्छिन्नप्रतियोगिता ११

फाभाववत्चैतन्यसंबंधत्वेन प्रवृत्त्यादौ कारणत्वापेक्षया लौकिकविषयताकप्रत्यक्षत्वेन कारणत्वे लाघवमिति वाच्यं उक्तसंबंधेनाज्ञानसामा
९२ न्याभाववत्त्वप्रक्तिविशिष्टचित्तादात्म्यसंबंधेन रूप्यादिविशिष्टत्वापेक्षया रूप्यादिलौकिकप्रत्यक्षत्वस्य लघुत्वात् प्रामाण्यज्ञानादिसत्त्वेऽज्ञा
नसत्त्वे नास्मन्मते तदभावानिवेशेन प्रत्युत लाघवाच्च किंचैतेन सति भात्यपि शुक्तित्वादौ सत्ताभानाभिलापस्य प्रवृत्त्यादेश्च प्रतिबंधकत्वे
नास्ति न भातीत्यभिलापादिजनकत्वे चाज्ञानस्यावरकत्वमित्यौपनिषदैरुच्यते तथा च तत्कल्पनागौरवापेक्षया तद्विषये साक्षिसंबं
धस्य बहिर्विषये चाक्षुषादिविषयत्वस्य साक्षात्कारमीत्यभिलापप्रवृत्त्यादिनियामकत्वमिति वैतृष्ण्यमपि युक्तमित्यादिकं परास्तं अ
स्ति भातीत्यवाज्ञानाभावविशिष्टचैतन्यसंबंधस्य व्यवहारयितया प्रवृत्त्यादिविषयत्वस्य प्रयोजकतया च अज्ञानसत्त्वे तदभावेन व्यव
हाराद्यसंभवमात्रस्यैवाज्ञानं प्रतिबंधकमिति वाक्यार्थत्वेनाज्ञानस्यानतत्प्रतिबंधकत्वाकल्पनात् नास्ति न भातीत्यज्ञानेस्य वास्ति
त्वभानविरोधितया अभिलापादिविषयत्वमात्रस्याभिलापादिजनकत्वत्राशार्थतया तज्जनकत्वाकल्पनात् अथाज्ञानाभावेनैव चैतन्
भातीति व्यवहारादिकार्यस्यान्न हि शुक्त्यादौ परोक्षवृत्त्यानत्स्यात् यदि च प्रत्यक्षवृत्त्यैव तदंगीक्रियते तदा परोक्षवृत्त्यास्तीति व्यवहा
रोपि न स्यादिति चेन्न यतोऽज्ञाने वैजात्यद्वयवत् तत्रैकं प्रमामात्रस्याभिभाव्यतावच्छेदकमन्यच्च प्रमायाएव तत्राद्यवैजात्यविशिष्टा प्रत्यक्ष ४
ज्ञानस्याभावविशिष्टचैतन्यमस्तित्वसत्तादिशब्दैर्व्यवह्रियते द्वितीयवैजात्यविशिष्टाज्ञानाभावविशिष्टं तु चैतन्यमस्तित्वसत्तादि
भिर्भानस्फूर्त्यादिभिश्च शब्दैर्व्यवह्रियते प्रवृत्त्यादिकारणं च न चास्तित्वे सत्तासामान्यमन्यथा शुक्तित्वं मे स्फुरतीत्यत्र च शुक्तित्वमस्ती
त्यहंकाराद्यवच्छिन्नत्वेन चैतन्यरूपमस्तित्वे व्यवह्रियेत देशकालसंबंधित्वं वा अन्यथा इदानीमस्तीति नियतदेशकालान्वयानस्या

त्रैतन्यस्य सार्वदिकत्वादिति वाच्यं यतः सत्तासामान्यस्यास्तित्वेपि शुक्तित्वादिकं मे स्फुरतीति वन्नैमस्तीति व्यवहारः स्यात् अथ मे स्फुरतीत्यत्र स्फु
रणे आत्मनो जन्यतासंबंधो भासते तच्च सत्तायां न संभवति समवायादिसंबंधांतरस्य भाने विशेषापत्तिरिति चेत्तर्हि अन्मतेपि स्फुरणत्वावच्छेदेना
हंकारावच्छिन्नत्वं भासते स्तितात्वावच्छेदेन तु न तत्संभवति परोक्षवृत्तेस्थलीयास्तितायां तदसंभवात् अस्तितात्वसामानाधिकरण्येन त
त्रैतेविशेषापत्तिरिति तुल्यं वस्तुतोस्तिता घटकाज्ञानेऽहंकारावच्छिन्नतान्वयसंभवात्परोक्षधीस्थलेपि मे स्तीति व्यवहारोपपत्ते रभावसा
मान्याक्षेत आवश्यसत्तासामान्ये नास्तिता व्यवहारासंभवः द्रव्यं सत्तासामान्ये सदित्येकाकार व्यवहारयोर्विषयवैरूप्यकल्पनमयुक्तं सत्त
दित्यनुगतसदाकारव्यवहारस्याननुगतदेशकालसंबंधित्वेनासंभवः दैतन्यातिरिक्तमहादेशकालयोर्मानाभावात् इहेदानीं शुक्ति
त्वादिकं नास्ति न भातीत्यत्राप्यज्ञानस्यैव देशकालावच्छिन्नत्वान्वयः शुक्तित्वाद्यवच्छिन्नविषयिताका ज्ञाने स्वदंत्वादिविशिष्टदेशका
लावच्छिन्नचिदाश्रयताकत्वोद्भुपपाद्यिष्यमाणत्वादेवं च साक्षिविषयोपयोगस्य सहजत्वपक्षेपि प्रत्यक्षवृत्तेर्विषयावच्छिन्नचिदाश्र
यताकत्वमावश्यकमन्यथा शुक्तित्वादितादात्म्यवत्स्फुरणस्याहंकारावच्छिन्नत्वासंभवादितः शुक्तित्वादिकं मे स्फुरतीति व्यवहारासंभवात्
अथाज्ञानप्रमेययोरेकदेशावच्छिन्नत्वं विना प्रागभाव प्रतियोगिभावासंभवेन नाभिभाव्याभिभावकभावासंभवाद्दशानावच्छेदकेनेदंत्वादिविशिष्ट
नभःस्यादिदेशेनैव शुक्तित्वादिप्रमायाश्चावच्छेदो युक्तो न तु शुक्तित्वादिना तथा च प्रत्यक्षवृत्तिप्रमायाः कथं स्वविषयावच्छिन्नत्वनियम इति राम०
चेन्न कपालादिनाशजन्यघटादिनाशजन्यघटादिसंयोगनाशस्य स्वप्रतियोगिनूपप्रागभावावच्छेदकानवच्छिन्नत्वेन प्रागभावतत्प्रतियोगिनो १२
रेकावच्छिन्नत्वनियमस्याभावात् अत एव प्रत्यक्षवृत्तिरिव परोक्षवृत्तिर्विषयावच्छेदेन न चितमाश्रयति किं त्वहंकारावच्छेदेनैव तत्प्रागभावत्व

वर्त्तमानेन तु इदंत्वादिविशिष्टविषयावच्छेदेनापि चितमाश्रयतीति तदवच्छिन्नस्य कार्यविषयकभ्रमजनकत्वात् न च परोक्षवृत्तेरपि ज्ञानस्य वृत्तेरि
व विषयावच्छेदेन कुतो न जायत इति वाच्यं अवच्छेदकतासंबंधेन चाक्षुषादिना चक्षुरादिसंप्रयोगकार्यत्वांगीकारेण प्रत्यक्षवृत्तेरिन्द्रिय
संयुक्तावच्छिन्नत्वेपि परोक्षवृत्तेस्तथात्वनियामकसामग्र्यकल्पनात् न च विषयतासंबंधेन वृत्तिकार्यत्वांगीकारसंभवेन प्रत्यक्षवृ
त्तेरपि तदसिद्धमिति वाच्यं शुक्तित्वमस्फुरतीत्यत्रोक्तनिर्वाहासंभवस्योक्तत्वात् अवच्छेदकतासंबंधेन कार्यत्वांगीकारे विनिगमकाभावा
च्च परोक्षवृत्तेस्त्वतीतानागतव्यवहितार्थावच्छिन्नत्वासंभवस्यैव परामर्शादिकार्यतायाः अवच्छेदकतासंबंधानवच्छिन्नत्वे विनिगमक
त्वात् अथ प्रत्यक्षवृत्तेरिन्द्रियसंबद्धविषयकत्वसिद्धये विषयतासंबंधेनेन्द्रियसंप्रयोगकार्यत्वस्यावश्यकत्वमेवावच्छेदकतासंबंधस्य तदेक नन्वच्छे
त्वे विनिगमकं न च चक्षुरादिप्रमाणस्य आलोकरूपस्य शीमहत्वादर्शनत्वादिप्रतिबंधकाभावस्य गंधरसशब्दादिविषयस्यावि
षयतया चाक्षुषादिकं प्रति हेतुत्वावश्यकत्वाद्विषयतया संप्रयोगकार्यत्वेनावश्यकमिति वाच्यं चाक्षुषादेस्तद्विषयकत्वसिद्धये चक्षु
रादेः संप्रयोगस्यैव कार्यत्वे विषयतयैवान्यत्र विनिगमनाविरहादिति चेन्न सधर्मितावच्छेदकविशिष्टबुद्धौ बाधाभावादिरूपाया
विशिष्टधीमात्रे अवश्यतिरेकज्ञानाभावादिरूपायाश्च सामान्यसामग्र्याः कार्यतायाः अवच्छेदकतासंबंधेन वक्ष्यमाणत्वतया विषयतानि
नियेधास्या० वेशस्य तस्याभावरूपकतया संप्रयोगादिजन्यतायां विषयतानावश्यकत्वात् न च निर्विकल्पकप्रत्यक्षस्येन्द्रियसंयुक्तविषयकत्वमुक्तरी
त्यान संभवतीति तदनुरोधेन वक्ष्यमाणत्वतया संप्रयोगादिकार्यत्वे विषयतयावश्यकमिति वाच्यं अज्ञातनिर्विकल्पके मानाभावा
त् विशिष्टबुद्धौ विशेषणज्ञानत्वेन मानाभावात् तदनुरोधेन तत्कल्पने मानाभावात् न च जातिमान् घट इत्यादौ बुद्धिविषयविषयतानियमाय निरव
नेह

छिन्नघटत्वादिविषयताकज्ञानस्य निरवच्छिन्नघटत्वादिप्रकारताकज्ञाने हेतुत्वमावश्यकमिति वाच्यं जातिविशेषेणासंप्रयोगादेव तत्र हेतुत्वा
दन्यथा कारणतावच्छेदके क्षितिगमनाविरहात् वस्तुतस्तु चैतन्यस्यैव ज्ञानत्वेनाध्यासिकस्य तत्संबंधस्य विषयतापरनामकस्योद्भूततया स्य३
वच्छिन्नतामज्ञानवत्त्वे हि विषयीभूतचिद्विषयकत्वेऽपि ज्ञानत्वेन इदंविषयकत्वे यामकताभावः परमतेऽपि ज्ञाने तु स्वव्यवसायविषयत्वस्य स्फुटतया
च्छ्रीनां तु ज्ञानाभिव्यंजकत्वमात्रेण ज्ञानाभिभावकत्वात् परमते मनोयोगादीनां ज्ञानजनकत्ववत् अज्ञानविषयविषयकत्वेनैव तासां प्र
मात्वोपपत्तेः पूर्णानंदाकारकाज्ञानतदभिभावकवृत्त्योः चैतन्यविषयकत्वस्य तुल्यत्वेनातदभिभावकवृत्त्यंतरव्यापितत्वेन कल्प्यं तत्र वृत्तेः सं ते५
सर्गविशेषिततयानुभवस्थले एकानुयोगिकापरप्रतियोगिकत्वविशिष्टसंसर्गावच्छेदेनैव चैतन्यविषयता यथा इमा भूः क्लिपत्तणामि
घटीपं कर्मतो भूतलमियं वर्ततं वा इह संपुक्तमतृमिनोमीत्यादौ संसर्गाविशेषिततयातेदनुभवस्थले निर्विकल्पकवृत्तेः क्वचित्तत्त्वहि
यावच्छेदेनैव यथा सोयमित्यादिवाक्यजन्यज्ञानादौ अखंडव्यक्तिमात्रावच्छेदेन क्वचिद्विषयानवच्छेदेनैव चैतन्ये विषयतायथा
महावाक्यादेस्तत्त्वमस्यादेरखंडचिन्मात्रविषयता अथ यत्र विषयविशेषितवृत्तेर्जन्यतगादिकं तत्र प्रत्यक्षवृत्तेर्विशिष्टवि
षयावच्छेदेनैव चैतन्यस्य जन्यत्वादेर्युक्तत्वेऽपि परोक्षवृत्तेर्विशिष्टविषयावच्छिन्नत्वेन जन्यत्वादिकल्पनागौरवस्यायुक्तत्वात् उद्धविक
कल्पेऽपि वृत्तेर्युक्तमिति चेन्न इदं हि गौरवं सविषयकज्ञानस्य नित्यत्वे वृत्तेनत्र च महदेव लाघवं पूर्वमेव प्रदर्शितं अथ विषयतायानित्यत्वसा राम०
न्तरूपाया इष्टिरूपसंबंधरूपायाः स्फुटत्वेऽपि इच्छादिभिरिव परोक्षवृत्त्यापि तद्रूपानोल्लाघवात् साक्षात्संबंधः कथं न कल्प्यत इति चेत् १३
ल्प्यतां यादृशं भवति तद्रूपेण संभवतीति चेदतीतानागतादिरूपाणां परोक्षवृत्तीनां च भिन्नदेशकालत्वेन संबंधासंभवादन्यथा सर्वेषामेव

मिथः संबंधस्य वक्तुं शक्यतया भ्रममात्रोच्छेदापत्तेः अथ भिन्नमात्रोच्छेदापत्तेः अथ विभिन्नदेशकालतया भावस्य संयोगसमवायादिसत्यसंबंधव्यापक
त्वेन गृहीतत्वात्तदभावात्तस्य संबंधस्याभावनिश्चयेपि मिथ्यासंबंधः कथं न प्रतीतिबलात्कल्प्यत इति चेन्न वह्निमनुमिनोमीत्यादिप्रतीतेर्वह्न्याद्य
वच्छिन्नायाश्चैतन्यविषयतानिरूपकानुमित्यादिविषयकत्वेनोपपत्तेः संबंधान्तराकल्पकल्पकत्वात् अन्यथा सर्वत्र साक्षात्संबंधकल्पनयाप
रंपरासंबंधोच्छेदापत्तेः ॥ अज्ञातविषयचिद्विषयकत्वं विना वृत्तेरज्ञातज्ञापकत्वरूपप्रमात्वानुपपत्तेरज्ञातं वह्न्यादिमत्त्वं मयानुमितमित्याद्यनु
भवेन वह्न्याद्यवच्छिन्नचिद्रूपसत्ताविषयकत्वस्य परोक्षवृत्तेर्ग्रहणात्तेनैव नाभासितमस्त्येवेति नित्यात्मेति अथात आदेशो नेति नेतीत्यादिश्रु
तिबाधितत्वेन तज्ज्ञानांशप्रमाणत्वाद्यनुपपत्त्याश्च वृत्तेरनवच्छिन्नचितीव प्रत्यक्षादीनामवच्छिन्नचित्येव विषयत्वौचित्यात् अज्ञानप्रमयोः समा
नविषयत्वौचित्याच्च अज्ञानस्य चिद्विषयत्वौचित्यात् आवरकत्वं वक्ष्यते तस्मात्सर्वत्र वह्न्यादिसंबंधावच्छिन्नचैतन्यविषयताकानु
मितित्वादिनैव परामर्शजन्यत्वादिस्वीकारे बाधकाभावः अत एव सर्वप्रमाणवेद्यस्मिन् ब्रह्मरूपेस्मिन्नव्यवस्थिते इत्यादिवा
र्तिकाद्युक्तसिद्धान्तः संगच्छते एवं च परोक्षवृत्तिस्थले वृत्त्यवच्छिन्नसाक्षिणि विषयस्यानध्यस्तत्वेपि यत्र चिति तस्याध्यासः साक्षिणस्तद
भिन्नत्वाद्विषयज्ञानत्वं वाच्यं तथा च वृत्त्यभावकालेपि वह्निं जानामीत्यादिव्यवहारः स्यात् वृत्त्यवच्छिन्नस्य तस्य तत्त्वे तु वृत्तेरेव ज्ञानत्वं यु
क्तं सुखादिस्थलेव वृत्त्यस्वीकारेण तज्ज्ञानं दुर्वचं स्यादिति अपि निरस्तं उक्तरीत्या अज्ञातविषयतारूपावरणानवच्छेदकविषयाध्यासि
कसंबंधस्तद्भिन्नसाक्षिण एव जानामीत्यादिव्यवहारनियामकत्वात् तत्र दंतःकरणावच्छिन्नयोरेवावरणवृत्त्योरभिभाव्याभि
भावकत्वात्तत्र दंतःकरणावच्छेदेन वृत्त्यभावकाले तादृशव्यवहारापत्त्यसंभवात् तस्मात्सुखादेः साक्षात्कारादिव्यवहारानुरोधेन यत्साक्षा
दपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः अयमात्मान्तरो बाह्यः कृत्स्नः प्रज्ञानघन एवेत्यादिश्रुत्यात्मन एव साक्षात्कारत्वज्ञानत्वापाद्यावद्रूपकत्वे

आत्मनीव चाक्षुषादिवृत्तावपि साक्षात्कारत्वज्ञानत्वादिकल्पनं निर्युक्तिकमेव ननु ज्ञानं प्रकल्प्योकरीत्यात तस्य साक्षात्कारादिव्यवहारनिर्वाहक
त्वं कल्पनाद्वयरूपत्वं चाक्षुषादेरेव साक्षात्कारत्वज्ञानत्वादिकल्पनमेव युक्तमिति चेन्न ज्ञानस्यावरूपकत्वात् सर्वाः प्रजा अहरहर्गच्छन्त्य ए
तं ब्रह्मलोकं न विदन्तीतित्यादिश्रुत्या सुषुप्तौ ब्रह्मस्फुरणाभावमुक्त्वा अनृतेन हि प्रत्यूढा इत्यादिश्रुत्या न तत्रादृष्टिमिथ्यारूपेणाज्ञानेन
प्रत्यूढ्यादिता ज्ञादितत्वस्य तत्र हेतुत्वोक्तेः एवं नीहारेण प्रावृता अविद्यायां अन्तरे वर्त्तमानाः जीवेशावाभासेन करोति माया चाविद्या च
स्वयमेव भवतीत्यादिश्रुतेः अज्ञानेनावृतं ज्ञानमित्यादिस्मृतेश्च न चान्तादृशे देज्ञानाभावोक्त इति वाच्यं सत्यात्मकत्वतविरोधेन्येवान्
तत्रावृस्यानन्तं शुक्तो रजतमित्यादौ प्रयोगात् ज्ञानाभावस्य स्वस्मिन्नेव हेतुत्वोक्तस्य संभवात् मन्मते सुषुप्तस्य निर्विज्ञेय ब्रह्माभिन्नत्वेप्यज्ञा
नाभावोव ब्रह्माभिन्नस्य साक्षिण एव ब्रह्मस्फुरणत्वमित्यभिप्रायेण तदुक्तिसंभवात् यदभावविशिष्टस्यैव यस्य व्यवह्रियमाणत्वं तस्यैव त
दावरकत्वव्यवहारात् यथावरककपालादेर्दीपादेर्न्न च ब्रह्माकारवृत्तिज्ञानाभावस्तथा तत्सत्वेपि जीवन्मुक्तो ब्रह्मणो व्यवहारात् चैतन्यरूप
ज्ञानेस्वाभावस्यावरकत्वोक्ते निरालंबनत्वापातात् किंच स्वस्वरूपं न जानामि पुरोवर्त्तितं न जानामि त्वदुक्तमर्थं न जानामीत्याद्यनुभवे भाव
रूपाज्ञानानवगाहनात् तदपलापासंभवः तत्रापि ज्ञानाभावो विषय इति वाच्यं प्रतियोगिज्ञानसत्वे स्वरूपादिज्ञानस्यैव सत्वे न तदभावप्रत्य
क्षासंभवात् तदसत्वे त्वभावग्राहकसामग्रीविरहात् न च स्वरूपादिज्ञानसत्वे स्वरूपाद्यज्ञानं नास्ति तदसत्वे तु विशेषणतावच्छेदकप्रकारक
ज्ञानाद्यभावेन तदनुभवासंभव इति भावरूपमज्ञानमपि कथं ग्राह्यं यदि च साक्षिणो नित्यत्वेन तत्रोक्तज्ञानादेरहेतुत्वेन तस्य भावरूपाज्ञानवि राम
षयकत्वसंभव इत्युच्यते तर्हि ज्ञानाभावविषयकत्वमपि तस्य तथैव संभवतीति वाच्यं ज्ञानाद्यभावस्य साक्षिभिन्नेपि प्रतीयमानत्वात् साक्ष्यनध्य १४
स्तत्वेन साक्षिसंबंधनिर्वाहकप्रमावृत्तिं विना साक्षिवेद्यत्वासंभवात् अथाविद्योपहितचैतन्यस्यैव साक्षित्वपक्षेऽन्तःकरणावच्छेदेनेव घटाद्यव

च्छेदेनापि ज्ञाताद्यभावस्य साक्ष्यभ्यास्वीकारात् साक्षिमात्रवेद्यत्वसंभवश्च अवध्यादिज्ञानस्य दीर्घत्वादिव्यवहारद्वयाभावव्यवहारे तत्र तदधिकरणग्राहकसाम
ग्र्याहेतुत्वात्तदभावकाले तस्यानापत्तिरिति चेत्प्रमेव गगनादेः साक्षिवेद्यत्वे सिद्धांतसिद्धेपि तद्व्यवहारे तत्र तदधिकरणग्राहकचक्षुराद्यपेक्षेति चेन्न अभावबोध
कत्वाद्यन्यत्वादिरूपतद्व्यवहारत्वापेक्षयाभावप्रत्यक्षत्वस्यैव लघुत्वेन तज्जन्यतावच्छेदकत्वौचित्येन प्रतियोग्यनुयोगिनिर्विकल्पोत्तरमभावस्यापरोक्ष
पि प्रत्यक्षत्वानंगीकारेणाभावप्रत्यक्षस्य नित्यसाक्षित्वासंभवात् अतएव गगनादेश्चक्षुरादिगम्यत्वौचित्यात् भट्टाचार्यादिमतेन तथांगीकाराद
अपींद्रियसंबद्धविशेषणतयाभावप्रत्यक्षे जननीये तस्य प्रतियोग्यनुयोग्यविशेषितस्यालीकतया तद्विशेषितस्य प्रतियोग्यनुयोगितावच्छेदकवि
शिष्टवैशिष्ट्यगोचरत्वप्रत्यक्षत्वेन प्रतियोग्यनुयोगितावच्छेदकप्रकारकज्ञानजन्यत्वादभावप्रत्यक्षत्वेन न तादृशज्ञानजन्यत्वमिति चेन्न तादृशवै
शिष्ट्यगोचरप्रत्यक्षत्वेन जन्यत्वांगीकारेपि स्वरूपं न जानामीत्यादिप्रत्यक्षस्याभावविषयकत्वे उक्तानुपपत्तितादवस्थ्यात् इंद्रियसंबद्धविशेषणा
तयेदंत्वादिप्रकारेणाभावप्रत्यक्षस्य समवायादिप्रत्यक्षस्य च प्रतियोग्याद्यविशेषितस्याप्युदयेन प्रतियोगितावच्छेदकादिप्रकारकज्ञानस्य द्रव्यान्यस्य
समवेतस्य प्रत्यक्षं प्रति कारणीभूतेंद्रियसंबंधविशेषणतायां व्याप्यसामग्रीत्वासंभवेन तत्साकारज्ञाभावप्रत्यक्षवारणार्थं प्रतियोग्यादिज्ञानस्या
भावप्रत्यक्षं प्रति कारणत्वावश्यकत्वाच्च अभावस्यानुपलब्धिप्रमाणगम्यत्वेपि प्रतियोग्यादिनिर्विकल्पोत्तरमभावानुपलब्धज्ञानस्यादर्शनेन
प्रतियोगितावच्छेदकादिप्रकारकज्ञानस्य तत्र हेतुत्वात् अथ स्वरूपं न जानामीत्यादौ स्वरूपनिष्ठनिरवच्छिन्नविषयताशालिनो युत्तदुपधाय
कस्य वा पुरोवर्त्तिनमित्यादाविदंत्वान्यद्रव्यत्वादिव्याप्यधर्मानिष्ठनिरवच्छिन्नप्रकारताकस्य त्वदुक्तार्थमित्यादौ त्वदुक्तार्थत्वव्याप्यधर्मानिष्ठनि
रवच्छिन्नविषयताकस्य ज्ञानस्याभावो विषयस्तथा च सामान्यतः स्वरूपादिज्ञानकारणीभूतस्य सत्वेपि तादृशाभावधीसंभव इति चेन्न सोह
मित्यादिवाक्यजन्यस्य स्वरूपनिष्ठानिरवच्छिन्नविषयताकज्ञानस्य सत्वेपि स्वरूपं न जानामीत्यनुभवात् पामराणां तज्ज्ञानमुपधायकत्वाद्यनुपस्थितावपि

तत्सत्वात् यदि मुक्त्युपधायकज्ञानप्रतियोगिकसमवायेन ज्ञानसामान्याभावो विषयस्तथापि पामराणां तादृशज्ञानत्वमविषयीकृत्यापि जायमानस्य न जानामी
त्यनुभवस्यानुपपत्तेः तादृशानुभवे तादृशज्ञानत्वविषयीकरणे तु नरं तद्विशिष्टबुद्ध्यापत्तेः इदं पृथिवीत्वादिज्ञानकाले विशेष्यतादाविदं न जानामीत्या
दिनाभुक्तित्वाद्यज्ञानानुभवात् त्वदुक्तार्थत्वव्याप्यधर्मविशिष्टज्ञानविषयताकधीसत्वेपि त्वदुक्तार्थं न जानामीत्यनुभवात्त्वदुक्तार्थस्येव
स्वगात्यायप्राप्यं तन्निवेशो यदा घटत्वेन परस्त्वदुक्तस्तदा घटत्वरूपेण त्वदुक्तार्थत्वव्याप्यघटत्वादिज्ञानसत्वे तादृशानुभावानुपपत्तेः ४ किंवाद्विवा
व्यस्थले विशिष्टार्थाप्रसिद्ध्या त्वदुक्तविशिष्टार्थत्वव्याप्याप्रसिद्धेरुक्तव्याप्यत्वस्य प्रतियोगितावच्छेदके निवेशो विशिष्टवाक्यार्थत्वव्याप्यत्वज्ञा
नस्य पूर्वमवश्यमपेक्षायां तदसत्वे तादृशानुभवस्य जायमानस्यानुपपत्तेरनिवेशे च विशिष्टत्वानुगमानुपस्थित्या तन्निष्ठानवच्छिन्नविषयता
कज्ञानत्वावच्छिन्नाभावप्रत्यक्षानुपपत्तेः किंचाभावस्य साक्षिरूपस्यासांगीकारेपि विषयविशेषितज्ञानाभावस्य न साक्षिवेद्यत्वसंभवः सा
क्ष्ययोग्यधर्मघटितधर्मावच्छिन्नाभावस्य साक्ष्ययोग्यत्वादन्यथा सुखाद्यभावस्यैव गुरुतरघटत्वावच्छिन्नाभावस्यापि साक्षियोग्यता
पत्तेः ननु साक्षियोग्यत्वं कश्चित्सहजतयावरणाभावाद्यथा सुखादेः कश्चिच्चावरणाभिभावकप्रत्यक्षवृत्तियोग्यत्वात्तथा च धर्माधर्मगुरु
त्वादेरावृतत्वेन प्रत्यक्षवृत्त्ययोग्यत्वे ~~त्वेन ननु साक्षियोग्यत्वं कश्चित्सहजतयावरणाभावाद्यथा सुखादेः~~ न च साक्ष्ययोग्यत्वात्तद्ज्ञानाभा
वस्य साक्ष्ययोग्यत्वेपि घटादेः प्रत्यक्षवृत्तियोग्यत्वेन साक्षियोग्यत्वात्तद्ज्ञानाभावस्य साक्षिवेद्यत्वे बाधकाभाव इति चेन्न घटादिज्ञान
त्वस्य घटादिविषयताशालित्वविशिष्टज्ञानत्वरूपतया तत्र सकललघुगुर्वीयज्ञानानां वैशिष्ट्यघटकत्वेन तादृशज्ञानसाधारणविषयता राम०
नां च घटकतया तदवच्छिन्नाभावस्य साक्ष्ययोग्यत्वावश्यकत्वात् नहि गुरुवांतरीयज्ञानं तद्विषयतादिकं गुरुवांतरसाक्षिवेद्यं संभवति न १५
च विषयतायाज्ञानभेदेपि व्यासंगीकारेणैकस्यास्वतस्याः सकलगुरुषसाक्षियोग्यता द्वयोरपि विषयताकाच ज्ञानत्वयोरेकत्र प्रतियो

गितायां मिलित्वा वच्छेदकत्वं मिलित्वा वच्छेदकत्वमिति वैशिष्ट्यस्यावच्छेदकशरीराप्रविष्टत्वाच्च नोक्तदोष इति वाच्यं विषयतायाः सम
वायवत् प्रतियोग्यनुयोगिभेदेन भेदावश्यकत्वादन्यथातिप्रसंगात्त्वावच्छेदकधर्मसंबंधभेदेनावच्छेदकताया भेदावश्यकत्वेन व्यासज्यवृत्ति
त्वानुपपत्तेः॥ प्रत्येकस्य वातिप्रसक्तत्वादवच्छेदके वैशिष्ट्यस्यावश्यं घटकत्वाच्च अपि यथा वृत्तिज्ञाने विशेषणतया सर्वं साक्षिभास्यमिति सिद्धांत
उच्यते तथैवाभावविशेषणतया ज्ञानविशेषणतया सर्वं साक्षिभास्यमुच्यतामिति चेन्न वृत्तिज्ञानाज्ञानयोरिव तज्जन्ये घटादिविषयकत्वादिध
र्मेष्वावरणाभावेनावरणाभावेनावरणानवच्छेदकस्य साक्षिसंबंधस्य सत्त्वात् साक्षिभास्यत्वसंभवेप्यभावस्य साक्षियोग्यघटादिविष
यकज्ञानत्वावच्छिन्नाभावत्वेन सामान्यत एवायोग्यत्वकल्पनात् साक्षिणा घटादिज्ञानाभावव्यवहारासंभवात् अन्यथा मपि घटज्ञानं सा
क्षात्करोमीतिवत् पटघटज्ञाने साक्षात्करोमीत्यादिव्यवहारापत्तेः॥ न च घटादिविषयकज्ञानप्रतियोगिकत्वमप्यभावस्येति आवरणं नांगी
क्रियते तथा च तत्राप्यावरणानवच्छेदकसाक्षिसंबंधरूपसाक्षिभास्यत्वसत्त्वेपि पटाद्यवच्छिन्नानुयोगिताकत्वरूपेऽभावधर्मे साक्षि
संबंधस्यावरणावच्छेदकत्वांगीकारात् पटादौ घटज्ञाने साक्षात्करोमीति व्यवहाराभाव इति वाच्यं पटाद्यनंताधिकरणावच्छिन्नानु
योगिताकत्वेषु साक्षिसंबंधानामनंतानामावरणावच्छेदकत्वकल्पनापेक्षया ज्ञानाभावस्य साक्ष्ययोग्यकल्पनाया एव युक्तत्वात् किंच
इदं रजतमित्यादिभ्रमस्थले इदंत्वावच्छिन्नविशेष्यतानिरूपितरजतत्वादिभेदप्रकारताशालित्वे सति यत्तत्तदप्रामाण्यज्ञानाभा
वकूटवान् चाक्षुषादिनिश्चयस्तत्त्वावच्छिन्नाभावत्वेन बाधाभावस्य कारणत्वं वाच्यं तत्र चावच्छेदकघटकानामनंतानां विशेषणविशे
ष्यभावे कामचारेणानंतहेतुतापत्त्या गौरवं स्वं तादृशानिश्चयसामग्र्यभावत्वेनापि हेतुत्वं वाच्यं अन्यथा तादृशानिश्चयोत्पत्तिकाले तादृशा
भ्रमोत्पत्त्यापत्तेस्तथा चैतेनाप्यतिगौरवं न च कार्यसहभावेनोक्तनिश्चयाभावत्वेन हेतुत्वांगीकारान्नोक्तसामग्र्यभावस्य हेतुत्वमिति वा

च्चे कार्यकालवर्त्तित्वविशिष्टस्य कार्यप्रागसत्त्वेन तत्त्वेन कारणत्वासंभवात् अथोक्तनिश्चयाभाववत्त्वे सति यः सामग्रीमत्क्षणोत्तरक्षणा
स्तत्त्वे कार्योत्पत्तिव्याप्यमथवा कार्योत्पत्तिकालावच्छेदेन तत्त्रा कालावच्छेदेन चयत्कार्यवद्वृत्तिनिष्ठः कारणतावच्छेदकसंबंधावच्छिन्नप्रति
योगिताकोऽभावस्तत्प्रतियोगितानवच्छेदकोक्तनिश्चयाभावत्वे म[?]वोक्तनिश्चयाभावस्य कारणत्वमिति कार्यसहभावेन कारणत्वमि
ति वा स्यार्थ इति चेन्न अन्याविशेषितस्यैव सामग्रीक्षणोत्तरक्षणत्वस्य कार्योत्पत्तिव्याप्यत्वांगीकारादन्यथा दंडादेर्हेतुत्वमनंगी
त्य दंडचक्रादिसामग्रीमत्क्षणोत्तरक्षणत्वस्य घटाद्युत्पत्तिव्याप्यत्वमंगीकृत्य दंडादिहेतुत्वस्यापि लोप्यतापत्तेः यदि चान्वयव्यतिरेकाभ्या
पदसत्वे६ मुपक्षिणोऽस्त्वितरसकलकारणसत्त्वेऽग्रिमक्षणे कार्यव्यतिरेकस्तत्त्वस्यैव कारणतानुरूपत्वाद्दंडादीनामवरूपकारणत्वमिति तुच्यते त
दोक्तनिश्चयसामग्र्यभावेऽपि तत्तुल्यभावरूपाज्ञानांगीकारेण तु रजतादिकं प्रति इदंत्वाद्यवच्छिन्नाश्रयताकत्वसनिरजतादिभेदाद्यवच्छि
न्नविषयताकाज्ञानत्वेन एकस्य संबंधेन हेतुत्वमज्ञानत्वे च ज्ञाति विशेषवः नजानामीत्यनुगतेः प्रतीत्याक[?] हेतुतावच्छेदकत्वादिना चासि
द्धः यदा चेदं न रजतमित्यादिबाधनिश्चयस्तदा तदभिभाव्यस्योक्ताज्ञानस्यैवाभावात् न रजताद्युत्पत्त्यापत्तिः यदा चोक्तनिश्चयो न जातो जातो
पि वाप्रामाण्यज्ञानाद्यास्कंदितस्तदा रजतभेदं न जानामीति तादृशाज्ञानानुभवात् तादृशाज्ञानांगीकाराद्रजताद्युत्पत्तिरेव वाप्रामाण्यज्ञा
नाभावनिश्चयत्वादीनां निवेशो नानंतहेतुत्वस्य तादृशसामग्र्यभावहेतुत्वस्य वा कल्पनान्महद्वैलाघवं ननु बाधनिश्चयस्याज्ञानध्वंस
रूपस्योत्पत्तिकाले रजताद्युत्पत्त्यापत्तिर्ज्ञानस्याज्ञानध्वंसत्वपक्षे पूर्वक्षणेऽज्ञानसत्त्वात् ज्ञानस्याज्ञाननाशकत्वपक्षे बाधनिश्चयोत्पत्ति राम
क्षणेऽपि तत्सत्त्वात् न चाज्ञानध्वंसो बाधनिश्चय इति पक्षे तदुत्पत्तिक्षणे समवायिकारणस्याज्ञानस्याभावात् कुतः कार्यमापाद्यमिति वाच्यं १६
तत्क्षणेऽज्ञानस्याभावेऽपि अज्ञानरूपद्रव्यावच्छेदेन कारणत्वात् यः क्षणस्तदुत्तरक्षणनिष्ठकार्योत्पत्तेरज्ञानावच्छिन्नत्वापादने बाध

काभावादिति चेन्न कपालादेर्ध्वंसोत्पत्तिक्षणोत्पन्नघटाद्युत्पत्त्यापत्तिवारणाय जन्यसत्त्वावच्छिन्नप्रतिप्रतियोगितास्वाव्यवहितपूर्वत्वं चेत्यु
भयसंबंधेनाखंडोपाधिविशेषरूपेण ध्वंसत्वेन प्रतिबंधकत्वकल्पनात्तस्य चोक्तापत्तिवारणानुपपत्तेर्युक्तापत्तिवारणायोक्तहेतुत्वस्याव
रूपेवाच्यत्वात् परेषां सत्वं द्रव्यगुणकर्मसु कार्यता च समवायेनास्माकं तु सत्वं द्रव्यमात्रे कार्यता च तादात्म्येनेत्येतावन्मात्रभेदात् तद्बाधनि
श्चयस्याज्ञाननाशकत्वपक्षे तु तृतीयक्षणसाधारणमव्यवहितपूर्वत्वं निवेश्यं अथैवमव्यवहितपूर्वत्वसंबंधेन यो बाधनिश्चयस्याभा
वः विशेषणतासंबंधेन तद्विशिष्टो यो बाधनिश्चयाभावस्तत्त्वेनैव हेतुत्वसंभवान्मन्मतेऽपि बाधसामग्र्यभावस्य न हेतुत्वं अगृहीताप्रामाण्य
कानाहार्यत्वादिनाभूतबाधनिश्चयस्य विरोधित्वं किं तु तत्त्वेनैव निश्चयत्वस्याव्याप्यवृत्तिजातित्वमंगीकृत्याहार्यगृहीताप्रामाण्यकादिज्ञा
नेकतरंगीकारेणोत्तमविरोधित्वापत्तेः ४ तथा च किं भावरूपाज्ञानकल्पनेति चेन्न उक्तरीत्यामपि महागौरवात् तथा च ज्ञान
त्वजात्यपेक्षया निश्चयत्वावच्छिन्नसमवायावच्छिन्नप्रतियोगिताकत्वसंबंधेन निश्चयविशिष्टाभावत्वं गुरुतरं मुक्तसंबंधेन ध्वंसा
भावापेक्षया च निश्चयस्य स्वविषयविशेषितस्याभावो गुरुतरं अव्यवहितपूर्वत्वं च स्वसामानाधिकरण्यस्ववृत्तिकृतिवृत्तित्वं चेत्यु
भयसंबंधरूपं तत्र कृतेः स्ववृत्तित्वं कालिकं कालिकसंबंधेन स्वप्रागभाववत्त्वं चेत्युभयसंबंधेन कृतिवृत्तित्वं च कालिकेनेति त्वया वाच्यं
स्व ममतु स्ववृत्तिकृतिवृत्तित्वे ध्वंसाति कृतिमत्कृतिवृत्तित्वो वा अव्यवहितपूर्वत्वे वृत्तिः कृतिमत्ता च कालिकेनैव स्वप्रागभावासमानकालीनस्वास
मानाधिकरण्येन च स्वप्रतियोगिताविरहेण कृतो कालिकावच्छिन्नस्वप्रागभाववत्त्वस्याकृतिवृत्तित्वे च समवायविशेषणतोभयसंबंधघ
टितसामानाधिकरण्यविशेषितत्वस्य निष्फलत्वात् तथा वाऽव्यवहितपूर्वत्वमपि ते गुरुतरं निश्चितोऽमीति प्रत्ययस्य प्रमात्वजात्यापा
पत्तेः संशयस्य च प्रमात्वानंगीकारान्निश्चयत्वजात्यादेरपि मानाभावः गृहीताप्रामाण्यकादिज्ञानाविषयभ्रमरूपापारंपर्यो निश्चयत्वानंगी

कारेविक्षतिविरहात् आनिभासिकप्रमात्वेनैव तस्योनिश्चयत्वसंभवात् इदं रजतमित्यादिभ्रमं प्रति बाधाभावादिनिष्ठजनकतायां परं पर्या
वच्छेदकत्वेन तादृशजातिकल्पनापेक्षया तादृशकारणतास्थानीयकारणत्वे साक्षाद्वच्छेदकतया वैजात्यविशेषस्यैव कल्पयितुमुचितत्वेनेन्द्रियस
न्निकर्षादिघटितहेत्वाश्रयत्वकल्पनेन विनिगमकाभावेन चातदाश्रयत्वेतानौ ज्ञानस्यैव कल्पनौचित्यात् बाधसामग्र्यादिप्रतिबंधकत्वाकल्पनेनोप
दर्शितलाघवानुग्रहात् प्रमांप्रत्यपि भ्रमात्मकबाधाभूनिश्चयाभावनियतसंनिकर्षादेरेव जातिविशेषेणशक्तिविशेषेणवाहेतुत्वसंभवात्
अनुमित्यादेःपरामर्शादिकारणत्वस्थलेऽपि विशिष्टव्याप्यपक्षवैशिष्ट्याघज्ञानाभावस्योक्तवैशिष्ट्यविषयकप्रमात्वावच्छिन्नस्यैव वाहेतुत्वसंभ
वादतिरिक्तनिश्चयत्वकल्पने प्रयोजनाभावात् नच शक्तिविशेषएव नियतत्वमिति अनुमित्यनुपधायकपरामर्शे शक्तिविशेषसत्वेमाना
भावान्निश्चयत्वस्यव्यवहाराश्च तथाज्ञानस्य विदाश्रयत्वविषयत्वयोः कदाचिद्वैदत्वविशिष्टस्यकादाचित्कस्यावश्यं वाच्यत्वात् अन्यथा वा
धनिश्चयसत्त्वेपितदभावसत्वात् प्रमाघापत्तेः अथ तत्तत्कालवृत्तिविशेषणतयोक्ताभावोहेतुर्विशेष्यतामात्रं तूक्ताभावस्यात्मनिसार्वदिक
मितिचेन्न संबंधानतुगमेनानंतहेतुत्वापत्तेस्तत्तत्कालत्वेनैव हेतुत्वापत्तेश्च संबंधाननुगमस्यादोषत्वे प्रकृतेनानुगमस्यापि दोषत्वापत्ते
रन्यथापरिभाषामात्रत्वापत्तेः पार्थिवपरमाणुगताभावरूपाद्यभावाश्रयतायाः कालविशेषावच्छिन्नत्वस्य गगनादिगतायाश्च रूपविशेषाधा
[illegible] घभावाश्रयतायाः कर्णभेर्याद्यवच्छेदस्य च परेरपि कल्पनात् किंच भ्रमस्थले बाधाभावस्य हेतुत्वेन
तत्कार्यता इदंरजतमित्याद्याकारकवाक्ष्यत्वादिना वाच्या उक्तनयेन ज्ञानस्य हेतुत्वे तु तत्कार्यता आतीतिकरजतत्वादिनैवेत्यपि महालाघव राम
मप्येवमुक्ताकारनियमाभ्रमेकथमितिचेत् शृणु यद्यप्युक्तनयेन ज्ञानस्य रूप्यत्वे हेतुत्वे तादात्म्येन उक्तरजतत्वादिनैवकार्यतेति तथापि इदं र १०
माद्यंशविषयकत्वंसंबंधावच्छेदेनाप्यासिकसंबंधेन विदाश्रिता ज्ञानपरिणामस्य रजतादेस्तादृशज्ञानतादात्म्यादेवोक्तचित्संबंधावच्छेदेन्यो
रजतभेदाद्यवच्छेदकं कदाचिदविद्यमानमपि तत्तज्ञोर्नावच्छेदकमितिकल्पनमसमंजसमितिवाच्यं तन्मतेपिनित्यस्यबाधनिश्चयाभावस्यात्मसं
बंधेनतत्तत्क्षणत्वावच्छिन्नत्वं८

१ सिकसंबंधेन विद्याश्रितत्वोपपत्त्याऽभ्रमरूपायाः इतेत्स्तादृशरजताद्यवच्छिन्नत्वेनोक्तकारनियमोपपत्तेः यदवच्छेदेनाध्यासिकसंबंधेन विद्या
श्रितात्वज्ञानस्यपारिणामाय इजतादिकं तत्सदवच्छिन्नाध्या
४ सिकसंबंधेन विद्याश्रितमिति नियमात् अथ रजतादिनिष्ठायाः साक्षिप्रत्यक्षीयप्रकारताया इदंताद्यवच्छिन्नविशेष्यतानिरूपितत्वे स्यादिसंस
र्गतानिरूपकत्वं कथमिति चेन्न आध्यासिकस्य चिदात्मसंबंधस्यैव विषयतापरनामत्वात् तस्य च रजतभेदाद्यज्ञानचित्संबंधरूपस्य इदमाद्य
ध्यस्तचित्ताः संबंधावच्छेदेन तादृशसंबंधरूपस्य चेदमादिचिताः संबंधावच्छेदेन तादृशसंबंधरूपस्य चेदंत्वादिसंबंधचितः संबंधावच्छेदेनता
दृशसंबंधस्य चेदंत्वादिचितः संबंधावच्छेदेन स्वीकारात् तेषु च संबंधेषु प्रकारतासंसर्गताविशेष्यतावच्छेदकतात्वद्रूपाणां वैलक्षण्यापा
नामनुभववलादेव व्यवस्थितत्वात् परैरपि तेषामनुभववलादेव व्यवस्थितत्वांगीकारात् परस्परावच्छिन्नतावद्विषयताशालि साक्षि
ज्ञानव्यवहारोपपत्तेः अथ रंगावच्छिन्नाश्रयताका इजतान्यत्वव्याप्यशुक्तित्वाद्यवच्छिन्नविषयताका ह्यज्ञानात् तत्र तादात्म्येन रजताद्यु
त्पातु शुक्त्याद्यवच्छिन्नाश्रयताके रजतभेदावच्छिन्नविषयताकाज्ञानकार्यत्वं रजतत्वादिनैव न संभवति तादृशाज्ञानविशिष्टरज
तत्वादिना तदंगीकारे तु विपरीतगौरवमिति चेन्न अज्ञानांतरजन्यरजतादिव्यावृत्तजातिविशेषेणैव तत्तदज्ञानकार्यतावच्छेदक
त्वात् बाधाभावकार्यत्वं तु न जातिविशेषेण विशिष्टज्ञानविषयतानां मिथ्यावच्छेद्यावच्छेदकभावासिद्ध्यापत्तेः अत एव यदवच्छिन्न
चैतन्ये व्यावहारिके प्रातिभासिके वा यदध्यस्तं तद्विषयतावच्छेदेन तद्विषयताकं चैतन्यस्याभ्यंतरपत्यनावृतत्वात्तस्य तद्विषयतावच्छि
न्नतद्विषयताकसाक्षात्कारत्वं यः सर्वज्ञ इत्यादिश्रुतिसिद्धं संगच्छते अत एव च जात्याद्यवच्छिन्नचितिव्यक्त्यादेरध्यास इति सिद्धांत
अन्यथा जात्यादिविषयतावच्छिन्नव्यक्त्यादिविषयताकज्ञानासिद्धेः एवं च इदमाद्यध्यस्तचिताः संबंधावच्छेदेनाज्ञानचिद्विषयतात्
पद्रूपताव्यवहारनियामकत्वेन संबंधः उक्तयुक्तिभिस्तमेव भांतमनुभाति सर्वमित्यादिभिश्च सिद्धः रजतभेदादिचिताः संबंधावच्छे
देन चित्यज्ञानविषयतारूपादन्तत्वव्यवहारनियामकोऽन्यः संबंध उक्तोक्तिभिरन्तेत नहि प्रकृष्टानीहारेणावृत्ताः अज्ञानेनावृते

ज्ञानमित्यादिश्रुतिस्मृतिभिश्च सिद्धे इति रजताद्युपादानाज्ञानस्य मिथ्याविलक्षणसंबंधद्वये विश्रान्तिपर्यन्तेत्यपूर्वं निरस्तं किंचैतेनेदंनिष्ठ
रजतभेदादिचितोः संबंधावच्छेदेनाज्ञानचितोरेक एव संबंधोऽङ्गीक्रियतामथवाऽज्ञानस्य वाऽज्ञानस्यापि तादृशभेदादावेव विशिष्टविषयताङ्गी
१८ क्रियतां किंचित्यज्ञानस्यैकसंबंधद्वयेनाहंकारावच्छेदेन चित्संबंधस्याव्यवधायकतया नतरां ज्ञानस्य साक्षिभास्यत्वसंभवादित्यादिकं परा =
स्तं तादृशभेदादिचित्संबंधावच्छेदेन चैतन्यस्यैवाज्ञानसंबंधस्याङ्गीकारे हि तत्परिणामरजतादेरपि तदवच्छेदेनैव चैतन्यसंबंधापत्त्येदंनिष्ठ
रजतभेदवद् इदं रजतभेदवद् इदं रजतमित्यादिरेव भ्रमाकारः स्यान्न त्विदं रजतमित्यादि तादृशभेदविषयतावच्छिन्नरजतादिविषयताकत्वे
न ज्ञानं व्यवह्रियेत न त्विदमेव रजतमात्रविषयतावच्छिन्नरजतविषयताकत्वेन एवं इदं न जानामि इति वत् रजतं भिन्नं न जानामीति व्यवहा
रः स्यात् इदंत्वविशिष्टस्य रजतभेदस्य च द्वयोरेकजातीयेऽज्ञानस्य चित्संबंधेऽवच्छेदकत्वाविशेषात् अथ ज्ञानस्यैवं त्यादिकल्पनायां
दोषः विशिष्टविषयता हि इदंत्वावच्छिन्नाद्यरूपतावच्छिन्नरजतभेदत्वावच्छिन्नविषयतानां तथा च उद्देश्यविशेषितया अज्ञानं व्यवह्रि
येत न तु विषयविशेषितत ये [redacted] ति चेन्न रजतभेदनिष्ठस्य अज्ञानसंबंधस्य विषयतावै
इदमादिनिष्ठस्याज्ञानसंबंधस्य उद्देश्यतात्वे च मानाभावात् अथ इदमाद्यविशेषितरजतभेदादावेव विशिष्टविषयतेति चेत्
चैतन्यमात्रे चित्संबंधस्यैकत्वे नोक्तविशिष्टस्य संबंधद्वयावच्छेदेनाज्ञानचितोः संबंधद्वयमात्रकल्पनयोपपन्नायुक्तभेदादिघटकेदंत्वाद्यनंतप राम
दार्थेषु अनंतानामज्ञानविषयतानामवच्छेद्यावच्छेदकभावापन्नानामंगीकारे गौरवं मुक्तभेदादिविषयकाज्ञानजन्यरजतादेस्तादृश १८
विषयकत्वं स्यान्न तु तत्तु ज्ञानस्य इदमेव्याद्यविषयतावच्छिन्नरजतादिविषयताकत्वं रजताद्यवच्छिन्नचितः स्यादपि सिद्धान्ते -

त्या २

पि रजतभेदावच्छिन्नचिद्विषयताकत्वमज्ञानगतं रजतस्य किं न स्यादिति चेत्स्यादेव कुतो नानुभूयत इति चेच्चितो रजत भेदसंबंधस्यावृ
तत्वात्स्वयमभावप्रयुक्तभेदस्या[redacted]च्छिन्नद्विषयकत्वं रजते नानुभूयत इति चेत्तथापि द्वितीयापत्तिः स्थितैव यथाज्ञानस्य तथात्वेपि तथाविधा
ज्ञानकार्यत्वस्य इदमैक्याद्यवच्छिन्नरजतत्वादौ नांगीकारादिदंरजतादिचैतन्यस्य तादृशविषयताकत्वसिद्धिरिति चेन्न हि गोप्यमेव
महन्मूर्द्धिस्वकीयपातितं त्वया यत्तु इदमैक्यादिचितः संबंधावच्छेदेन रजतभेदादेरेवाज्ञानविषयत्वमात्रमस्तु। चैतन्यज्ञानस्यात्र सं
उक्त५ संबंधाभ्युपगममिति तत्तुच्छं भेदादिनिष्ठस्याज्ञानविषयत्वस्य संबंधावच्छिन्नत्वासंभवाद्वच्छेद्याधिकरणे साक्षात्संबंधस्यैवावच्छे
दकत्वाद् इदंरजतादिचैतन्यस्योक्तविषयताकत्वानिर्वाहाच्च एवं च गगनादितादात्म्यादिचित्संबंधावच्छेदेन नैल्यादिचित्संबंधांगीका
रेपि तादृशतादात्म्यादेर्नैल्यादिप्रतियोगिकत्वाभावात् तादात्म्येन नैल्याद्युत्पत्तौ कृष्णाया अवयवनैल्यादिपाकादिसामग्र्या अभा
वेपि गगने नीलमित्यादिभ्रमस्थले नैल्याद्युत्पत्तिस्वीकारे निराबाध एव किंचैतेन जपाकुसुमादिसन्निहितकुसुमादौ लोहित्यादि स्फटिका
भ्रमस्थले वक्ष्यराशिसंप्रयुक्तलौहित्यादेरनुभूयमानस्य स्फटिकादावन्यथाख्यातिरिति वदतः सुदूरपरास्ताः उक्तरीत्या लौहित्या
दावज्ञानहेतुत्वाद्युपकल्पनेन तादृशाज्ञानस्य च स्फटिकादितादात्म्यावच्छेदेन चित्संबद्धत्वात्तत्परिणामरूपलौहित्यादेरपि तथात्वावश्य
कत्वानुपपत्तिसत्त्वात् तादृशाज्ञानस्योक्तविषयानिर्वर्त्तितत्वादिति वाच्यं जपाकुसुमाद्युपाधिसान्निध्यानेन प्रतिबंधात्तयात्तदनिवृ
त्तेः तार्किकादिमते तु तत्र बाधाभावस्य हेतुत्वासंभवेपि जपादिसन्निधानस्यैवोक्तविरोध्यतावच्छिन्नप्रकारताशालिबुद्धित्वाव
दन्यथा लौहित्यादिविशिष्टविषयतायास्तादृशतादात्म्यविषयतावच्छिन्नत्वाद्यनुपपत्तेः न च स्फटिकादौ लौहित्याद्यभावधीकालेपि लौहित्यादिभ्रमस्याजा
यमानस्योक्ताभावाज्ञानजन्यत्वा २

छिन्नं प्रति हेतुत्वमवच्छेद्यं वाच्यमन्यथाऽकुंडे रुक्मप्रकारकत्वस्याकस्मिकतापत्तेः तथा च गौरवं गुणः संयोगेन द्रव्यवान् जातिमानित्यादिभ्र
१९ मस्थले तु गुणाद्यनुयोगिकत्वं द्रव्यादिप्रतियोगिकत्वं चोभयं चित्संबंधावच्छेदेन संयोगाद्युपादानाज्ञानचित्संबंधांगीकारात्ताद्दशाद्य
ज्ञानचित्संबंधस्य च सांसर्गिकविषयतात्वांगीकारान्नानुपपत्तिः॥ संयोगादिविषयतायाश्च ताद्दशप्रतियोगिकत्वादिविषयतावच्छि
न्नत्वमिथ्यात्वान्नापादनीयमथवा गुणादेर्द्रव्यादेश्च चित्संबंधावच्छेदेनैव ताद्दशाज्ञानस्यापि चित्संबंधांगीकारात्ताद्दशगुणादिचि
त्संबंधे विरोध्यतात्वस्य ताद्दशद्रव्यादिचित्संबंधे च प्रकारतात्वस्य स्वीकारादविरोधः एतेन ताद्दशभ्रमस्थले गुणानुयोगिकसंयोगाद्यप्र
सिद्धात चित्संबंधस्याज्ञानचित्संबंधावच्छेदकत्वासंभवः॥ संयोगादेर्द्रव्यादेश्च तत्रोत्पत्तिस्वीकारे गौरवमित्यादिकं परास्तं ह्रदो वह्निमा
नित्याद्याकारकानुमित्याद्याभासरूपभ्रमस्थले तु परमते यथातीतानागतवह्न्यादिनिष्ठविषयतावच्छिन्नातीतानागतह्रदादिवि
मनु षयतानिरूपकत्वं मिथ्यात्वे स्वीक्रियते तथास्माकमप्यतीतानागतह्रदादिसंयोगादिचितः संबंधावच्छेदेनाज्ञानचितः॥ संबंधस्य संभवा
न्मतमते अतीतानागतह्रदादेर्वर्तमानसूक्ष्मावस्थास्वीकारात्तदीयचित्संबंधस्यैवाज्ञानचित्संबंधावच्छेदकत्वसंभवाच्च ताद्दशाज्ञानपरिणा
मवह्न्यादेरपि ताद्दशसंबंधसंभवः॥ अतीतानभिन्नकालीनयोरवच्छेदकत्वासंभवप्रयुक्तो दोषः॥ न च भ्रमविषयीभूतरजतादे राम
श्चाक्षुषानुमित्यादिहेत्वभावात् वृत्तिसूक्ष्मपरिणामरूपसंस्काराभावेन ताद्दशरजतादिस्मरणानुपपत्तिः॥ न च चाक्षुषादि १९
वृत्तिरेव तत्र जायते चक्षुःसंप्रयोगादिसामग्रीसत्वादिति वाच्यं प्रमात्वजात्यवच्छिन्नं प्रत्येवांतःकरणस्य परिणामित्वांगीका

रेण प्रमाद्वेनेरंतःकरणपरिणामचाक्षुषत्वाद्यसंभवात् अज्ञानप्रमयोरेकावच्छेदेन चिद्विषयतानियमाय स्वविषयताया
अवच्छेदकत्वसंबंधेन प्रमां प्रतितेन संबंधेनाज्ञानस्य हेतुत्वकल्पनाद् ज्ञानचिद्विषयतानवच्छेदकेन शुक्तिरजतचित्संबंधे
न प्रमाचिद्विषयताया अवच्छेदकत्वमज्ञानस्य तादृश्यैवं रजतचाक्षुषं मे जातं रजतं पश्यामीत्यादिव्यवहारेण स्यादिति चेन्न
इदमाकारचाक्षुषाभिव्यक्तचित्स्थ्यस्तत्वेन रजतादौ तथाव्यवहारात् अथ तथापीदं रजतमित्यादिभ्रमस्याचाक्षुषताया
नेदं रजतमित्यादिचाक्षुषविरोधित्वेन स्याच्चाक्षुषस्यैव बाधविषयात्वाद्विरोधित्वादिति चेन्न तादृशभ्रमकाले शुक्त्या
दितील पृष्ठावच्छिन्नचक्षुःसंप्रयोगादिरूप[redacted]व्यंजकाभावेन शुक्तित्वादेरिव रजतभेदादेरप्यचाक्षुषत्वोपपत्तेः शक्ति
विशेषणदोषाणामेव प्रतिबंधकत्वस्य चक्षुरादिसंप्रयोगकारणत्वस्य वा कल्पनयोपपत्तिसंभवाच्च तादृशशक्त्येव वक्त
गत्या तादृशाचाक्षुषस्य यस्मान्नोत्पत्तिरुत्पत्तिर्वा तत्रैवस्वीकर्तुं शक्यत्वात् अथापि जाग्रद्भ्रमस्थले कथं चिद्रजतादिचा
क्षुषादिरुत्पद्यते स्वप्नभ्रमविषये तु तदसंभवात् केवलेन मनसा प्रमाया जननात् सुखादेः साक्षिमात्रवेद्यत्वात् संस्का अ४
रस्यानुपपत्तिरेव स्मृतेनय इत्यवच्छिन्नचिन्नाशस्यायावंतोर्थास्त इति सूक्ष्मावस्थैव तावंतो संस्कारस्तथा चेदं रजतमित्या
दिभ्रमस्थले इदमाद्याकारचाक्षुषवृत्तिसूक्ष्मावस्थैवेदमादेरिव रजतादेरपि संस्कार इत्यपि परास्तं स्वाप्नभ्रमस्थले व
त्तिसामान्याभावात् स्थाकरीत्या जाग्रद्भ्रमस्थले संस्कारनिर्वाहेपि स्वाप्नभ्रमस्थले तदनिर्वाहात्तत्र भ्रमविषयवृत्तिपरि

एवतः

णामो जायत इत्युच्यते तर्हि स्वप्नभ्रमस्थले ऽकॢप्तवक्ष्यमाणसामग्र्या जाग्रद्भ्रमस्थलेऽपि वृत्तिसंभवादुक्तकल्पनावैयर्थ्यं यद्यवच्छिन्न

ततः चैतन्ये यदज्ञानं तत्सूक्ष्मावस्थायां तत्संस्कारत्वस्य वक्तुं शक्यत्वेन भ्रमविषयसूक्ष्मावस्थाया एव तत्संस्कारत्वसंभवात् तुघुज्ञो सूक्ष्म

२० मनोवच्छिन्नचिदज्ञानस्याविद्यादेः सूक्ष्ममनोनाशरूपस्थूलावस्थारूपसंस्कारेण जागरे स्मृतिसंभवात् स्वप्नादिस्थलेऽपि वृत्तिकल्प

नानौचित्यात् इदमाद्याकारवृत्तेरिव रजतादेः सूक्ष्मावस्थाया अपि संस्कारत्वे बाधकाभावात् रजताद्यविषयकत्वस्य तयोस्तु

ल्यत्वादिति चेन्न वृत्तिस्मृतिजनकसंस्कारोद्बोधकत्वेन यानि कॢप्तानि तेषामेवानुगतानां शक्तिविशेषेणानुगतानां वास्मृ

तिहेतुत्वसंभवेन संस्कारत्वमानस्याभावः अथ अनुभूतमेव स्मर्यते नान्यदित्यन्वयव्यतिरेकाभ्यामनुभवस्य हेतुत्वेन निर्णी

ते तस्य साक्षादसंभवाद्व्यापारः कल्प्यः सर्वचिद्रूपस्यानुभवस्य नित्यत्वात्तदवच्छेदकवृत्तिसूक्ष्मावस्थारूपध्वंस एव भ्रमवि

षयरजतादिसूक्ष्मावस्थारूपध्वंसेऽपि संस्कारत्वजात्यङ्गीकारसंभवेनानुपपत्त्यभावात् युगपदुत्पन्नयोर्वृत्तितदवच्छेदकघ

टादिनाशयोरैक्येन विषयनाशेऽपि संस्कारत्वस्य वृत्तेरुत्यंतरनाशं विनापि तन्नाशस्यैव तत्संस्कारत्वस्य चावश्यकत्वात्

स्वावरणानवच्छेदकत्वेन संबन्धेन चितप्रतितिनिरूपकताख्यसंबन्धविशेषेण संस्कारत्वजात्या कार्यत्वकल्पनात्स्वसामग्री राम

वत्ताज्जायमानस्य वृत्तिनाशस्य वृत्तिघटादिविषयभ्रमविषयतन्नाशस्यैव संस्कारत्वविशिष्टतया निरूपकत्वसंबन्धेनोत्पत्ति २०

संभवात् उपेक्षात्मकवृत्तिस्थले आवरणाभिभवानङ्गीकारेणापेक्षाविरहस्यापि संबन्धविशेषेण वा संस्कारानुपधानात्

आवरणं च असत्त्वापादकाज्ञानविषयत्वं बोध्यं एतेन सत्यरजतस्थले रजताकारवृत्तिनाशो मिथ्यारजतस्थले [illegible] चेदमाकारवृत्ति
नाशो रजतनाशो वा संस्कारोऽङ्गीक्रियते तदनुगतरूपेण तस्य रजतानुभवव्यापारत्वासंभव इत्यादिकं परास्तं रजतविनिरू
पितत्वविशिष्टसंस्कारत्वस्यैकरीत्यानुगतत्वात् आसत्त्वावा भ्रमविषये शुक्त्यादिरूपेणैव संस्काररूपेणाप्यन्तःकरणपरिणामः
अन्यथा समूलभ्रमबाधे रजतादिसूक्ष्मावस्थाया अपि ध्वंसे भ्रमविषयरजतादिस्मरणानुपपत्तेः अथवा रजताद्यर्थरूपेणैव
भ्रमरूपवृत्तिरूपेणाप्यज्ञानं परिणमते अन्यथा रजतादेर्भ्रमो जातो नष्टश्चेत्यनुभवस्य दुरुपपादनत्वात् न चैवं भ्रमस्य वृत्ति
विषययोर्द्वयोरुत्पत्तिकल्पने गौरवमिति वाच्यं फलमुखत्वेनादोषत्वस्योक्तत्वात् तयोर्युगपदुत्पन्नविनष्टत्वेनैकप्रागभाव
ध्वंसप्रतियोगित्वस्यैव स्वीकारादेकस्यैव परिणामस्य रजतादिविषयरूपत्व तदाकारवृत्तिरूपत्वयोः संभवाच्च रजतत्वादिभ्र
विधपि६ मत्वाभ्यां अव्याप्यवृत्तिरूपाभ्यामेकस्यापि विषयत्वसंभवाच्च तच्च भ्रमान्यघटत्वावच्छेदकं तत्तादात्म्यसंबंधेन भ्रमत्वेन का
र्यत्वमेकैकेन भ्रमान्यविशिष्टावस्थाज्ञानत्वेन कारणत्वं अवस्थारूपाज्ञानत्वमज्ञानत्वजातिव्याप्यजातिविशेषः अज्ञानत्वस्यै
व निवेशो घटाद्युपधायके मूलाज्ञाने भ्रमानुपधायके व्यभिचारात्तन्निवेशः बाधसमवधानकालेऽप्यनुभूयमानाज्ञानेन
भ्रमानुपधानाद्भ्रमान्यविशिष्टेति वैशिष्ट्यं च तादात्म्यस्वपूर्वत्वस्ववृत्तिकृतिवृत्तित्वं चेति त्रितयसंबंधेन वृत्तिद्वयं कालिकेन न
नुवाकविक्षपरशुनादिदोषकार्यत्वस्य रजतत्वादिनानाधर्माघटितेन तादृशदोषविशिष्टत्वेनैव लाघवेनावच्छेदाद्भ्रमस्यापि
तादृशकार्यतावच्छेदकाक्रान्तत्वात् दोषबाधसमवधानकाले दोषादिसहकारिविरहात् भ्रमरूपकार्यानुत्पादो व्यभिचारा

नापादक इति चेन्न तथा सति दोषादिकं विनापि रजतभेदाग्रहज्ञानेन रजताद्युत्पादनापत्तेश्च विनारंगभेदाग्रहज्ञानसहकारेण दोषा
२१ दिना स्वविशिष्टस्य रंगादेर्जननेनैव दोषादे रजतभेदाग्रहज्ञानव्याप्यसामग्रीत्वासंभवात्तस्मात् स्वविशिष्ट रजतत्वादिनैव दोषादिका
र्यत्वादिव्यभिचारवारणायोक्तविशेषणमावश्यकं भ्रमरूपस्यावच्छेदकतादात्म्येन भ्रमांतरोत्पत्तिवारणाय भ्रमान्यदिति भ्रम
त्वं च जातिविशेषश्च भ्राम्यामीत्याद्यनुव्यवसायगतानुभवादिना सिद्धः तस्य चान्वयव्यतिरेकाभ्यां दोषजन्यत्वधीर्व्यंग्यत्वात् परत
स्त्वं प्रमात्वस्य तत्तत्स्थलीयदोषरूपप्रतिबंधाभावे सति साक्षिणैव विषयीकरणात् स्वतस्त्वं यद्यपि परोक्षप्रमाया विषये
ऽतीतानागते स्वच्छेदानसंभवति न वा विषयविषयिभावो ज्ञानाज्ञानयोरेकविषयेऽस्तदंगीकारात् प्रमाभ्रमवत्त्वाज्ञानत्वाभावा
त् ज्ञानव्यंजकत्वेन संस्कारादिजनकत्वेन च तत्र ज्ञानपदस्याकारेक्तवित्ययुक्तत्वात् तथा परोक्षभ्रमस्य स्वोपादानाज्ञानपरिणा
मीभूतविषयाणां समकालीनत्वान्नैरवच्छेदबाधकाभावश्च स्वावच्छेदकस्थाने स्वनिरूपकेति वा निवेशनीयं न चैवं प्रत्यक्षप्रमा
याइव प्रत्यक्षभ्रमस्य विषयावच्छिन्नत्वानुभवविरोध इति वाच्यं तादृशानुभवस्य प्रमास्थलेपि परेषामसंप्रतिपन्नत्वादेकाज्ञा
नोपादानकत्वेन भ्रमतद्विषययोरवच्छेद्यावच्छेदकभावोपचारसंभवाच्च अपरोक्षत्वपरोक्षत्वे तु प्रमाया इव भ्रमस्याप्यवृत्तचि
त्संबंधवद्विषयनिरूपितत्वं आवृत्तचित्संबंधवद्विषयनिरूपितत्वरूपे एव अपरोक्षभ्रमविषय इव परोक्षभ्रमविषये भातीति राम
व्यवहाराभावेनाभानापादकावरणास्वीकारानुमित्यादाविवेच्छादावपरोक्षत्वादिव्यवहारे क्षतिविरहात् अथवा उक्तनिरूपि २१
तत्वविशिष्टधीत्वरूपेति धीत्वं च ह्रीर्धीरित्यादिश्रुत्योक्तमिच्छादिव्यावृत्तमेयकामादीनां पृथगुक्तेः प्रत्यक्षभ्रमप्रमामात्रनिव

त्वीज्ञानजन्यत्वप्रमामात्रनिवर्त्याज्ञानजन्यत्वाभ्यां वा भ्रमे प्रत्यक्षपरोक्षत्वयोर्व्यवहारः॥ तथाच भ्रमसूक्ष्मावस्थैव संस्कारो भ्र
मविषयेषु वाच्या यद्वा निरूपकतारव्यसंबंधेन भ्रमंप्रति स्वपरिणामाव्यवहितपूर्ववर्त्यवस्थाऽज्ञानत्वेन भ्रमान्यस्वपरिणा
मविषयविषयतासंबंधेन हेतुत्वं भिन्नकालीनयोरपि विषयतायाः॥ संबंधत्वात् रजतादेरुत्पत्तिपूर्वक्षणे प्रकृतसंबंधेन
नाज्ञानसत्वे रजतादेरपि संभवत्येव ननु समूलस्य भ्रमस्य बाधे तादृशसंस्कारस्यापि बाधात्कथमग्रे स्मृतिरिति चेत् बाधो
त्तरमिदं रजतमासीदित्यादिस्मृतिर्न जायत एव जायमानायाश्चात्र मे रजतभ्रम आसीदित्यादिस्मृतेरंतःकरणपरि
णामरूपसंस्कारजन्यत्वोन्नानुपपत्तिरथ प्रमाभ्रमवृत्तिसंस्कारद्वारकस्मृतिजनकत्वस्य श्रादिजनकत्वस्य चासंभ
वः॥ भ्रमस्थले इदमादिप्रमावृत्तेः॥ रजताद्यनवगाहित्वात् रजतादिभ्रमवृत्तेरिदमाद्यनवगाहित्वाच्च स्वादेर्वृत्तिसामा
न्याभावात् इयं रजतमित्यादिप्रमास्थले इदंत्वावच्छिन्नविशेष्यतानिरूपितरजतत्वावच्छिन्नप्रकारताकनिश्च
यत्वेन परमते हेतुत्वेऽपि सिद्धांते तदसंभवः॥ विलक्षणत्वसंबंधावच्छेदेनापरत्वे त्वाख्यासात् विषयत्वसंबंधानामवच्छेद्या
व॰च्छेदकभावाख्यनिरूप्यनिरूपकभावांगीकारेऽपि निरूपकत्वाख्यवृत्तिविषयसंबंधानां तदंगीकारे मानाभावात्
अथ समूहालंबनाद्विशिष्टबुद्धेर्वैलक्षण्यानुरोधेन समूहालंबने विशेषणागेदः॥ प्रत्येकं निरूपकत्वं विशिष्टबुद्धेनोभ
विशेषणविशिष्टविशेष्यस्यैव विशिष्टवृत्तिनिरूपकत्वं वा समूहालंबनवृत्तिनिरूपकत्वं व्यावृत्तेनाखंडवैलक्षण्यमेव

त् च्युतमेव विशिष्टवृत्ती नामपि विशेष्ये विशेषणे तत्रापि विशेष्यतां तद्विशिष्टस्य वैशिष्ट्यमित्याद्यवांतरवैलक्षण्यानुप
पाधेर्निरूपकत्वे स्वविषमिथो व्यावृत्तवैलक्षण्यांगीकारान्निरूपकत्वं चाकारापपर्यायः कथं न संबंधः तथा च वि
शेषणविशिष्ट विशिष्य निरूपकता काया विशेष्यादिगत विलक्षण निरूपकतायां वा प्रमात्वं तेः स्मृत्यादिजनकत्व
संभव इति चेन्न तादृशशक्तित्वमात्रस्य संशयेच्छादिसाधारण्यात् निश्चयत्वघटितानत्वव्याप्यजातिरूपस्य वक्तव्यभी
ते तादृशप्रमात्वेन हेतुत्वे इच्छारंजनमित्याकारकभ्रमादपीच्छादुःखेन व्यभिचारात् तत्र तादृशभ्रमस्य हेतुत्वांतरकल्प
ने गौरवाच्चेति चेत् सत्यं तथापि विशिष्टस्मृतीच्छादेर्विशिष्टज्ञानाभावस्य प्रयोजकत्वसंभवः न च मुख्यादेशशक्तिर
जतादेर्वैशिष्ट्यज्ञानस्यैवाप्रसिद्धेर्नैवमिति वाच्यं स्वावच्छिन्नविषयताकत्वतृतीयाज्ञानाश्रयतानवच्छेदकत्वे
सुमयसंबंधेन विशेषणविषयताविशिष्टाया विशेष्यसंसर्गादिविषयतायास्तत्तृतीयस्मृतीच्छादेर्हेतुत्वसंभवा
त् विषयतावैचित्र्यस्य संबंधस्तु कं तादृशाश्रयतानवच्छेदकत्वं च तादृशावच्छेदकत्वसंबंधेन स्वात्यंताभाववत्त्वं तथा च
शुक्तिरूप्यादिविषयत्वादेः तादृशसंबंधाप्रसिद्धावपि शुक्तित्वाश्रयतादिप्रतियोगिकतादृशसंबंधेन शुक्तिरूप्या
दिविषयत्वाद्यभावप्रसिद्धावपि न दोषः ज्ञानं च प्रकृतेऽसत्वापादकं ग्राह्यं तेन परोक्षप्रमास्थलेऽभानापादकाज्ञा
नस्यत्वेपि न क्षतिः एवं विशिष्टप्रत्यक्षत्वादिना यत्र हेतुत्वादिकं तत्राभानापादकाज्ञानं विविच्य प्रतिवाच्यं यत्तु विशि

श्चाश्रयत्वादिना परेषां हेतुत्वादिति चास्माकमप्युक्तरीत्या तथैव अज्ञानाभिभावकत्वं प्रमात्वेनैव न त्वेवमज्ञानविषयतया सर्वं साक्षि
भास्यमिति सिद्धान्तविरोधः॥ प्रमावृत्तिं विनाप्यज्ञातत्वमिह जानामीति व्यवहारनियामकस्य साक्ष्यभिन्नचित्संबंधस्यानावृत्त
स्य श्रुतित्वात्स्वभावात् तदभावे च साक्षिभास्यत्वकथनायोगादिति चेन्नोक्तव्यवहारनियामकसंबंधाभावेप्यज्ञातत्वमिह न जाना
मीत्यज्ञानविशेषणतयाज्ञातत्वावच्छिन्नविषयताकत्वस्यैवेदमवच्छिन्नाश्रयतोपकल्पनस्य ज्ञानगतस्य साक्ष्यनावृतसंबंधाव
तो व्यवहारे तोक्तसिद्धान्तसंगतेः॥ न चैवमज्ञातं घटं जानामीत्यनुसारेण व्यवहारो न स्यादिति वाच्यं इष्टत्वात्तद्विषयकवृत्तिवि
शेषणतयैव विषयाज्ञातत्वाङ्गीकारात् न हि कश्चिदनुभवति अज्ञातो घटो ज्ञात इति अत एव घटत्वेन प्रमोत्पादे घटत्व
ने मं जानामि वैचित्र्यत्वादिना तु न जानामीत्यनुभवः॥ अथ प्रमावृत्त्युपरमेपि। ज्ञातादिविशेषणतया साक्षिणा भास्यमानेऽज्ञा
तत्वादिविशिष्टे इमादो जानामीति व्यवहारानुपपत्तिरनावृतचित्संबंधस्य तत्प्रयोजकत्वात्त्योपरमे चावरणसंभवा
दिति चेन्न नानाज्ञानपक्षे प्रमाकाल इवेच्छाद्वेषकृतिकालेप्यज्ञानान्तरावरणानङ्गीकारात् साकारयोगपद्यवृत्तित्वेनैवासत्त्वा
पादकाज्ञानाभिभावकत्वाङ्गीकारात् अत एव स्मृतौ प्रमात्वानङ्गीकारेपि तस्या असत्त्वापादकाज्ञानाभिभावकत्वसंभवाद्
योगपद्ये नैव संस्कारवारणादेकाज्ञानपक्षेपि साकारयोगपद्यवृत्त्युभावविशिष्टाज्ञानाभावस्यैव जानामीत्यादिव्यवहारादिनि
यामकत्वात् स्मार्थिकाज्ञस्याज्ञानसंबंधावच्छेदकत्वानङ्गीकाराद्याप्युपपन्नत्वात्स्मात्तभावरूपाज्ञाने दुरपह्नवं न तु अज्ञानस्यवा

वर्त्तकधर्मनिश्चयस्थानीयत्वेनरजतादिभेदतद्व्याप्यतदवच्छेदकधर्मावच्छिन्नविषयताकस्यतस्यरजतादिभ्रमहेतुत्वसंभवेपि
शुक्तित्वाद्यवच्छिन्नविषयताकस्यतस्यतद्धेतुत्वंनस्यादुक्तव्याप्यत्वादिविशिष्टशुक्तित्वाद्यवच्छिन्नविषयताकस्यतत्वेतस्यं
शुक्तिरित्याद्याकारकताद्दशव्याप्यत्वाद्यनवगाहिभ्रमानभिभावयतापत्तेरथताद्दशव्याप्यत्वाद्यनवगाहिन्यापिशुक्तित्वा
द्यवच्छिन्नविषयताकस्यतत्वेतस्ययंशुक्तिरित्याद्याकारकताद्दशव्याप्यत्वाद्यनवगाहिन्यंशेनरजतादिभेदत्वेकारकोद्बुद्ध
संस्कारविशिष्टयोक्तप्रमायास्तदभिभवसंभवइतिचेन्नतदविशिष्टायाअपिशुक्तित्वादिप्रमायास्तदभिभावकत्वस्यशुक्तित्वादि
मात्रावच्छिन्नविषयताकाज्ञानेरजतादिभ्रमहेतुत्वस्यचाकरेसूक्तेरखंडस्यचिदाकारचरमवृत्तेस्तथाज्ञानाभिभावकत्वानुपप
त्तेश्चतयोर्व्यावर्त्तकधर्मागोचरत्वादुक्तसंस्कारविशिष्टत्वाच्चेतिचेत्सत्यंव्यावर्त्तकधर्मानाकारकत्वेप्यन्वयव्यतिरेकाभ्यामुक्ता
ज्ञानस्यभ्रमहेतुत्वादुक्ताज्ञानप्रमयोश्चाभिभाव्याभिभावकभावांगीकारात्किंचशुक्तित्वाद्यवच्छिन्नविषयताकाज्ञानस्य
रजतादिभ्रमहेतुत्वेशुक्तित्वादिप्रमायास्तदज्ञानाभिभावकत्वंचैवाकारकंनतूक्ताज्ञानविषयतावच्छेदकशुक्तित्वादेर
जतादिभेदावच्छेदकत्वाविशेषितत्वमुक्तंनचोक्तसंस्कारवैशिष्ट्यमुक्तप्रमायाउक्तेरखंडचिदाकारचरमवृत्तेरखंडचिदा राम
काराज्ञानाभिभावकत्वंनानुपपन्नमविद्यादिरूपसकलप्रपंचानात्मकंब्रह्मेतिप्रतिसंधानरूपतत्पदार्थशोधनजन्योद्बुद्ध २३
संस्कारसहकृतत्वात्नचाविद्यादिकंसत्स्यद्वीतिभ्रमेसद्बुद्ध्यनाविद्याधीत्मकमितिज्ञानस्यैवपरमतरीत्याविरोधित्वे

नत्वुक्तसंस्कारसहकृतस्य शुद्धचिन्मात्रज्ञानस्येति वाच्यं इदं रजतमित्यादिज्ञाने शुक्तित्वाद्यवच्छेदेन रजतान्यत्वगोचरोद्बुद्धसंस्कारविशिष्टस्येव शु
क्तिरित्यादिज्ञानस्येव शुक्तित्वाद्यवच्छेदेन रजताद्यन्यत्वगोचरोद्बुद्धसंस्कारविशिष्टस्य शुक्तित्वादिज्ञानसामान्यस्यापि शुक्तौ रजतमित्यादि
धीविरोधित्वौचित्यात् तन्न्यायेन ० प्रकृते विशेषित्वसंभवादपिविपरैरपि प्रघटेन घटः इत्यादिभ्रमे घट इत्यादिज्ञानस्येव निर्धर्मितावच्छेदककस्य
विरोधित्वमुच्यते तन्न्यायेन शुद्धचितितदन्यत्वरूपजडत्वविशिष्टस्याविद्यादिभ्रमं प्रतिशुद्धचिन्मात्रगोचरज्ञानस्यापि विरोधित्वे निष्प्रत्यू
हं नच परमते तादृशभ्रमेच्छाविरहविशिष्टस्यैव तादृशज्ञानस्य विरोधित्वं सिद्धांते तु उक्तज्ञानमात्रस्य विरोधित्वं इति वैषम्यमिति वाच्यं
द्वैतमात्रवीतरागपुरुषस्य मोक्षहेतुतादृशज्ञानोदयेन तादृशज्ञानस्यापि द्वैतभ्रमेच्छाविरहविशिष्टत्वात् किंचाहं ब्रह्मास्मीत्यादिवा
क्यजन्यज्ञानस्य नाहं ब्रह्मेत्यादिभ्रमविरोधितावच्छेदकविषयताकत्वं परमतेप्यंगीक्रियते तथा च शुद्धचिन्मात्रे तु दृशानामभिव प्रयो
जकविलक्षणाकारस्वीकारेणैव निर्वाहे किमिति तस्य सप्रकारकत्वनिर्बंधः विलक्षणाकारे च तत्त्वंपदार्थतावच्छेदकपरामर्शपू
र्वकतत्त्वंपदार्थशोधनलक्षणाज्ञानादिशास्त्रसामग्र्या एव नियामकत्वमित्यन्यत् न चोपनिषदामपि तादृशज्ञाने शुद्धचिदाका
रत्वे किमिति निर्बंध इति चेदौपनिषदं पुरुषं पृच्छामि नावेदविन्मनुते तं बृहंतं पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यति नांतरा
त्मन् यन्मनसा न मनुत इत्यादिश्रुतिभिः शास्त्रयोनित्वादिति चेदौपनिषदं पुरुषं पृच्छामीनो वेदान्यायाद्वृद्धः सन्नित्यादिप्रत्यये घटाद्य
वच्छिन्नचित इवेन्द्रियवेद्यत्वांगीकारात् सुखादीनां साक्षिभास्यत्वेन मनसः स्वातंत्र्येण प्रमाणत्वकल्पनाद्दृश्यते त्वग्र्यया बुद्ध्या इत्यादि
श्रुतौ च तृतीयायाः कर्तृत्वमात्रार्थत्वादनवच्छिन्नचित उपनिषदेकगम्यत्वनिश्चयादुपनिषदश्चोपक्रमादिभिः शुद्धचित्येव तात्पर्य
ग्रहात् प्रपंचोपशमं शिवमद्वैतं चतुर्थं मन्यंते स आत्मा स विज्ञेयः तमेव विदित्वातिमृत्युमेतीत्यादिश्रुतिषु तस्याज्ञेयत्वोक्तेः अज्ञानका श्री

यौपहितचितोऽज्ञातत्वासंभवात् जीवेशाभेदाघनादिपदार्थानां च संसारदशायां भासमानत्वेन तदुपहितचितोप्यज्ञाततत्वासंभवात् शुद्धचि
त्पेवाज्ञातत्वपर्यवसानात् तस्याभेदश्रुतितात्पर्य्यौचित्यात् तज्ज्ञानस्यैवोक्तरीत्याऽविद्याभिभावकत्वसंभवेऽधिकाऽज्ञाततात्पर्य्यमानाभावा
च्च ननु शुद्धचितिश्रुतेस्तात्पर्य्येपि श्रुतिजन्यतज्ज्ञानेऽर्थात्तस्यापि दैववशात्संपन्नत्वाद्दृढसंस्कारादिसामग्रीबलाज्ज्ञाने तस्याप्यज्ञानाभिभा
वकत्वं भवत्विति चेदिष्टत्वेनैव न च तनमेवेत्यादिश्रुतिविरोध इति वाच्यं एकधैवानुद्रष्टव्यं को मोहः कः शोक एकत्वमनुपश्यत इत्यादि
केवलार्थकैकपदघटितश्रुत्येकवाक्यतया चिदंशे संसर्गागोचरत्वमात्रस्यैवोक्तश्रुत्या बोधनात्तस्याः शुद्धचिदज्ञानाभिभवप्रयोज
कशुद्धचिदाकारत्वस्य न्यायप्राप्तस्यानुवादमात्रत्वाच्च समूलत्वेन विषयार्थान्तरस्याहि शुद्धचिदाकारज्ञानस्य मोक्षजनकत्वाव
च्छेदकत्वादत एवोपबृंहणानि वेदुर्द्धियानामो न च तत्ववित् न बुद्धिं मर्दयन्नृत्यो घटतत्तस्य वेदितेत्यादिकमधिष्ठानतत्वज्ञाने स्वात
त्मेतरविषयकेप्यज्ञानाभिभावकत्वमंगीकृत्योक्तं ध्यानदीपिकायां विद्यारण्यश्रीचरणैः अव्यतिरिक्तैकरसत्वात्प्रातिपदिकार्थमा
त्रत्वम् इति पंचपादिकायुक्तिः संसर्गासंगी सम्यग्धीहेतुतेति तत्वदीपिकायुक्तिः चोक्तरीत्या नेया यदि तु मोक्षहेतुज्ञाने तत्वा
तिरिक्तं न भासत इति नियमो द्वैताद्वैतबुध्योर्न योगपद्यमिति विवरणात् संतमसवदालोकयोरिव तयोर्विरोध इति तत्वदीपना
च्च तदा रागाद्यस्य कामित्यादिजिज्ञासायामितरभानप्रतिबंधकत्ववत् वीतरागस्य तत्वजिज्ञासायां तत्वेतरभानप्रतिबंधकत्वस्य
संभवान्नानुपपत्तिरिति ध्येयं ननूक्तज्ञानस्यैन्द्रियविषयभोगमात्रतिरस्कारेण प्रवृत्त्यनुपपत्तिः तस्य भोगमात्रोपेक्षयोत्कर्षाभा राम
वात् सुखदुःखाभावतत्साधनान्यत्वेनोद्देश्यत्वासंभवाच्च न च मोक्षरूपनिरतिशयनित्यसुखसाधनत्वेन तादृशज्ञानस्य सातिशा २४
यविनाशिभोगमात्रतिरस्कारेणोद्देश्यतेति वाच्यं मोक्षस्य चिन्मात्रत्वे साध्यत्वानुपपत्तेः चिद्रूपत्वेऽतोऽन्यदार्त्तमित्यादिश्रुत्यापि

त्वादिरूपत्वा मिथ्यात्वादिहेतुकानुमित्यादिना च विनाशित्वात् न चाविद्याध्वंसोपहितश्चात्मैव मोक्षोऽविद्याध्वंसश्च सदसदनिर्वाच्योऽभिन्नोऽ
विद्यानुपादानकत्वादविद्याविशिष्टप्रत्येवाविद्याया उपादानत्वात् तद्ध्वंसस्य च तत्कालीनत्वरूपतद्वैशिष्ट्याभावात्तथा चाविद्याध्वंसोपहित
त्वचित एवानवच्छिन्नानंदभानरूपत्वेनाविद्याध्वंसस्यावच्छिन्नसकलानंदतिरस्कारेण काम्यत्वसंभवात्तत्साधने ज्ञानस्यापि तथैव काम्यते
ति वाच्यं उक्तध्वंसस्याविद्यानुपादानकत्वेपि दृश्यत्वादेव मिथ्यात्वसंभवा दृक्दृश्ययोः संबंधानुपपत्तिरूपानुकूलतर्केण व्याप्तिनिश्चयादि
ति चेत् सत्यं मिथ्यात्वेपि तादृशध्वंसस्याविद्याउपादानकत्वादेव ज्ञानानिवर्त्यत्वेनाविनाशित्वसंभवात् अविद्याध्वंसस्य ध्वंसे चाविद्योमज्ज
नप्रसंगात् तदुपहितात्मरूपस्य मोक्षस्य नित्यत्वेनानित्यसकलपुरुषार्थापेक्षयोत्कर्षात् न च विषयसुखस्येवानवच्छिन्नसुखस्येवान्य
ज्ञानधीनेच्छाविषयत्वं न तु तज्ज्ञानस्य तथा च तज्ज्ञानस्य सुखदुःखाभावो प्रतिसाधनत्वेनैव काम्यता वाच्या तच्च तस्य न संभवतीति का
म्यत्वासंभव इति वाच्यं चिद्रूपस्य सुखस्यावृतस्याकाम्यत्वेन सुखभानस्यैव सर्वत्र काम्यत्वात् विषयसुखस्थलेपि चंदनादिसंयोगज
न्यमनोवृत्तिविशेषादनानंदापादकावरणनाशांशीकारेण तद्विशिष्टचित एवात्मसुखभानरूपायाः काम्यत्वात् यावगतिरन्ये ध्वं
विनैव काम्यते सा पुरुषार्थ इत्यभ्युपगम्यते अत एव सुखं ते भविष्यति महत्परं तु न वनभास्यतीति प्रतारितस्तत्सुखं न कोपि कामयते न
चावरणनाशो कल्पयित्वा तद्विशिष्टचितः सुखभानत्वकल्पनादिचिद्रूपमनोवृत्तिविशेष एव सुखमिति वरं कल्प्यतामिति वाच्यं मनो
वृत्तिं विनापि सुषुप्तौ चिद्रूपसुखभानस्य सुखमहमस्वाप्समिति प्रागुक्तस्मृत्युदयात् न चाविद्यावृत्तिरेव सुषुप्तौ सुखं संभवतीति वा
च्यं चित्सुखेनैव निर्वाहे तदा तत्कल्पने गौरवात् रजोगुणोद्रेकस्यावरणस्याभावादेव तदानीं तज्ज्ञानसंभवादत एव विषयसंयोगेन वा
सन्ताक्षयेन वा रजःक्षयतारतम्येन सुखभानतारतम्यं किंच मा न भूवं भूयासमित्यन्येच्छानधीनेच्छाया आत्मनि दर्शनात् सुखमेव सा

नचबलवद्व्याधिपीडायां माभूवमिति द्वेषस्याप्यन्यद्वेषात् धीनस्य कदाचिद्दर्शनात् सुखमपि सस्यादिति वाच्यं तादृशद्वेषस्य दुःखद्वेषे
तोवोदयात् व्याध्यपगमे मा न भूवमिति इच्छाया एवोदयात् आनंदरूपममृतं यद्विभाति एषोस्य परमानंदः भूमैव सुखं नाल्पे सुखमस्ति
विज्ञानमानंदं ब्रह्म आनंदं ब्रह्मेत्यादिश्रुत्यात्मन आनंदत्वोक्तेः । नच नाल्पे सुखमिति स्वारस्येन भूम्नि सुखमित्यर्थः । इति वाच्यं भूमा
त्वेव विजिज्ञासितव्य इत्यभिमस्य भूमैव सुखमित्यस्य वसावधीरणस्यानुसारात् अमित्यस्यैवाल्पमित्यर्थकत्वात् पर पर्यः समग्र
योऽपत्वेन भूम्न एव प्रकरणप्रतिपाद्यत्वात् भूमा संप्रसादादध्युपदेशात् इति न्यायात् प्रियोन्यस्मात् सर्वस्मादंतरतरं यदयमात्मेत्या
दिश्रुतिभिः । स्वान्यसर्वापेक्षयात्मनः प्रियत्वोक्तेः स एव दुःखाभावस्य पुरुषार्थतावादोप्यपास्तः । सुखव्यंजकत्वेनैव तस्य काम्यत्वाद्दुः
खाभावापेक्षया सुखस्य लघुत्वात् तस्मान्नित्यदेव सुखमिति तस्या एवावरणविशेषोध्वंसोपहितायाः मोक्षत्वमव्याहतं वस्तुतस्तु
चिद्रूपस्य विनाशित्वेनो तत्त्वज्ञानाधीनाविद्याध्वंसस्यानंगीकारेपि न क्षतिः । चित एव तत्त्वज्ञानतत्संस्काराद्युपहितायाः तत्त्वव्यवहार
नियामकत्वसंभवात् निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षित इति वार्तिकाद्युक्तेः । तत्त्वज्ञानाधीनाग्रिमसमयसंबंधवत्त्वस्य तत्त्वज्ञा
नाभावप्रयोज्याविद्यात्मकाभावप्रतियोगित्वस्य वा तत्त्वज्ञानसाध्यत्वस्यानवच्छिन्नरूपमोक्षरूपात्मनि संभवात् दंडादृष्टस्याग्रिमक्षणे
ण संबंधः दंडाभावाददृष्टाभाव इतिवत् तत्त्वज्ञानादिदानीमनवच्छिन्नसुखं प्राप्तं तत्त्वज्ञानाभावाद्दुःखोहमिति प्रतीतेः वस्तुगत्या तत्सुख राम
स्यासाध्यत्वेपि साध्यत्वभ्रमेणापि प्रवृत्तिसंभवाच्च तादृशभ्रमस्य चापरोक्षतत्त्वज्ञानैकनिवर्त्यत्वात् वैषयिकसुखस्यापि नित्यचिद्रूप २५
त्वेन तदर्थमपि साध्यत्वभ्रमेणैव सर्वत्र प्रवृत्तिस्वीकारात् तादृशासाध्यत्वस्यैव लोकसिद्धस्य श्रुत्यादिभिः अनुवादात् एवं वदंति प्रमाया

एवाज्ञानध्वंसत्वांगीकारपक्षेपि न क्षतिः। अथ वृत्तिप्रमाया अविद्याध्वंसत्वे तन्नाशकाले कथमविद्यानाशव्यवहारः। यावद्देहोत्तरोत्तर
मनःपरिणामानामेव पूर्वपूर्वमनःपरिणामध्वंसत्वात् घटनाशस्य घटप्रागभावनाशत्ववत् प्रमानाशादिरेवाविद्याध्वंस इत्युच्यते तथा
पि विदेहकैवल्यप्राक्तनचरममनःपरिणामध्वंसक इति पर्य्यनुयोगावश्यकत्वं यदि च तद्ध्वंसो नाभ्युपेयते तत्र व्यवहाराभावादित्युच्यते तदा
पि तद्ध्वंसपरिणामकः क गत इति पर्य्यवसित इति पर्य्यनुयोगानुद्धारादिति चेन्न तर्हि यत्र ध्वंसोंगीकृतः तत्र प्रतियोगी क गत इति पर्य्यनुयोगा
त्कथं निस्तारः। अथ तत्र प्रतियोगी घटादिर्ध्वस्त इति चेत् सत्यमुक्तं किंतु ध्वंसः। प्रतियोग्यवस्थाविशेषो वा प्रतियोगिनोऽत्यंतभिन्नो
वा आद्ये प्रतियोगिनः पूर्वावस्था क गतेति पर्य्यनुयोगः। अंत्ये ध्वंसस्य जातत्वेपि प्रतियोगी क गत इति पर्य्यनुयोगः। दुरुद्धरः अथ ध्वंस
कालात्पूर्वं प्रतियोगी प्रमाणगोचरो न ध्वंसकाले न तु कचिद्गतो ध्वस्त इति व्यवहारार्थं तु ध्वंसोंगीक्रियत इत्युत्तरं तर्हि प्रकृतेपि विदेहके
वल्यपर्य्यंते व्यवहारस्याकारीत्यासंभवात्तदुत्तरं च चरमपरिणामस्य प्रमाणागोचरत्वात् व्यवहारस्यैवाभावेन ध्वंसानंगीकारेपि क्षत्यभावा
च्च न काप्यनुपपत्तिरिति सुधीभिर्विभावनीयम् अथ ध्वंसकाले प्रतियोग्यसत्तायां ध्वंससामग्र्येव नियामिका तद्व्यावच्छेदेन ध्वंससामग्रीमत्
क्षणत्वस्य तद्व्यावच्छेदेन प्रतियोगिमान्यः कालः तत्पूर्वत्वानधिकरणत्वव्याप्यत्वात् तत्प्रतियोगिध्वंसस्य तत्सहानवस्थाननियतत्वा
त्तु उक्तचरमपरिणामस्य तु पश्चादसत्तायां नियामकाभाव इति चेन्न प्रारब्धभोगतत्कर्मणः देहादिनिवृत्तौ प्रतिबंधकत्वेन विदेहकैवल्य राम
पर्यंतमनोवृत्त्यादिरूपस्य प्रारब्धभोगोपयुक्तप्रपंचस्य सत्त्वेप्यग्रे तदसत्तायां तत्प्रमायास्तत्त्वाज्ञानतः प्रयुक्तपूर्वावस्थानियतत्वादि २६
तिदिक्॥ ॥इत्यद्वैतसिद्धांतविद्योतने परमहंसपरिव्राजकश्रीब्रह्मानंदसरस्वतीविरचिते प्रथमपरिच्छेदः॥ ॥शुभं भूयात् श्रीः

३६

123
1(B)

अद्वैतसिद्धांतविद्योतने प्रथमपरिच्छेदः समाप्तः

209

३६